Shreemad - Bhagavatham
Pratham Skandha I

B. I (A)

अथ
श्रीमद्भागवतम्

(श्रीधरकृत भावार्थदीपिका व्याख्या सहितम्)

प्रथम स्कंधः

(सम्पूर्ण)

भा०प्र० श्रीगणेशायनमः ॥ श्रीराधाकृष्णाभ्यांनमः ॥०॥ ॐनमःश्रीपरमहंसास्वादितचरणकमल
॥१॥ चिन्मकरंदायभक्तजनमानसनिवासायश्रीरामचंद्राय ॥ वागीशायस्यवदनेलक्ष्मीर्यस्यचवक्ष
सि ॥ यस्यास्तेहृदयेसंवित्तंनृसिंहमहंभजे ॥ १ ॥ विश्वसर्गविसर्गादिनवलक्षणलक्षितं ॥ श्रीकृष्णाख्यं
५ स्वानुकूलेन परंधामजगद्धामनमामितत् ॥ २ ॥ माधवोमाधवावीशौसर्वसिद्धिविधायिनौ ॥ वंदेपरस्परात्मानौप
रस्परनुतिप्रियौ ॥ ३ ॥ संप्रदायानुरोधेनपौर्वापर्यानुसारतः ॥ श्रीभागवतभावार्थदीपिकेयंप्रत
न्यते ॥ ४ ॥ क्वाहंमंदमतिःक्वेदंमंथनंक्षीरवारिधेः ॥ किंतत्रपरमाणुर्वैयत्रमज्जतिमंदरः ॥ ५ ॥
मूकंकरोतिवाचालंपंगुंलंघयतेगिरिम् ॥ यत्कृपातमहंवंदेपरमानंदमाधवम् ॥ ६ ॥ श्रीमद्भाग
वताभिधःसुरतरुस्तारांकुरःसज्जनिःस्कंधैर्द्वादशभिस्ततःप्रविलसद्भक्त्यालवालोदयः ॥
द्वात्रिंशत्त्रिशतंचयस्यविलसच्छाखाःसहस्राण्यलंपर्णान्यष्टदशेष्टदोतिसुलभोवर्वर्त्तिसर्वोप
रि ॥ ७ ॥ अथनानापुराणशास्त्रप्रबंधैश्चित्तप्रसत्तिमलभमानस्तत्रतत्रापरितुष्यन्नारदोपदेशतः
श्रीमद्भगवद्गुणवर्णनप्रधानंश्रीभागवतशास्त्रंप्रारिप्सुर्वेदव्यासःतत्प्रतिपाद्यपरदेवतास्मरण
लक्षणंमंगलमाचरति ॥ जन्माद्यस्येति ॥ परंपरमेश्वरंधीमहीति ॥ ध्यायतेर्लिङिछांदसंरूपंध्या
येमेत्यर्थः ॥ बहुवचनंशिष्याभिप्रायं ॥ तमेवस्वरूपतटस्थलक्षणाभ्यामुपलक्षयति ॥ तत्रस्वरू १
पलक्षणंसत्यमिति ॥ सत्यत्वेहेतुः ॥ यत्रयस्मिन्त्रयाणांमायागुणानांतमोरजःसत्त्वानांसर्गोभू

स्मिंश्च प्रलयं यांति पुनश्च युगक्षये इत्याद्या | तर्हि किं प्रधानं जगत्कारणत्वाद्ध्येयमभिप्रेतं नेत्याह | अभिज्ञः | स ऐक्षत लो
कान्नु सृजा इति स इमांल्लोकानसृजतेति श्रुतेः | ईक्षतेर्नाशब्दमिति न्यायाच्च | तर्हि जीवः स्यान्नेत्याह | स्वराट् | स्वेनैव राज
ते यः तं स्वतः सिद्धज्ञानमित्यर्थः | तर्हि किं ब्रह्मा | हिरण्यगर्भः समवर्त्ततागे भूतस्य जातः पतिरेक आसीदिति श्रुतेः | नेत्याह
तेने इत्यादि कवये ब्रह्मणेपि ब्रह्म वेदं यस्तेने प्रकाशितवान् | यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै | तं
हि देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये इति श्रुतेः | ननु ब्रह्मणोऽन्यतो वेदाध्ययनमप्रसिद्धं | सत्यं
तत्तु हृदा मनसैव तेने | अनेन बुद्धिवृत्तिप्रवर्त्तकत्वेन गायत्र्यर्थो दर्शितः | वक्ष्यति हि | प्रचोदिता येन पुरा सरस्वती

तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोमृषा धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि || १

वितन्वताजस्य सतीं स्मृतिं हृदि | स्वलक्षणा प्रादुरभूत्किलास्यतः स मे ऋषीणामृषभः प्रसीदतामिति | ननु च ब्रह्मा स्व
यमेव सृष्टप्रतिबुद्ध्या येन वेदमुपलभतां नेत्याह | यद्यस्मिन्ब्रह्मणि सूरयोपि मुह्यंतीति | तस्माद्ब्रह्मणोपि पराधीन
ज्ञानत्वादस्वतः सिद्धज्ञानः | परमेश्वर एव जगत्कारणं अत एव सत्यः | असतः सत्ताप्रदत्वाच्च परमार्थसत्यः | सर्वज्ञत्वे
न च निरस्तकुहकत्वं | धीमहीति गायत्र्या प्रारंभेण च गायत्र्याख्यब्रह्मविद्यारूपमेतत्पुराणमिति दर्शितं | यथोक्तं म
त्स्यपुराणे पुराणदानप्रस्तावे | यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः | वृत्रासुरवधोपेतं तद्भागवतमिष्यते | लिखि ॥ २ ॥
त्वा तच्च यो दद्याद्धेमसिंहसमन्वितं | प्रौष्ठपद्यां पौर्णमास्यां स याति परमं पदं | अष्टादशसहस्राणि पुराणं तत्प्रकीर्त्ति

तंपरंसत्यं १

तेंद्रियदेवतारूपः ॥ अमृषासत्यः ॥ यत्सत्यतयामिथ्यासर्गोपिसत्यवत्प्रतीयतेइत्यर्थः ॥ अत्रदृष्टांतः
तेजोवारिमृदांयथाविनिमयोव्यत्ययः ॥ अन्यस्मिन्नन्यावभासः ॥ सयथाऽधिष्ठानसत्तयासद्वत्प्रतीयत
इत्यर्थः ॥ तत्रतेजसिवारिबुद्धिःमरीचिकायांप्रसिद्धा ॥ मृदिकाचादौवारिबुद्धिरित्यादियथायथमूह्यं ॥ य
द्वा ॥ तस्यैवपरमार्थसत्यत्वप्रतिपादनायतदितरस्यमिथ्यात्वमुक्तं ॥ यत्रमृषैवायंत्रिसर्गोनवस्तुतःसन्निति
यत्रेत्यनेनप्रतीतमुपाधिसंबंधंवारयति ॥ स्वेनैवधाम्नामहसानिरस्तंकुहकंकपटंयस्मिन्तं ॥ तत्स्वलक्षणा ःवारिरश्मि चकाचादि वुद्धि इ सद्वा २

जन्माद्यस्ययतोन्वयादितरतश्चार्थेष्वभिज्ञःस्वराट्तेनेब्रह्महृदायआदिकवयेमुह्यंतियत्सूरयः ॥

माह ॥ जन्मादीति ॥ अस्यविश्वस्यजन्मस्थितिभंगायतोभवतितंधीमहीति ॥ तत्रहेतुः ॥ अन्वयादितरतश्चार्थेषु
कार्येषुपरमेश्वरस्यसद्रूपेणान्वयादकार्येभ्यश्चखपुष्पादिभ्यस्तद्व्यतिरेकात् ॥ यद्वा ॥ अन्वयशब्देनानुवृत्तिः ॥ इ
तरशब्देनव्यावृत्तिः ॥ अनुवृत्तत्वात् सद्रूपंब्रह्मकारणंमृत्सुवर्णादिवत् ॥ व्यावृत्तत्वाद्विश्वंकार्यंघटकुंडलादिवदित्य
र्थः ॥ यद्वासावयवत्वादन्वयव्यतिरेकाभ्यांयदस्यजन्मादितद्यतोभवतीतिसंबंधः ॥ तथाचश्रुतिः ॥ यतोवाइमानिभूतानि
जायंतेयेनजातानिजीवंति ॥ यत्प्रयंत्यभिसंविशंतीत्याद्या ॥ स्मृतिश्च ॥ यतःसर्वाणिभूतानिभवंत्यादियुगागमे ॥ य

भा० प्र०
३ त्तिसर्वैर्न श्रुखंवतित्तत्राह। कृतिभिरिति। श्रवणेच्छां तु पुण्यैर्विना नोत्पद्यत इत्यर्थः॥ तस्मादत्र कांडत्रयार्थस्यापि य
थावत्प्रतिपादनादिदमेव सर्वशास्त्रेभ्यः श्रेष्ठं। अतो नित्यमेतदेव श्रोतव्यमिति भावः॥ २॥ इदानींतु न केवलं
सर्वशास्त्रेभ्यः श्रेष्ठत्वादस्य श्रवणं विधीयते॥ अपितु सर्वशास्त्रफलरूपमिदं॥ अतः परमादरेण सेव्यमित्याह॥
निगमेति। निगमो वेदः स एव कल्पतरुः सर्वपुरुषार्थोपायत्वात्तस्य फलमिदं भागवतं नाम तत्तु वैकुंठगतं
नारदेनानीय मह्यं दत्तं॥ मया च शुकस्य मुखे निहितं॥ तच्च तन्मुखाद्भुवि गलितं॥ शिष्यप्रशिष्यादिरूपपरंपरया^ पल्लव ५
शनैरखंडमेवावतीर्णं न तूच्चनिपातेन स्फुटितमित्यर्थः॥ एतच्च भविष्यदपि भूतवन्निर्दिष्टं॥ अनागताख्यानेमेवास्यश्रा
व्यत्वप्रवृत्तेः॥ अत एवामृतरूपेण द्रवेण संयुतं॥ लोके हि शुकमुखस्पृष्टं फलममृतमिव स्वादु भवतीति प्रसिद्धं॥ अत्र शुको

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतं॥ पिबत भागवतं रसमालयं मुहुरहो रसि
का भुवि भावुकाः॥ ३॥

मुनिः अमृतं परमानंदः स एव द्रवो रसः॥ रसो वै सः रसं ह्येवायं लब्ध्वानंदी भवतीति श्रुतेः॥ अतः हे रसिकाः रसज्ञाः तत्रापि भावु
विशेष २ काः हे रसभावनाचतुराः॥ अहो भुवि गलितमित्यलभ्यलाभोक्तिः॥ इदं भागवतं नाम फलं मुहुः पिबत॥ ननु त्वगष्ट्यादिकं विहाय फला
द्रसः पीयते कथं फलमेव पातव्यं तत्राह॥ रसं रसरूपं॥ अतस्त्वगष्ट्यादेर्हेयांशस्याभावात्फलमेव कृत्स्नं पिबत॥ अत्र च रसता रूप
विवक्षया॥ स च तस्या विवक्षितत्वात् गुणवचनेऽपि रसशब्दे मतुपः प्राप्त्यभावात्तेन विनैव रसं फलमिति सामानाधिकरण्यं॥ न
नु फलमित्युक्ते पानासंभवो हेयांशप्रसक्तिश्च भवेदिति तन्न रसमित्युक्तेः॥ रसमित्युक्तेपि गलितस्य रसस्य पा
तुमशक्यत्वात्फलमित्युक्तमिति द्रष्टव्यं॥ न च भागवतामृतपानं मोक्षेपि त्याज्यमित्याह॥ आलयं लयो मोक्षः॥ अभिविधा ३
वाकारः॥ लयमभिव्याप्य॥ न हीदं स्वर्गादिसुखवन्मुक्तिरूपे सति॥ किंतु सेव्यत एव॥ वक्ष्यति हि॥ आत्मारामाश्च मुनयो निर्ग्रंथा
अप्युरुक्रमे॥ कुर्वंत्यहैतुकीं भक्तिमित्थंभूतगुणो हरिरिति॥ ३॥

कर्मकांड ज्ञानकांड उपासनाकांड देवताकांड ४

तं पुराणं लरेच ॥ ग्रंथोऽष्टादशसाहस्रो द्वादशस्कंधसंमितः ॥ हयग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा ॥ गायत्र्या च
समारंभस्तद्वै भागवतं विदुः ॥ पद्मपुराणेंऽबरीषं प्रति गौतमवचनं ॥ अंबरीष शुकप्रोक्तं नित्यं भागवतं शृणु पठस्व
स्वमुखेनापि यदिच्छसि भवक्षयमिति ॥ अत एव भागवतं नामान्यदित्यपि न शंकनीयं ॥ १ ॥ इदानीं श्रोतृप्रवर्त्तना
य श्रीभागवतस्य कांडत्रयविषयेभ्यः सर्वशास्त्रेभ्यः श्रैष्ठ्यं दर्शयति ॥ धर्म इति ॥ अत्र श्रीमति सुंदरे भागवते परमो धर्मो निरूप्य
ते ॥ परमत्वे हेतुः ॥ प्रकर्षेण उज्झितं कैतवं फलाभिसंधिलक्षणं कपटं यस्मिन्सः ॥ प्रशब्देन मोक्षाभिसंधिरपि निरस्तः ॥ के
वलमीश्वराराधनलक्षणो धर्मो निरूप्यत इति ॥ अधिकारितोऽपि धर्मस्य परमत्वमाह ॥ निर्मत्सराणां ॥ परस्योत्कर्षासहनं म

धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनं ॥ श्री
मद्भागवते महामुनिकृते किं वा परैरीश्वरः सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् ॥ २ ॥

त्सरस्तद्रहितानां ॥ सतां भूतानुकंपिनां ॥ एवं कर्मकांडविषयेभ्यः शास्त्रेभ्यः श्रैष्ठ्यमुक्तं ॥ ज्ञानकांडविषयेभ्योऽपि श्रैष्ठ्यमाह ॥ वेद्य
मिति ॥ वास्तवं परमार्थभूतं वस्तु वेद्यं ॥ न तु वैशेषिकाणामिव द्रव्यगुणादिरूपं ॥ यद्वा ॥ वास्तवशब्देन वस्तुनोंऽशो जीवः वस्तुनः शक्तिर्मा
या च वस्तुनः कार्यं जगच्च तत्सर्वं वस्त्वेव न ततः पृथगिति वेद्यं ॥ अयत्नेनैव ज्ञातुं शक्यं ततः किमत आह ॥ शिवदं परमसुखदं किंच ॥
आध्यात्मिकादितापत्रयोन्मूलनं च ॥ अनेन ज्ञानकांडविषयेभ्यः श्रैष्ठ्यं दर्शितं ॥ काम्यतोऽपि श्रैष्ठ्यमाह ॥ महामुनिः श्रीनारायणः
तेन प्रथमं संक्षेपतः कृते ॥ देवताकांडविषयगतेः श्रैष्ठ्यमाह ॥ परैः शास्त्रैस्तदुक्तसाधनैर्वेश्वरो हृदि किं वा सद्य एवावरुध्यते स्थिरीक्रिय
ते वा शब्दः कटाक्षे किंतु विलंबेन कथंचिदेव ॥ अत्र तु शुश्रूषुभिः श्रोतुमिच्छद्भिरेव तत्क्षणादेवावरुध्यते ॥ इदमेव तेन हि ॥ किमि

० भा० प्र० प्रातःकाले हुता एव हुता अग्नयो यैस्ते । अनेन नित्यनैमित्तिकहोमसाकल्यं दर्शितं । इदं वक्ष्यमाणं । आदरात्पप्रच्छुः ॥ ५ ॥ वि
४ विवक्षितानर्थान्वक्तुं सूतस्य सर्वशास्त्रज्ञानातिशयमाहुः । त्वयेति त्रिभिः श्लोकैः । इतिहासो महाभारतादिः तत्स
हितानि । न केवलमधीतानि । अपितु । आख्यातान्यपि । व्याख्यातानि च उत अपि । यानि धर्मशास्त्राणि तान्यपि
हि । किंच । यानीत्यादि । विदां विदुषां मध्ये श्रेष्ठः व्यासः यानि वेद । परावरे सगुणनिर्गुणे ब्रह्मणी विदंतीति तथा ॥ ७ ॥ वे

त एकदा तु मुनयः प्रातर्हुतहुताग्नयः । सत्कृतं सूतमासीनं पप्रच्छुरिदमादरात् ॥ ५ ॥ ऋषय
ऊचुः । त्वया खलु पुराणानि सेतिहासानि चानघ । आख्यातान्यप्यधीतानि धर्मशास्त्राणि यान्युत ॥ ६ ॥
यानि वेदविदां श्रेष्ठो भगवान्बादरायणः । अन्ये च मुनयः सूत परावरविदो विदुः ॥ ७ ॥ वेत्थ त्वं सौम्य तत्सर्वं त
त्त्वतस्तदनुग्रहात् । ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत ॥ ८ ॥ तत्र तत्रांजसायुष्मन्भवता यद्विनि
श्चितं । पुंसामेकांततः श्रेयस्तन्नः शंसितुमर्हसि ॥ ९ ॥ प्रायेणाल्पायुषः सभ्य कलावस्मिन्युगे ज
नाः । मंदाः सुमंदमतयो मंदभाग्या ह्युपद्रुताः ॥ १० ॥

त्थ जानासि । सौम्य हे साधो तेषामनुग्रहात् तत्त्वतो ज्ञाने हेतुमाहुः । ब्रूयुरिति स्निग्धस्य प्रेमवतः । अत एव रहस्यमपि
ब्रूयुरेव ॥ ८ ॥ अंजसा अंगार्जवेन । एकांततः श्रेयः अव्यभिचारि श्रेयःसाधनं ॥ ९ ॥ अन्येऽपि च कुतः कालेन बहुशास्त्र ॥ ४ ॥
श्रवणादिभिर्विनिश्चिन्वंतु नेत्याहुः । प्रायेणेति हे सभ्य साधो अस्मिन्युगे कलौ अल्पायुषो जनाः । तत्रापि मंदाः अ
लसाः । तत्रापि सुमंदमतयः । तत्रापि मंदभाग्याः विघ्नाकुलाः । तत्रापि उपद्रुताः रोगादिभिः ॥ १० ॥ ९ ॥ ७ ॥

तदेवमनेनश्लोकत्रयेणविशिष्टेष्टदेवतानुस्मरणपूर्वकं । प्रारिप्सितस्यशास्त्रस्यविषयप्रयोजनासंबंधाधिकारि
णांवैशिष्ट्यंसुखसेव्यत्वेनचश्रोतॄनभिमुखीकृत्यशास्त्रमारभते । नैमिषइति । ब्रह्मणाविसृष्टस्यमनोमयस्यचक्र
स्यनेमिःशीर्यतेकुंठीभवतियत्रतन्नैमिषं निमिषमेववानैमिषं । तथाचवायवीये । एतन्मनोमयंचक्रंमयासृष्टंविसृज्यते
यत्रास्यशीर्यतेनेमिःसदेशस्तपसःशुभः इत्युक्त्वासूर्यसंकाशंचक्रंसृष्ट्वामनोमयं । प्रणिपत्यमहादेवंविससर्जपि
तामहः । तेपिहृष्टतराविप्राःप्रणम्यजगतांप्रभुं । प्रययुस्तस्यचक्रस्ययत्रनेमिर्व्यशीर्यत । तद्वनंतेननविख्यातंनैमिषं
मुनिपूजितमिति । नैमिषइतिपाठे वराहपुराणोक्तंद्रष्टव्यं । तथाहि । गौरमुखमृषिंप्रतिभगवद्वाक्यं । एवंकृत्वाततो

नैमिषेनिमिषक्षेत्रेऋषयःशौनकादयः । सत्रंस्वर्गायलोकायसहस्रसममासत ॥ ४ ॥

देवोमुनिंगौरमुखंतदा । उवाचनिमिषेणेदंनिहतंदानवंबलं । अरण्येस्मिंस्ततस्त्वेतन्नैमिषारण्यसंज्ञितं । भ
विष्यतियथार्थंवैब्राह्मणानांविशेषकमिति । अनिमिषःश्रीविष्णुः । अलुप्तदृष्टित्वात् । तस्यक्षेत्रे । तथाचात्रैवशौ
नकादिवचनं । क्षेत्रेस्मिन्वैष्णवेवयमिति । स्वःस्वर्गेगीयतइतिस्वर्गायोहरिः सएवलोकोभक्तानांनिवा
सस्थानंतस्मैतत्प्राप्तयेइत्यर्थः । सहस्रंसमाःसंवत्सराः । अनुष्ठानकालोयस्यतत्सत्रं । सत्रसंज्ञकंकर्मैहि
ष्यआसतउपविविशुः । यद्वा । आसतअकुर्वतइत्यर्थः । आलभतनिर्वपति । उपयंतीत्यादिवत्प्रत्ययोच्चा
रणमात्रार्थत्वेनासधात्वर्थस्याविवक्षितत्वात् ॥ ४ ॥ श्रीहरयेपरमात्मनेपुरुषायनमइतिपरमात्मनेनमः

उपवेशनेइत्यस्य १

भा० प्र० किंच॥ यस्य पादः संश्रयो येषां॥ अत एव प्रशमोऽयनं वर्त्म॥ आश्रयो वा येषां ते मुनयः उपस्पृष्टाः संनिधि
॥५॥ मात्रेण सेविताः सद्यः पुनंति॥ स्वर्धुनी गंगा तस्या आपस्तु तस्या द्रान्निः स्नाताः न तु तचैवति ष्ठेति॥ अतस्तत्सं
वंधेन पुनंत्योपि॥ अनुसेवया पुनंति॥ न सद्य इति॥ मुनीनामुत्कर्षोक्तिः॥ १५॥ पुण्यश्लोकैरीड्यानि स्तव्या

यत्पादसंश्रयाः सूत मुनयः प्रशमायनाः॥ सद्यः पुनंत्युपस्पृष्टाः स्वर्धुन्यापोनुसेवया॥ १५
को वा भगवतस्तस्य पुण्यश्लोकेड्यकर्मणः॥ शुद्धिकामो न शृणुयाद्यशः कलिमलापहम्॥ १६ ५
तस्य कर्माण्युदाराणि परिगीतानि सूरिभिः॥ ब्रूहि नः श्रद्दधानानां लीलया दधतः कलाः॥ १७
अथाख्याहि हरेर्धीमन्नवतारकथाः शुभाः॥ लीला विदधतः स्वैरमीश्वरस्यात्ममायया॥ १८

नि कर्माणि यस्य॥ तस्य यशः॥ कलिमलापहं॥ संसारदुःखोपनाशनं॥ १६॥ प्रश्नांतरं॥ तस्येति॥ उदार
णि महांति विश्वसृष्ट्यादीनि सूरिभिर्नारदादिभिः कलाः ब्रह्मरुद्रादिमूर्त्तीः॥ १७॥ अथेति प्रश्नांतरे॥ अवतारकथाः ॥ ५॥
स्थित्यर्थमेव तत्तदवसरे ये मत्स्याद्यवताराः॥ तदाश्रयाः कथाः॥ स्वैरं लीलाः कुर्वतः॥ १८॥ राम राम राम राम राम श्री राम

व

नचैंदुःशास्त्रश्रवणेपितावत्तैवफलसिद्धिरित्याहुः॥ भूरीणिकर्माणिअनुष्ठानानियेषुतानि॥ समुद्धृत्य ये
नउद्धृतवचनेन॥ आत्माबुद्धिःसंप्रसीदतिसम्यगुपशाम्यति॥ ११॥ प्रस्तुतांतरंसूतजानासीतिपंचभिः॥ भद्रंत
इत्यौत्सुक्येनाशीर्वादः॥ भगवान्निरतिशयैश्वर्य्यादिगुणः सात्वतां सच्छब्देनसत्वमूर्त्तिर्भगवान्सउपा
स्यतयाविद्यतेयेषाम्॥ इतिसत्वंतोभक्ताः॥ स्वार्थेऽण्॥ णइत्सवायसादिवत्॥ तेस्यचाश्रवणमार्षंत

भूरीणिभूरिकर्माणिश्रोतव्यानिविभागशः॥ अतःसाधोऽत्रयत्सारंसमुद्धृत्यमनीषया
ब्रूहिनःश्रद्दधानानांयेनात्मासंप्रसीदति॥ ११॥ सूतजानासिभद्रंतेभगवान्सात्वतांपतिः॥
देवक्यांवसुदेवस्यजातोयस्यचिकीर्षया॥ १२॥ तन्नःशुश्रूषमाणानामर्हस्यंगानुवर्णि
तुं॥ यस्यावतारोभूतानांक्षेमायचभवायच॥ १३॥ आपन्नःसंसृतिंघोरांयन्नामविवशोगृणन्
॥ ततःसद्योविमुच्येतयद्बिभेतिस्वयंभयं॥ १४॥ ॥ ॥ ॥ ऽऽ ॥०॥

देवंसात्वंतइतिभवति॥ तेषांपतिःपालकः॥ यस्यार्थविशेषस्यचिकीर्षयावसुदेवस्यभार्य्यायांदेवक्यांजातः
१२॥ अंगहेसूत॥ तन्नोवर्णयितुमर्हसि॥ सामान्यतस्तावद्यस्यावतारोभूतानांक्षेमायपालनाय॥ भवायसमृद्धये॥ १३॥ तत्प्र
भावमनुवर्णयेतस्तद्यशःश्रवणोत्सुकामाविष्कुर्वंति॥ आपन्नइतित्रिभिः॥ संसृतिमापन्नःप्राप्तः॥ विश[illegible]पि॥ ततःसं

व १

[illegible]

भा० प्र० ॥ ६ ॥

अस्मिंश्च समये त्वद्दर्शनमीश्वरेणैव संपादितमिति ॥ अभिनंदति त्वमिति ॥ कलिं निस्तरितुमिच्छतां
अर्णवं तितीर्षतां ॥ कर्णधारेणाविकरूप ॥ २२ ॥ पुनः प्रश्नांतरं ब्रूहीति ॥ धर्मस्य वर्म्मणि कवचवद्रक्ष
के स्वांकाष्ठां मर्यादाम् ॥ स्वरूपमित्यर्थः ॥ अस्य चोत्तरम् ॥ कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सहे

त्वं नः संदर्शितो धात्रा दुस्तरं निस्तितीर्षतां ॥ कलिं सत्त्वहरं पुंसां कर्णधार इवार्णवं ॥ २२ ॥
ब्रूहि योगेश्वरे कृष्णे ब्रह्मण्ये धर्मवर्मणि ॥ स्वां काष्ठामधुनोपेते धर्मः कं शरणं गतः ॥
२३ ॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां प्रथमस्कंधे
नैमिषीयोपाख्याने प्रथमोऽध्यायः ॥ १ ॥ व्यास उवाच ॥ इति संप्रश्नसंहृष्टो विप्रा
णां रोमहर्षणिः ॥ प्रतिपूज्य वचस्तेषां प्रवक्तुमुपचक्रमे ॥ १ ॥ श्रीहरये नमो नमः

प्र १

ति अयं श्लोकः ॥ २३ ॥ इति प्र मे प्रथमोऽध्यायः ॥ १ ॥ तदेवं प्रथमेऽध्याये षट् प्रश्ना मुनिभिः कृताः ॥ द्वितीये त ॥ ६ ॥
त्तरं सूत श्चतुर्णामाह तत्र प्रथ ॥ १ ॥ विप्राणामिति ॥ एवंभूतैः सम्यक्प्रश्नैः संप्रहृष्टः रोमहर्षणस्य
पुत्रः उग्रश्रवाः तेषां वचः प्रतिपूज्य सत्कृत्य प्रवक्तुमुपक्रांतवान् ॥ १ ॥ रामराम रामराम राम ॥

श्रेयस्कांतिकं सर्वं प्रशास्त्रसारं ततः परं सूत जानासि तस्पाथा ऽ आख्याहि श्रीकृष्णकर्म च ब्रूहि योगेश्वरे कृष्णे सूतं सत्कृत्य सादरं इत्येते प्रथमेऽध्याये

षट्प्रश्ना मु निभिः कृताः

श्रीकृष्णस्यावतारप्रयोजनप्रश्नेनैव तच्चरितप्रश्नोऽपि ज्ञात एवेति ज्ञातव्यं ॥ एवमत्यौत्सुक्येन पुनरपि तच्चरितान्येव
श्रोतुमिच्छंतस्तत्रात्मनस्तृप्त्यभावमावेदयंति ॥ वयंत्विति ॥ योगयागादिषु तृप्ताः स्म उद्गछति तमो यस्मात्स उत्तमस्त
याम्नातः श्लोको यशो यस्य तस्य विक्रमे तु विशेषेण न तृप्यामः ॥ अलमिति न मन्यामहे ॥ तत्र हेतुः ॥ यद्विक्रमं शृण्वतां ॥ य
द्वा अन्ये तृप्यंतु नाम वयं तु नेति ॥ तृप्त्यभावस्यान्वयः ॥ अयमर्थः ॥ त्रिधा ह्यलंबुद्धिर्भवति ॥ उदरादिभरणेन वा ॥ रसाज्ञाने
न वा ॥ स्वादुविशेषाभावाद्वा ॥ तत्र शृण्वतामित्यनेन श्रोत्रस्याकाशत्वान्न भरणमित्युक्तं ॥ रसज्ञानामित्यनेन चाज्ञान

वयंतु न वितृप्याम उत्तमश्लोकविक्रमे ॥ यच्छृण्वतां रसज्ञानां स्वादु स्वादु पदे पदे ॥ १९ ॥
कृतवान् किल वीर्याणि सह रामेण केशवः ॥ अतिमर्त्यानि भगवान् गूढः कपटमानुषः ॥ २० ॥
कलिमागतमाज्ञाय क्षेत्रेऽस्मिन्वैष्णवे वयं ॥ आसीना दीर्घसत्रेण कथायां सक्षणा हरेः ॥ २१ ॥

तः पशुवत्तृप्तिर्निराकृता ॥ इक्षुभक्षणवद्रसांतराभावेन तृप्तिं निराकरोति ॥ पदे पदे प्रतिक्षणं स्वादुतोऽपि
स्वादुः ॥ १९ ॥ अतः कृष्णचरित्राणि कथयेत्याशयेनाह ॥ कृतवानिति ॥ अतिमर्त्यानि मर्त्यानतिक्रांतानि
गोवर्द्धनोद्धरणादीनि मनुष्येष्वसंभावितानीत्यर्थः ॥ २० ॥ ननु याजनाध्यापनादिव्यग्राणां कुत एतच्छ्रवणावका
शः स्यात् ॥ अत आह ॥ कलिमागतं ज्ञात्वा तद्भिया विष्णुपदं गंतुकामाः दीर्घसत्रेण निमित्तेनात्रासीनाः हरेः कथायां
सक्षणाः लब्धावसराः ॥ २१ ॥ ॥ ० ॥

: कृता

येनप्रश्नेनात्मामनश्चाशुप्रसीदति ३

भा० प्र० एवं द्वाभ्यां गुरुं नमस्कृत्य । देवं प्रणमति । जयत्यनेन संसारमिति जयो ग्रंथः तमुदीरयेदिति । स्वयं
७ तथोदीरयन् । अन्यान् पौराणिकानुपसिक्षयति ॥ ४ ॥ तेषां वचः प्रतिपूज्येति यदुक्तं तत्प्रतिपूजनं करोति
हे मुनयः साधु यथा भवति तथाहं पृष्टः । यतो लोकानां मंगलमेतत् । यतः कृष्णविषयः संप्रश्नः कृतः । सर्व
शास्त्रार्थसारोद्धारप्रश्नस्यापि कृष्णे पर्यवसानादेवमुक्तं ॥ ५ ॥ तत्र यत्प्रथमं पृष्टं । सर्वशास्त्रसारमेकां

नारायणं नमस्कृत्य नरं चैव नरोत्तमं । देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ ४ ॥
सूत उवाच । मुनयः साधु पृष्टोहं भवद्भिर्लोकमंगलं । यत्कृतः कृष्णसंप्रश्नो येनात्मा
सुप्रसीदति ॥ ५ ॥ स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे । अहैतुक्यप्रतिहता
ययात्मा संप्रसीदति ॥ ६ ॥

तिकं श्रेयो ब्रूहीति । तत्रोत्तरम् । स वै पुंसामिति । अयमर्थः । धर्मो हि द्विविधः । प्रवृत्तिलक्षणो निवृ
त्तिलक्षणश्च । तत्र यः स्वर्गाद्यर्थः प्रवृत्तिलक्षणः सोऽपरः । यतस्तु धर्मा श्रवणादरादिलक्षणा भक्ति
र्भवति स परो धर्मः । स एवैकांतिकं श्रेय इति । कथंभूता । अहैतुकी । हेतुः फलानुसंधानं तद्रहिता ॥ ७ ॥
अप्रतिहता । विघ्नैरनभिभूता ॥ ६ ॥ तद्व्यतिरिक्तः ३

प्रवचनस्योपक्रमो नाम गुरुदेवतानमस्कार इति तं समाह त्रिभिः ॥ यमिति ॥ तत्र स्वगुरोः शुकस्यैश्वर्यं तच्चरि
तेनैव द्योतयन्नाह ॥ यं प्रव्रजंतं संन्यस्य गच्छंतं ॥ अनुपेतमामुपनयत्वेतु उपनयनार्थमनुपसन्नं ॥ यद्वा ॥ केनाप्य
नुपेतं ॥ अननुगतमेकाकिनमित्यर्थः ॥ तत्र हेतुः ॥ अपेतकृत्यं कृतमन्यं कर्ममार्गेऽप्रवर्त्तमानेनैष्ठिकत्वात् ॥ द्वै
पायनो व्यासः ॥ विरहात्कातरो भीतः पुत्र इति स्नेहेनाजुहाव ॥ आहूतवान् ॥ हूरादाह्वाने प्लुतेसत्यपि संधिरार्षः ॥ तदा तन्म
यतया शुकरूपतया तरवोऽभिनेदुः ॥ प्रत्युत्तरमुक्तवंतः ॥ पितुः स्नेहानुबंधपरिहाराय यो वृक्षरूपेणोत्तरं दत्तवानि

सूत उवाच ॥ यं प्रव्रजंतमनुपेतमपेतकृत्यं द्वैपायनो विरहकातर आजुहाव ॥ पुत्रेति त
न्मयतया तरवोऽभिनेदुस्तं सर्वभूतहृदयं मुनिमानतोऽस्मि ॥ २ ॥ यः स्वानुभावमखिलश्रु
तिसारमेकमध्यात्मदीपमतितितीर्षतां तमोंधं ॥ संसारिणां करुणयाह पुराणगुह्यं तं
व्यासस्नुमुपयामि गुरुं मुनीनां ॥ ३ ॥

त्यर्थः ॥ तं मुनिमानतोऽस्मि ॥ तन्मयत्वोपपादनाय विशेषणं ॥ सर्वभूतानां हृन्मनः ॥ आश्रयत्वे योगबलेन प्रविश
तीति सर्वभूतहृदयस्तम् ॥ २ ॥ तत्कृपालुतां दर्शयन्नाह ॥ य इति ॥ अंधं गाढं तमः संसाराख्यं अतितरितुमिच्छतां ॥ पु
राणगुह्यं पुराणानां मध्ये गुह्यं गोप्यं ॥ तत्र हेतुत्वेन चत्वारि विशेषणानि ॥ स्वः निजः ॥ असाधारणः अनुभावः प्र
भावो यस्य तत् स्वानुभावं ॥ अखिलश्रुतीनां सारं ॥ एकमद्वितीयं ॥ अनुपममित्यर्थः ॥ आत्मानं कार्यकारणसंघात
मधिकृत्य वर्तमानमात्मतत्त्वमध्यात्मं तस्य दीपं ॥ साक्षात्प्रकाशकं ॥ उपयामि ॥ शरणं व्रजामि ॥ ३ ॥ राम राम राम राम

भा० प्र० तदेवंहरिभक्तिद्वारएतदितरवैराग्यात्मज्ञानपर्यंतः परोधर्मइत्युक्तं ॥ अन्येतुमन्यंते ॥ धर्मस्यार्थः फ प२
८ लं ॥ तस्यचकामःफलं ॥ तस्यचेंद्रियप्रीतिलाभःफलं ॥ तत्प्रीतेश्चपुनरपिधर्मार्थादिपरंपरेति ॥ तथाहुः
धर्मादर्थश्चकामश्चसकिमर्थंनसेव्यतइत्यादि ॥ तन्निराकरोति ॥ धर्मस्येतिद्वाभ्यां ॥ आपवर्ग्यस्यउक्तन्या
येन ॥ अपवर्गपर्यंतस्य ॥ अर्थायफलत्वाय ॥ अर्थोनोपकल्पते ॥ योग्योनभवति ॥ तथार्थस्याप्येवंभूतधर्मा
श्लो१ व्यभिचारिणः कामोलाभायफलत्वायनहिस्मृतोमुनिभिः ॥ ९ ॥ कामस्यविषयभोगस्यचइंद्रियप्रीतिला

धर्मस्यह्यापवर्ग्यस्यनार्थोर्थायोपकल्पते ॥ नार्थस्यधर्मैकांतस्यकामोलाभायहिस्मृतः ॥ ९ ॥
कामस्यनेंद्रियप्रीतिर्लाभोजीवेतयावता ॥ जीवस्यतत्त्वजिज्ञासानार्थोयश्चेहकर्मभिः ॥ १० ॥ व
दंतितत्तत्त्वविदस्तत्त्वंयज्ज्ञानमद्वयं ॥ ब्रह्मेतिपरमात्मेतिभगवानितिशब्द्यते ॥ ११ ॥ ॥ श्री ॥

भःफलंनभवति किंतुयावताजीवेत्तावानेवकामस्यलाभः जीवनपर्याप्तएवकामःसेव्यइत्यर्थः ॥ जीवस्यजी
वनस्यचपुनः कर्मानुष्ठानद्वाराकर्मभिर्यइहप्रसिद्धः स्वर्गादिः सोर्थोनभवति ॥ किंतुतत्त्वजिज्ञासैवेति ॥ १० ॥
ननुचतत्त्वजिज्ञासानामधर्मजिज्ञासैव ॥ धर्मएवहितत्त्वमितिकेचित् ॥ तत्राह ॥ तत्त्वविदस्तुतदेवतत्त्वंवदंति
किंतत् ॥ यज्ज्ञानंनामअद्वयमिति ॥ क्षणिकविज्ञानपक्षंव्यावर्तयति ॥ ननुतत्त्वविदोपिविगीतवचनाएवने ॥८॥
वं ॥ तस्यैवतत्त्वस्यनामांतरैरभिधानादित्याह ॥ औपनिषदैर्ब्रह्मेति हैरण्यगर्भैः परमात्मेति ॥ सात्वतैर्भगवानिति

श्रीधरी १८

निष्कामेन

ननुतमेतमात्मानंवेदानुवचनेनब्राह्मणाविविदिषंति।यज्ञेनदानेनतपसानाशकेनेत्यादिश्रुति
भ्योधर्मस्यज्ञानांगत्वंप्रसिद्धं।तत्कुतोभक्तिहेतुत्वमुच्यते।सत्यं।तत्तुभक्तिद्वारेणेत्याह।वासुदेव
इति।अहैतुकं।शुष्कतर्काद्यगोचरं।औपनिषदमित्यर्थः ७ व्यतिरेकमाह।धर्मइति।योधर्मइ
तिप्रसिद्धः।सयदिविष्वक्सेनस्यकथासुरतिंनोत्पादयेत्।तर्हिस्वनुष्ठितोपिसन्नयंश्रमोज्ञेयः

वासुदेवेभगवतिभक्तियोगःप्रयोजितः।जनयत्याशुवैराग्यंज्ञानंयत्तदहै
तुकं।७।धर्मःस्वनुष्ठितःपुंसांविष्वक्सेनकथासुयः।नोत्पादयेद्यदिरतिं
श्रमएवहिकेवलम्।८।

ननुमोक्षार्थस्यापिधर्मस्यश्रमत्वमस्त्येव।अतआह।केवलंविफलश्रमइत्यर्थः।नन्वस्ति।तत्रा
पिस्वर्गादिफलमित्याशंक्यैवकारेणनिराकरोति।क्षयिष्णुत्वान्नतत्फलमित्यर्थः।नन्वक्षय्यंहवै
चातुर्मास्ययाजिनःसुकृतंभवतीत्यादिश्रुतेः।नतत्फलस्यक्षयिष्णुत्वमित्याशंक्याहिशब्देनसाधयति।तद्य
थेहकर्मजितोलोकःक्षीयतेएवमेवामुत्रपुण्यजितोलोकःक्षीयतइतितर्कोपबृंहितयाश्रुत्याक्षयिष्णुत्वप्रति

ननुसत्यमेवकर्मनिर्मूलिनीहरिकथारतिस्तथापितस्यांरुचिर्नोत्पद्यतेकिंकुर्मः तत्राह शुश्रूषोरित्ति पु
भा॰ प्र॰ ण्यतीर्थनिषेवणादिभिर्निष्पापस्यमहत्सेवास्यात् तयाचतद्धर्मश्रद्धा ततःश्रवणेच्छाततोरुचिःस्यादित्य
६ र्थः १६ ततश्चस्वकथांशृण्वतामिति पुण्येश्रवणकीर्तनेयस्यसः सतांसुहृत्हितकारी हृदिस्थितोऽभद्राणिका

शुश्रूषोःश्रद्दधानस्यवासुदेवकथारुचिः स्यान्महत्सेवयाविप्राःपुण्यतीर्थनिषेवणात्
१६ शृण्वतांस्वकथांकृष्णःपुण्यश्रवणकीर्तनः हृद्यन्तःस्थोह्यभद्राणिविधुनोतिसुहृत्सतां १७
नष्टप्रायेष्वभद्रेषुनित्यंभागवतसेवया भगवत्युत्तमश्लोकेभक्तिर्भवतिनैष्ठिकी १८ तदार
जस्तमोभावाःकामलोभादयश्चये चेतएतैरनाविद्धंस्थितंसत्त्वेप्रसीदति १९ एवंप्रसन्न
मनसोभगवद्भक्तियोगतः भगवत्तत्त्वविज्ञानंमुक्तसंगस्यजायते २० ॥ ❀ ❀ ॥

मादिवासनाः तानि अंतस्थः हृदयस्थःसन् १७ ततश्चनष्टप्रायेष्विति सर्वाभद्रनाशस्यज्ञानोत्तरकाल
त्वात्प्रायग्रहणंभागवतानां भागवतशास्त्रस्यवासेवया नैष्ठिकीनिश्चलाअविक्षेपकाभावात् १८ रजश्च ॥६॥
तमश्चयेचतत्प्रभावाःभावाःकामादयः एतैरनाविद्धं अनभिभूतंप्रसीदति उपशाम्यति १९ भगवद्भक्ति
योगतःप्रसन्नमनसः अतएवमुक्तसंगस्य २०

तच्चतत्त्वंसपरिकरयाभक्त्यैवप्राप्यतइत्याह तच्छ्रेत्यन्वयः ज्ञानवैराग्ययुक्तयेत्यत्रज्ञानंपरोक्षंततश्चतत्त्वंआ
त्मनिचेत्यत्रत्तेपश्यंति किंतत् आत्मानंपरमात्मानं श्रुतेनवेदांतादिश्रवणेनगृहीतया प्रापितयेतिभक्तेर्द्राढ्यमुक्तं
१२ धर्मस्यफलंभक्तिः नार्थकामादिकमितीममर्थमुपपाद्योपसंहरति अतइति हेद्विजश्रेष्ठाः हरितोषणं
हरेराराधनं संसिद्धिफलं १३ यस्माच्चभक्तिविहीनोधर्मः केवलंश्रमएव तस्माद्भक्तिप्रधानएवधर्मोनुष्ठेय

तच्छ्रद्दधानामुनयोज्ञानवैराग्ययुक्तया पश्यंत्यात्मनिचात्मानंभक्त्याश्रुतगृहीतया १२ अ
तःपुंभिर्द्विजश्रेष्ठावर्णाश्रमविभागशः स्वनुष्ठितस्यधर्मस्यसंसिद्धिर्हरितोषणं १३ तस्मादे
केनमनसाभगवान्सात्वतांपतिः श्रोतव्यःकीर्तितव्यश्चध्येयःपूज्यश्चनित्यदा १४ यदनु
ध्यासिनायुक्ताःकर्मग्रंथिनिबंधनम् छिंदंतिकोविदास्तस्यकोनकुर्यात्कथारतिम् १५

प्रपंचयितुं
इत्याह तस्मादिति एकेन एकाग्रेणमनसा १४ भक्तिरहितोधर्मः केवलंश्रमएवेतिप्रपंचितम्
इदानींतु भक्तेर्मुक्तिफलत्वंप्रपंचयति यदिति यस्यानुध्या अनुध्यानंसैवासिः खड्गः तेनयुक्ताः विवे
किनोग्रंथिम् अहंकारं निबध्नातियत्कर्मतच्छिंदंति तस्यकथायांरतिंकोनकुर्यात् १५ छ छ श्रीए

उपाधिवैशिष्ट्येन फलवैशिष्ट्यं सदृष्टांतमाह पार्थिवात्स्वतःप्रवृत्तिप्रकाशरहितात् दारुणः काष्ठा

त्काष्ठसकाशात् धूमः प्रवृत्तिस्वभावस्त्रयीमयः वेदोक्तकर्मप्रचुरः ईषत्कर्मप्रत्यासत्तेः तस्मादपि अ
ग्निस्त्रयीमयः साक्षात्कर्मसाधनत्वात् एवं तमसः सकाशाद्रजो ब्रह्मदर्शनं ब्रह्मप्रकाशकं तुशब्देन
लयात्मकात्तमसः सकाशाद्रजसः सोपाधिकज्ञानहेतुत्वेन किंचिद्ब्रह्मदर्शनप्रत्यासंनिधिमात्रमुक्तं न तु स
र्वथा तत्प्रकाशकत्वं विक्षेपकत्वात् यत्सत्वं तत्साक्षाद्ब्रह्मदर्शनं अतस्तत्र गुणोपाधीनां ब्रह्मादीनामपि

पार्थिवाद्दारुणो धूमस्तस्मादग्निस्त्रयीमयः तमसस्तु रजस्तस्मात्सत्वं यद्ब्रह्मदर्शनं
२४ भेजिरे मुनयो थाग्रे भगवंतमधोक्षजं सत्वं विशुद्धं क्षेमाय कल्पंते येनु तानिह २५
मुमुक्षवौ रूपान् हित्वा भूतपतीनथ नारायणकलाः शांता भजंति ह्यनसूयवः २६
घो १

यथोत्तरं वैशिष्ट्यमिति भावः २४ वासुदेवभक्तौ पूर्वाचारं प्रमाणयति भेजिर इति अथातो हेतोः अग्रे
पुरा विशुद्धसत्वमूर्तिं भगवंतं अधोक्षजं अतो ये तान् मुनीननुवर्तंते ते इह संसारे क्षेमाय कल्पंते २५॥ ॥१०॥
ननु अन्यानपि केचिद्भजंतो दृश्यंते सत्यं मुमुक्षवस्तु अन्यान्न भजंति किंतु सकामा एवेत्याह मुमुक्षव इति
घोररूपां भूतपतीनिति पितृप्रजेशादीनां उपलक्षणं अनसूयवो देवतांतराणि निंदकाः संतः २६॥ ॥

ज्ञानफलमाह भिद्यतइति हृदयमेवग्रंथिः चिज्जडग्रंथनरूपोऽहंकारः अतएवसर्वेसंशयाः अ
संभावनादिरूपाः कर्माण्यनारब्धफलानि आत्मनिस्वरूपभूतेईश्वरे दृष्टेएवकारेणज्ञानानंतरमेवेति
दर्शयति २१ अत्रसदाचारंदर्शयन्नुपसंहरति अतइति आत्मनःप्रसादनीं मनःशोधिनीं

भिद्यतेहृदयग्रंथिश्छिद्यंतेसर्वसंशयाः क्षीयंतेचास्यकर्माणिदृष्टएवा
त्मनीश्वरे २१ अतोवैकवयोनित्यंभक्तिंपरमयामुदा वासुदेवेभ
गवतिकुर्वंत्यात्मप्रसादनीं २२ सत्वंरजस्तमइतिप्रकृतेर्गुणास्तैर्युक्तःप
रःपुरुषएकइहास्यधत्ते स्थित्यादयेहरिविरिंचिहरेतिसंज्ञाःश्रेयांसितत्र
खलुसत्वतनोर्नृणांस्युः २३

वासुदेवेभक्तिंकुर्वंतीतिभजनीयविशेषोदर्शितः २२ तदेवमुपपादयितुंब्रह्मादीनांत्रयाणा
मेकात्मत्वेपिवासुदेवस्याधिक्यमाह सत्वमिति इहयद्यप्येकएवपरःपुमान् अस्यविश्वस्यस्थि
त्यादयेस्थितिसृष्टिप्रलयार्थंसंज्ञाकेवलंभिन्नाधत्ते हरिविरिंचिहरइतिवक्ष्येसंधिरार्षः तत्रतेषांम
ध्येश्रेयांसिशुभफलानिसत्वतनोर्वासुदेवादेवस्युः २३

भा० प्र० ननु जगत्सर्गप्रवेशनियमनादिलीलायुक्ते वस्तुनि सर्वशास्त्रसमन्वयो दृश्यते कथं वासुदेवपरत्वं स
११ र्वस्य तत्राह स एवेति चतुर्भिः एतैरेव श्लोकैः तस्य कर्माण्युदाराणि ब्रूहीति प्रश्नस्योत्तरं सदसद्रूपया
कार्यकारणात्मिकया अगुणश्चेत्यन्वयः स्वतो निर्गुणोपि सन्नित्यर्थः ३० भगवतो जगत्कारण
त्वमुक्त्वा प्रवेशनियमनलक्षणां लीलामाह तयेति विलसितेषु उद्भूतेषु गुणेषु आकाशादिषु अंतः प्रवि
ष्टः सन् गुणवानिव मदधीना एते गुणा इत्यभिमानवानिव न तु वस्तुतस्तथा यतो विज्ञानेन चिच्छक्त्या विजृं

स एवेदं ससर्जाग्रे भगवानात्ममायया सदसद्रूपया चासौ गुणमय्याऽगुणो विभुः ३० त
या विलसितेष्वेषु गुणेषु गुणवानिव अंतःप्रविष्ट आभाति विज्ञानेन विजृंभितः ३१ यथा
ह्यवहितो वह्निर्दारुष्वेकः स्वयोनिषु नानेव भाति विश्वात्मा भूतेषु च तथा पुमान् ३२ अ
सौ गुणमयैर्भावैर्भूतसूक्ष्मेंद्रियात्मभिः स्वनिर्मितेषु निर्विष्टो भुंक्ते भूतेषु तद्गुणान् ३३

वे ४ तोऽस्फूर्जितः अनेकरूपत्वलीलामाह यथेति स्वयोनिषु स्वाभिव्यंजकेषु अवहितो निहितः विश्वात्मा पुमान्
परमेश्वरो भूतेषु प्राणिषु अंतर्यामितयापि प्रतियोनि नानात्वेन नानात्वमेवोच्यते क्षेत्रज्ञरूपेण वा ३२ भोग
रूपां लीलामाह असाविति भूतसूक्ष्माणि च इंद्रियाणि च आत्मा मनश्च तैः स्वयं निर्मितेषु भूतेषु चतुर्विधेष्विति
भोग्यत्वात्तदुपयोगात्तद्गुणान् तत्तदनुरूपान्विषयान् रुच्या भुंक्ते भोजयतीति णिजर्थो वा अंतर्यामितया पालयती ११
वा तदात्मनेपदमार्षं भुजोऽनवन इति स्मरणाच्च ३३ रामराम रामराम रामराम रामरामराम राम॥

रजस्तमसीप्रकृतिःस्वभावोयेषांते अतएवपितृभूतादिभिःसमंशीलंयेषांते श्रियासहऐश्वर्यंप्रजा
श्चईप्सतीतितथाते २७ तत्वतोमोक्षप्रदत्वाद्वासुदेवोभजनीयइत्युक्तंसर्वशास्त्रतात्पर्यगोचरत्वादपी
त्याहद्वाभ्यां वासुदेवपरःतात्पर्यगोचरोयेषांते ननुवेदामखपरादृश्यंतइत्याशंक्य तेपितदाराध
नार्थत्वात्तत्परा एवेत्युक्तं योगायोगशास्त्राणितेषामप्यासनप्राणायामादिक्रियापरत्वमाशंक्यतासाम

रजस्तमःप्रकृतयःसमशीलाभजंतिवै पितृभूतप्रजेशादीन्श्रियैश्वर्यप्रजेप्सवः
२७ वासुदेवपरावेदावासुदेवपरामखाः वासुदेवपरायोगावासुदेवपराःक्रियाः २८
वासुदेवपरंज्ञानंवासुदेवपरंतपः वासुदेवपरोधर्मोवासुदेवपरागतिः २९ ॥

पितत्प्राप्त्युपायत्वात्तत्परत्वमुक्तं २८ ज्ञानंज्ञानशास्त्रं ननुचतज्ज्ञानपरइत्याशंक्यज्ञानस्यापितत्प
रत्वमुक्तं तपोत्रज्ञानंधर्मोधर्मशास्त्रंदानव्रतादिविषयं ननुतत्स्वर्गादिपरमित्याशंक्य गम्यतइतिगतिः
स्वर्गादिफलंसापितदानंदांशरूपत्वात्तत्परैवेत्युक्तं यद्वावेदाइत्यनेनैवतन्मूलत्वात्सर्वाण्यपिशास्त्राणि
वासुदेवपराणीत्युक्तं तत्रननुतेषांमखयोगक्रियादीनांनानार्थपरत्वान्नतदेकपरत्वमित्याशंक्यमखा
दीनामपितत्परत्वमित्युक्तमितिद्रष्टव्यं २९

भा० प्र०
१२

कीदृशं रूपं तदाह यस्येति ननु कीदृशो विग्रहस्तस्य योंभसि शेते स्मात्तदाह तत्तस्य भगवतो रूपं तु विशुद्धं रज आद्यसंभिन्नं अत एवोर्जितं निरतिशयं सत्त्वं ३ एतच्च योगिनां प्रत्यक्षमित्याह पश्यंतीति अदभ्रमनल्पं ज्ञानात्मकं यच्चक्षुस्तेन सहस्रं अपरिमितानि यानि पादादीनि तैरद्भुतं सहस्राणि मूर्द्धादयो यस्मिन् तत्तत् ॥ सहस्राणि यानि मौल्यादीनि तैरुल्लसत् शोभमानं ४ एतत्तु कूटस्थं नत्वन्यावतारवदाविर्भावतिरोभाववदि

यव॰ ।

यस्यावयवसंस्थानैः कल्पितो लोकविस्तरः तद्वै भगवतो रूपं विशुद्धं सत्त्वमूर्जितं ३
पश्यंत्यदो रूपमदभ्रचक्षुषा सहस्रपादोरुभुजाननाद्भुतं सहस्रमूर्द्धश्रवणाक्षि
नासिकं सहस्रमौल्यंबरकुंडलोल्लसत् ४ एतन्नानावताराणां निधानं बीजमव्ययं
यस्यांशांशेन सृज्यंते देवतिर्यङ्नरादयः ५ स एव प्रथमं देवः कौमारं सर्गमाश्रि
तः चचार दुश्चरं ब्रह्मा ब्रह्मचर्यमखंडितं ६

त्याह एतदिति आदिनारायणरूपं निधीयते स्मिन्निति निधानं कार्यावसाने प्रवेशस्थानमित्यर्थः बीजमुद्गमस्थानं बीजत्वेपि नान्यबीजवत्तुल्यं किंत्वव्ययं न केवलमवताराणामेव बीजं किंतु सर्वप्राणिनामपी त्याह यस्यांशो ब्रह्मा तस्यांशो मरीच्यादिस्तेन ५ सनत्कुमाराद्यवतारांस्तच्चरितं चाह स एवेति कौमारमा र्षः प्राजापत्यो मानवइत्यादीनि सर्गविशेषनामानि यः पौरुषं रूपं जगृहे स एव देवः कौमाराख्यं सर्गमाश्रितः सन्ब्र १२

ह्माब्राह्मणोभूत्वाब्रह्मचर्यंचचार ६

इदानीं सूत जानासीति प्रश्नोत्तरमाह भावयतीति पालयति एतत्तु सर्वावतारसाधारणं प्रयोजनं विशेषतः कृष्णावता
रस्य प्रयोजनं कुंतीस्तुतौ वक्ष्यते लोकभावनः लोककर्त्ता देवादिषु ये लीलावतारास्तेष्वनुरतोऽनुरक्तः ३४ इति प्र
थमे द्वितीयोऽध्यायः ॥२ अवतारकथाप्रश्ने तृतीये तूत्तराभिधा पुरुषाद्यवतारोक्त्या तत्तच्चारित्रवर्णनैः १ यदुक्तं
पा ४ ब्रूहि हरेर्धीमन्नवतारकथाः शुभा इति तदुत्तरत्वेनावताराननुक्रमिष्यन् प्रथमं पुरुषावतारमाह जगृह इ
तिपंचभिः महदादिभिः महदहंकारपंचतन्मात्रैरेकादशेंद्रियाणि पंच महाभूतानीति षोडश कलाः अंशा

भावयत्येष सत्त्वेन लोकान्वै लोकभावनः लीलावतारानुरतो देवतिर्यङ्नरादिषु ३४
इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कंधे द्वितीयोऽध्यायः
२ सूत उवाच जगृहे पौरुषं रूपं भगवान्महदादिभिः संभूतं षोडशकलमादौ लोक
सिसृक्षया १ यस्यांभसि शयानस्य योगनिद्रां वितन्वतः नाभिह्रदांबुजादासीद्ब्रह्मा वि
श्वसृजां पतिः २
यस्मिन् यद्यपि भगवद्विग्रहे नैवंभूतस्तथापि विराड्जीवांतर्यामिणो भगवतो विराड्रूपेणोपासनार्थमेवमुक्तमि
ति द्रष्टव्यं १ कीदृशो भगवानित्यपेक्षायां तं विशिनष्टि यस्यांभसि एकार्णवे शयानस्य विश्वं तस्य तत्र च योगः समा
धिः तद्रूपां निद्रां विस्तारयतः तस्य नाभिरेव ह्रदस्तस्मिन् यदंबुजं तस्मात्स काशते ब्रह्मा आसीदभूत
पाद्ये कल्पे स पौरुषं रूपं जगृहे ॥२॥ श्रीराम राम राम राम श्रीराम राम राम राम राम राम राम राम राम ॥

भा० प्र० दत्तात्रेयावतारमाह षष्ठमिति अत्रेरपत्यत्वं तेनैव वृतः सन् प्राप्तः अत्रेरपत्यमभिकांक्षत आह
१३ तुष्टइतिवक्ष्यमाणत्वात् कथंप्राप्तः अनसूययामत्सदृशापत्यमिच्छेणाहमेवापत्यत्वेन वृतइतिदोष
दृष्टिमकुर्वन्नित्यर्थः आन्वीक्षिकीं आत्मविद्यां प्रह्लादादिभ्यश्च ११ यज्ञावतारमाह सयज्ञः यामाद्यैः स्व
स्यैवपुत्रा यामानामदेवाः तदाद्यैः सह स्वायंभुवमन्वंतरं पालितवान् तदा स्वयमिंद्रोऽभूदित्यर्थः १२ ऋ

षष्ठमत्रेरपत्यत्वं वृतः प्राप्तोऽनसूयया आन्वीक्षिकीमलर्काय प्रह्लादादिभ्य ऊचि
वान् ११ ततः सप्तम आकूत्यां रुचेर्यज्ञोऽभ्यजायत स यामाद्यैः सुरगणैरपात्स्वायंभुवांत
रं १२ अष्टमे मेरुदेव्यां तु नाभेर्जात उरुक्रमः दर्शयन्वर्त्म धीराणां सर्वाश्रमनमस्कृतं १३
ऋषिभिर्याचितो भेजे नवमं पार्थिवं वपुः दुग्धेमामोषधीर्विप्रास्तेनायं स उशत्तमः १४

ऋषभावतारमाह सर्वाश्रमनमस्कृतं अंत्याश्रमं पारमहंस्यं वर्त्म धीराणां दर्शयन् नाभेरग्निध्रपुत्रात्
ऋषभोजातः १३ पृथ्ववतारमाह पार्थिवं वपुः राजदेहं पृथुरूपं पाठांतरे पृथोरिदं पार्थवं ओषधीरित्युप
लक्षणं इमां पृथिवीं सर्वाणि वस्तूनि दुग्ध अदुग्ध अदोग्धा भावस्त्वार्षः हे विप्रास्तेन पृथिवीदोहनेन सोय १३
मवतारः उषत्तमः कमनीयतमः वशाकांतावित्यस्मात् १४ रामराम रामराम रामराम रामराम

प्रथमद्वितीयादिशब्दो निर्द्देशमात्रापेक्षया न तु क्रमोक्तिः वाराहावतारमाह अस्यविश्वस्यभवायउद्भवायमहीं
मुद्धरिष्यन्निति क्रमोक्तिः एवं सर्वत्रावतारस्तत्कर्म चोक्तमित्यनुसंधेयं ७ नारदावतारमाह तृतीयमिति ऋषिस
र्गमुपेत्य तत्रैव देवर्षित्वमुपेत्येत्यर्थः सात्वतं वैष्णवं तंत्रं पंचरात्रागमं आचष्ट उक्तवान् यतस्तंत्रान्निर्गतं कर्म
बंधहेतुत्वं येभ्यस्तानि निःकर्माणि तेषां भावो नैष्कर्म्यं कर्मणामेव मोचकत्वं यतो भवति तदाचष्टेत्यर्थः ८ नर

द्वितीयं तु भवायास्य रसातलगतां महीं उद्धरिष्यन्नुपादत्त यज्ञेशः सौकरं वपुः ७ तृ
तीयमृषिसर्गं वै देवर्षित्वमुपेत्य सः तंत्रं सात्वतमाचष्ट नैष्कर्म्यं कर्मणां यतः ८ तुर्ये
धर्मकलासर्गे नरनारायणावृषी भूत्वात्मोपशमोपेतमकरोद्दुश्चरं तपः ९ पंचमः क
पिलो नाम सिद्धेशः कालविप्लुतं प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयम् १०

नारायणावतारमाह तुर्य्य इति तुर्य्येवतारे धर्मस्य कलांशः भार्येत्यर्थः अर्द्धो वा एष आत्मनो य
त्पत्नीति श्रुतेः तस्याः सर्गे ऋषी भूत्वेत्येकावतारत्वम् दर्शयति ९ कपिलावतारमाह आसुरये
तन्नाम्ने ब्राह्मणाय तत्त्वानां ग्रामस्य संघस्य विनिर्णयो यस्मिंस्तत्सांख्यम् १० रामरामरामरामराम

भा०प्र० परसुरामावतारमाह अवतार इति त्रिर्गुणं यथा भवति तथा सप्तकृत्वः सप्तवारान् एकविंशतिवारानित्यर्थः २०
व्यासावतारमाह अल्पमेधसः अल्पप्रज्ञान् पुंसो दृष्ट्वा तदनुग्रहार्थं शाखाश्चक्रे २१ रामावतारमाह नरदेवत्वं ए
२४ वरूप्राप्तः सन् अतः परं अष्टादशे २२ रामकृष्णावतारमाह विंशतितम इति वृष्ण्येतकारलोपश्छन्दोनुरोधेन॥

अवतारे षोडशमे पश्यन्ब्रह्मद्रुहो नृपान् त्रिःसप्तकृत्वः कुपितो निःक्षत्रामकरोन्महीं २०
ततः सप्तदशे जातः सत्यवत्यां पराशरात् चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोल्पमेधसः २१
नरदेवत्वमापन्नः सुरकार्यचिकीर्षया समुद्रनिग्रहादीनि चक्रे वीर्याण्यतः परं २२ ए
कोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी रामकृष्णाविति भुवो भगवानहरद्भरं २३ त
तः कलौ संप्रवृत्ते संमोहाय सुरद्विषां बुद्धो नाम्ना जिनसुतः कीकटेषु भविष्यति २४॥
अथासौ युगसंध्यायां दस्युप्रायेषु राजसु जनिता विष्णुयशसो नाम्ना कल्किर्जगत्पतिः २५

रामकृष्णाविति य[illegible] नामनी जन्मनी प्राप्य २३ बुद्धावतारमाह अजिनस्य सुतः जिनसुत इति पा
ठे जिनः स एव कीकटेषु मध्ये गयाप्रदेशे २४ कल्क्यवतारमाह युगसंध्यायां कलेरन्ते विष्णुयशसो ब्रा २४
ह्मणात् सकाशात् जनिता जनिष्यते २५

मत्स्यावतारमाह चाक्षुषमन्वंतरे यउदधिसंप्लवः तस्मिन् यद्यपि मन्वंतरावसाने प्रलयो नास्ति तथापि केनचित्कौ
तुकेन सत्यव्रताय मायादर्शिता यथा अकाले मार्कंडेयायेति द्रष्टव्यं महीमय्यां नावि नौकारूपायां मह्यामित्यर्थः अ
पात् रक्षितवान् वैवस्वतमिति भाविनी संज्ञा १५ कूर्मावतारमाह कमठः कूर्मस्तद्रूपेण एकादशावतारे बिभर्द् दध्रे द
धार १६ धन्वंतर्यवतारमाह धान्वंतरं धन्वंतरिरूपं द्वादशमादिप्रयोगस्त्वार्षः त्रयोदशमेव रूपं तच्चरितेन

रूपं स जगृहे मात्स्यं चाक्षुषोदधिसंप्लवे नाव्यारोप्य महीमय्यामपाद्वैवस्वतं मनुं १५ सुरा
सुराणामुदधिं मथ्नतां मंदराचलं दध्रे कमठरूपेण पृष्ठ एकादशे विभुः १६ धान्वंतरं
द्वादशमं त्रयोदशममेव च अपाययत्सुरानन्यान्मोहिन्या मोहयन् स्त्रिया १७ चतुर्दशं
नारसिंहं बिभ्रद्दैत्येंद्रमूर्जितं ददार करजैर्वक्षस्येरकां कटकृद्यथा १८ पंचदशं वामनकं
कृत्वागादध्वरं बलेः पदत्रयं याचमानः प्रत्यादित्सुस्त्रिविष्टपं १९ श्रीहरये नमः ॥

सह दर्शयति अपाययदित्यत्र सुधामित्यध्याहारः मोहिन्या स्त्रिया स्त्रीरूपेण अन्यान् असुरान् मोहयन् धा
न्वंतरिरूपेण अमृतमानीय मोहिन्या अपाययदित्यर्थः १७ नृसिंहावतारमाह नारसिंहं स्वरूपं बिभ्रत् एरकां
निर्गोष्ठितृणं १८ वामनावतारमाह दुष्टानां मदं वामयतीति वामनकं रूपं कृत्वा वा प्रत्यादित्सुः तस्मादा
छिद्य ग्रहितुमिछुः १९

भा० प्र० दुःखग्रामात्संसाराद्विमुच्यत इत्युक्तं तत्र कथं देहद्वयसंबंधे सति तद्विमुक्तिरित्याशंक्य देहद्वयसंबंधस्य भग
९५ वन्मायोत्थाविद्याविलसितत्वात्तच्छ्रवणादिजनितविद्यया तन्निवृत्तिरुपपद्यत इत्याशयेनाह एतदिति पं
चभिः अरूपस्य चिदेकरसस्यात्मनो जीवस्य एतत्स्थूलरूपं शरीरं भगवतो या माया तस्या गुणैर्महदादिरूपैर्विरचितं क्व
आत्मनि आत्मस्थानि शरीरं कृतमित्यर्थः ३० कथमित्यपेक्षायां स्वरूपावरणेन तदध्यास इति सदृष्टांतमाह यथा नभ
सीति यथा वायुनाश्रितो मेघौघो नभसि आकाशे अबुद्धिभिरज्ञैरारोपितः यथा वा पार्थिवो रेणुस्तद्गतं धूसरत्वादि अ
निले एवं द्रष्टरि आत्मनि दृश्यत्वादिधर्मकं शरीरमारोपितमित्यर्थः ३१ किंचातः स्थूलाद्रूपात्परमन्यदपि सू

एतद्रूपं भगवतो ह्यरूपस्य चिदात्मनः मायागुणैर्विरचितं महदादिभिरात्मनि ३० य
था नभसि मेघौघो रेणुर्वा पार्थिवोऽनिले एवं द्रष्टरि दृश्यत्वमारोपितमबुद्धिभिः ३१
अतः परं यदव्यक्तमव्यूढगुणबृंहितं अदृष्टाश्रुतवस्तुत्वात्स जीवो यत्पुनर्भवः ३२

क्ष्ममारोपितमित्यनुषंगः कथंभूतं तत्र यदव्यक्तं सूक्ष्मं तत्र हेतुः अव्यूढगुणबृंहितं व्यूढः करचरणादिपरि
णामः तथाभूताः परिणताः अव्यूढाः ये गुणास्तैर्बृंहितं रचितं आकारविशेषरहितत्वादव्यक्तमित्यर्थः एतदेव कुतः
तत्राह अदृष्टाश्रुतवस्तुत्वात् यद्याकारविशेषवद्वस्तु तदस्मदादिवद्दृश्यते श्रूयते वा इंद्रादिवत् इदं तु न तथा त
र्हि तस्य सत्वे किं प्रमाणं तत्राह स जीवः जीवोपाधिः जीवो जीवेन निर्मुक्तः जीवो जीवं विहाय ये त्युक्ते जीवोपाधौ लि
गशरीरे जीवशब्दस्य प्रयोगात् जीवोपाधितया कल्प्यत इत्यर्थः ननु स्थूलमेव भोगायतनत्वाच्च जीवस्योपाधिरस्तु किं ९५
न्यकल्पनयेत्यत आह यदिति यस्मात्सूक्ष्मात् पुनर्भवः पुनर्जन्म उत्क्रांतिगत्यागतीनां तेन विना असंभवादिति भावः ३२

अनुक्तसर्वसंग्रहार्थमाह अवतारा इति असंख्येयत्वे दृष्टांतः यथेति अविदासिनः उपक्षयशून्यात्
दस्तु उपक्षयरहितस्मात्सरसः सकाशात् कुल्याः क्षुद्रप्रवाहाः २६ विभूतीराह ऋषय इति २७ तत्र विशे
षमाह एते चेति पुंसः परमेश्वरस्य केचिदंशाः केचित्कलाः विभूतयश्च तत्र मत्स्यादीनामव
तारत्वेन सर्वज्ञत्वसर्वशक्तिमत्वेपि यथोपयोगमेव ज्ञानक्रियाशक्त्याविष्करणं कुमारनारदादिष्वधिकारि

अवतारास्त्वसंख्येया हरेः सत्वनिधेर्द्विजाः यथाविदासिनः कुल्याः सरसः स्युः सहस्र
शः २६ ऋषयो मनवो देवा मनुपुत्रा महौजसः कलाः सर्वे हरेव सप्रजापत रे
यस्तथा २७ एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयं इंद्रारिव्याकुलं लो
कं मृडयंति युगे युगे २८ जन्मगुह्यं भगवतो य एतत्प्रयतो नरः सायं प्रातर्गृणन्भ
क्त्या दुःखग्रामाद्विमुच्यते २९

केषु यथोपयोगमंशकलावेशः पृथ्वादिषु शक्त्यावेशः कृष्णस्तु भगवान् साक्षान्नारायण एव आ
विर्भूतसर्वशक्तित्वात् सर्वेषां प्रयोजनमाह इंद्रारयो दैत्यास्तैर्व्याकुलमुपद्रुतं लोकं मृडयंति सु
खिनं कुर्वंति २८ एतत्कीर्तने फलमाह जन्मेति गुह्यमतिरहस्यं जन्म प्रयतः शुचिः सन् २९ ॥०॥

कर्मभिर्विषय २

तर्हिजीवादीश्वरस्यकोविशेषः स्वातंत्र्यमेवविशेषइत्याह सवाइति षाड्वर्गिकंइंद्रियषड्वर्गविषयंजिघ्रति
भा॰ प्र॰ दूरादेवगंधवद्गृह्णाति नतुसज्जतइत्यर्थः कुतः षड्गुणेशः षडिंद्रियनियंता ३६ ननुकिमीश्वरस्यस्र
१६ ष्ट्रादिभोगोवेतत्राह नचेति धातुर्जगद्विधातुरीश्वरस्यऊतीर्जगल्लीलाः कुमनीषंकेवलबुद्धिनिपुणेनतर्कादिकौ
शलेननअवैतिनजानाति मनसारूपाणिवचसानामानिसंतन्वतःविस्तारयतः वचोभिरिति वहुत्वंस्तुत्यभिप्रायेण
मनोवचोभिःसहइतिवा ३७ भक्तस्तुकथंचिज्जानातीत्याह सवेदेति अमाययाअकुलभावेनसंततयानिरंतरया

सवाइदंविश्वममोघलीलः सृजत्यवत्यत्तिनसज्जतेस्मिन् भूतेषुचांतर्हितआत्मतंत्रः षाड्वर्गि
कंजिघ्रतिषड्गुणेशः ३६ नचास्यकश्चिन्निपुणेनधातुरवैतिजंतुःकुमनीषऊतीः नामानि
रूपाणिमनोवचोभिः संतन्वतोनटचर्यामिवाज्ञः ३७ सवेदधातुःपदवींपरस्यदुरंतवीर्यस्य
त रथांगपाणेः योमाययासंततयानुवृत्याभजेततत्पादसरोजगंधं ३८ अथेहधन्याभगवंतइ
त्थंयद्वासुदेवेखिललोकनाथे कुर्वंतिसर्वात्मकमात्मभावंनयत्रभूयःपरिवर्तउग्रः ३९

अनुवृत्त्याआनुकूल्येनभजेत ३८ भक्तिमार्गेप्रवृत्तान्ऋषीनभिनंदति अथेति यतोभक्तएवभग
वत्तत्वंजानाति अथ अतः भगवंतः सर्वज्ञाः भवंतोधन्याः कृतार्थाः कुतः यद्यस्मात् इत्थं प्रश्नेवा
सुदेवे आत्मभावं मनोवृत्तिंकुर्वंति सर्वात्मकम् ऐकांतिकं यत्र यस्मिन्भावेसति भूयः परिवर्तो १६
जन्ममरणआवर्तोनभवति ३९ रामरामहरेगोविंदमाधवमधुसूदनरामहरे ॥ श्री श्री श्री

तदेवमुपाधिद्वयमुक्त्वा तदपवादेन जीवस्य ब्रह्मतामाह यत्र यदा इमे स्थूलसूक्ष्मे रूपे स्वसंविदा स्वरूपज्ञानेन प्र
तिषिद्धे भवतः ज्ञानेन प्रतिषेधार्हत्वे तमेव हेतुमाह अविद्ययात्मनि कृते कल्पिते इति हेतोः तद्ब्रह्म तदा जी
वो ब्रह्मैव भवतीत्यर्थः कथंभूतं तद्दर्शनं ज्ञानैकस्वरूपं ३३ तथापि भगवन्मायायाः संसृतिकारणभूता
याः विद्यमानत्वात् कथं ब्रह्मता तत्राह यदीति असंदेहे संदेह यदि वेदाः प्रमाणं स्युरितिवत् वैशारदी वि
शारदः सर्वज्ञ ईश्वरः तदीया देवी संसारचक्रे क्रीडंती एषा माया यद्युपरता भवति किमित्युपरतात्र भवत्तत्राह

यत्रेमे सदसद्रूपे प्रतिसिद्धे स्वसंविदा अविद्ययात्मनि कृते इति तद्ब्रह्मदर्शनं
३३ यद्येषोपरता देवी माया वैशारदी मतिः संपन्न एवेति विदुर्महिम्नि स्वे महीय
ते ३४ एवं जन्मानि कर्माणि ह्यकर्तुरजनस्य च वर्णयंति स्म कवयो वेदगुह्यानि हृ
त्पतेः ३५

मतिर्विद्या अयं भावः यावदविद्यात्मना आवरणविक्षेपौ करोति तावन्नोपरमति यदा तु सैव विद्यारूपेण प
रिणता तदा सदसद्रूपं जीवोपाधिं दग्ध्वा निरिंधनाग्निवत्स्वयमेवोपरमेदिति तदा संपन्नं ब्रह्मस्वरूपं प्राप्त एवे
ति विदुस्तत्त्वज्ञाः किमतो यद्येवं स्वे महिम्नि परमानंदस्वरूपे महीयते पूज्यते विराजत इत्यर्थः ३४ यथा
जीवस्य जन्मादि मायया एवमीश्वरस्यापि जन्मकर्मादि माययेत्याह एवमिति अकर्तुः कर्माणि अजनस्य
जन्मानि हृत्पतेः अंतर्यामिणः ३५

भा० प्र० तुर्ये भागवतारंभकारणत्वेन वर्ण्यते व्यासस्यापरितोषस्तु तपःप्रवचनादिभिः १ इत्येवं प्रसन्नतया श्रावयि
१७ ष्यामीति ब्रुवाणं मुनीनां बहूनां मध्ये एकेन वक्तव्ये योवृद्धः वृद्धेष्वपि बहुसुयः कुलपतिर्गणमुख्यः तेष्वपि
बहुश्रुयो बह्वृचः ऋग्वेदी तेन वक्तव्ये अत एवंभूतत्वात् शौनकोऽब्रवीत् १ यत् यां कथामाह २ कस्मिन्वा
स्थाने केन हेतुनेति महाभारतादिधर्मशास्त्राणि कृतवतः पुनरेतत्संहिताकरणे किं कारणमित्यर्थः ॥

व्यास उवाच इति ब्रुवाणं संस्तूय मुनीनां दीर्घसत्रिणां वृद्धः कुलपतिः सूतं बह्वृचः
शौनकोऽब्रवीत् १ शौनक उवाच सूत सूत महाभाग वद नो वदतां वर कथां भा
गवतीं पुण्यां यदाह भगवान् शुकः २ कस्मिन् युगे प्रवृत्तेयं स्थाने वा केन हेतुना कु
तः संचोदितः कृष्णः कृतवान् संहितां मुनिः ३ तस्य पुत्रो महायोगी समदृङ्निर्वि
कल्पकः एकांतमतिरुन्निद्रो गूढो मूढ इवेयते ४

नार
कुत इत्यपेक्षायां सार्वविभक्तिकस्तसिः केन प्रवर्त्तित इत्यर्थः कृष्णो व्यासः ३ यद्वक्तं तु सैसंश्रावयामासेति तत्र
शुकस्य व्याख्यादिकं कथं घटितमिति प्रष्टुं तस्यासंगो ह्यासीनत्तामाह द्वाभ्यां तस्येति समदृक् सर्वं ब्रह्म पश्य
ति अतो निर्विकल्पकः स्वार्थकः निरस्तभेदः किंच एकस्मिन्नेव अंतःसमाधिर्यस्यास्ति तथाभूता मतिर्यस्य सः॥
यत उन्निद्रः मायाशयनाद्बुधः यानिशा सर्वभूतानां तस्यां जागर्त्ति संयमीतिस्मृतेः अत एव गूढः अप्रकटः १७
व

सूतकिमेतच्छास्त्रमपूर्वंकथयसितत्राह इदमिति ब्रह्मसंमितं सर्ववेदतुल्यं उत्तमश्लोकस्यचरितंयस्मिंस्तत्
ऋषिर्व्यासः ४० तत्संप्रदायप्रवृत्तिमाह तदिदमिति सुतं शुकं ४१ प्रायेणमृत्युपर्यंतानाशकेनोपविष्टमिति

इदंभागवतंनामपुराणंब्रह्मसंमितं उत्तमश्लोकचरितंचकारभगवानृषिः निःश्रेय
सायलोकस्यधन्यंस्वस्त्ययनंमहत् ४० तदिदंग्राहयामाससुतमात्मवतांवरं सर्ववे
देतिहासानांसारंसारंसमुद्धृतं ४१ सतुसंश्रावयामासमहाराजंपरीक्षितं प्रायोप
विष्टंगंगायांपरीतंपरमर्षिभिः ४२ कृष्णेस्वधामोपगतेधर्मज्ञानादिभिःसह क
लौनष्टदृशामेषःपुराणार्कोधुनोदितः ४३ तत्रकीर्तयतोविप्राविप्रर्षेर्भूरितेजसः
अहंचाध्यगमंतत्रनिविष्टस्तदनुग्रहात् ४४ सोहंवःश्रावयिष्यामियथाधीतंय
थामतिः ४५ इतिश्रीमद्भागवतेमहापुराणेप्रथमस्कंधेनामतृतीयोध्यायः ३

परमवैराग्योक्तिः ४२ ४३ हेविप्राः विप्रर्षेःसकाशात् अध्यगं ज्ञानवानस्मि तत्रकीर्तयतः तत्रनिविष्ट
इतिचान्वयभेदात् तत्रपदावृत्तिरदोषः ४४ यथाधीतंनतुस्वमतिविलसितं तत्रतुयथामतिस्वमत्यनुसारेण
संक्षेपतःकथितंविस्तरतःश्रावयिष्यामि ४५ इतिश्रीप्रथमेतृतीयः ॥ ३ ॥

भा० प्र० श्रोतुश्चरितं प्रतीयाश्चर्य्ये श्रुतः कथयइत्याह अभिमन्युसुतमितिपंचभिः गृणीहिकथय ९ सम्राट्चक्रवर्त्ती
१८ वेतिवितर्के कस्यवाहेतोः कस्मात्कारणात् अधिराट्श्रियं अधिराज्ञोश्रियंसंपदं अनादृत्य १० यस्यपादनि
केतंचरणपिठंहस्फुरंधनान्यानीयशत्रवोनमंति अंगहेसूत युवातरुणः एवंऐषत ऐछत् आत्मनेपदमार्षम
असुभिःप्राणैःसह ११ विरक्तस्यकिंधनादिभिरितिचेत्तत्राह शिवायेति लोकस्यशिवायसुखाय भवायस

अभिमन्युसुतंसूतप्राहुर्भागवतोत्तमं तस्यजन्ममहाश्चर्य्यकर्माणिचगृणीहिनः
९ ससम्राट्कस्यवाहेतोःपांडूनांमानवर्द्धनः प्रायोपविष्टोगंगायामनादृत्याधिराट्
श्रियं १० नमंतियत्पादनिकेतमात्मनःशिवायहानीयधनानिशत्रवः कथंसवीरःश्रि
यमंगदुस्त्यजांयुवैषतोत्स्रष्टुमहोसहासुभिः ११ शिवायलोकस्यभवायभूतयेयउ
त्तमश्लोकपरायणाजनाः जीवंतिनात्मार्थमसौपराश्रयंमुमोचनिर्विद्यकुतःकलेवरं १२
तत्सर्वंनःसमाचक्ष्वपृष्टोयदिहकिंचन मन्येत्वांविषयेवाचांस्नातमन्यत्रछांदसात् १३

१ ति मृद्धै भूतयेऐश्वर्य्यायच तेजीवंतिनत्वार्थं एवंसतिअसौराजानिर्विद्यविरज्यापि विरक्तस्सकिंपरेषामाश्रयंक
लेवरंकस्तोहेतोर्मुमोच नहिपरेषांजीवनंस्वयंत्यक्तुमुचितमित्यर्थः यत्किंचनपृष्टोसितत्सर्वंनोःसम्यंस
माचक्ष्व यद्यस्माद्वाचांविषयेगिरांगोचरेऽर्थेस्नातंपारंगतंत्वांमन्येछांदसादन्यत्रवैदिकव्यतिरेकेण अत्रैववर्णि
॥ १८ ॥

निर्विकल्पकत्वं प्रपंचयति दृष्ट्वेति आत्मजं शुकं प्रव्रजंतं अनुयांतं अनुगच्छंतं ऋषिं व्यासं अनग्नमपि
दृष्ट्वा जले क्रीडंत्यो देव्योऽप्सरसः ह्रिया लज्जया वस्त्रपरिधानं कृतवत्यः अनग्नमपीत्यनेन अर्थात्
सुतो नग्न इत्युक्तं नग्नस्य पुरतो गच्छतः सुतस्य च ह्रिया न परिदधुः तच्चित्रं वीक्ष्य इयं स्त्री अयं पुमानि
ति भेदाभेदमतिस्तवास्ति सुतस्य तु पुनर्भेदमतिर्नास्ति विविक्ता पूता दृष्टिर्यस्य सः ५ एवंभूतो सो कथमा

दृष्ट्वानुयांतमृषिमात्मजमप्यनग्नं देव्यो ह्रिया परिदधुर्न सुतस्य चित्रं तद्वीक्ष्य पृ
च्छति मुनौ जगदुस्तवास्ति स्त्रीपुंभिदा न तु सुतस्य विविक्तदृष्टेः ५ कथमालक्षि
तः पौरैः संप्राप्तः कुरुजांगलान् उन्मत्तमूकजडवद्विचरन्गजसाह्वये ६ कथं
वा पांडवेयस्य राजर्षेर्मुनिना सह संवादः समभूत्तात यत्रैषा सात्वती श्रुतिः ७
स गोदोहनमात्रं हि गृहेषु गृहमेधिनां अवेक्षते महाभाग तीर्थीकुर्वंस्तदाश्रमं ८

लक्षितः ज्ञातः कुरवो जांगलाश्च देशविशेषास्तान्संप्राप्तः प्रथमं ततो गजसाह्वये विचरन् गजेन सहितं आह्व २
यो नाम यस्य तस्मिन् हस्तिनापुरे हस्तिनामराज्ञा तेन निर्मितत्वात् ६ एवंभूतेन मुनिना सह यत्र संवाद एषा सा
त्वती भागवती श्रुतिः संहिता ७ एतदाख्यानं बहुकालावस्थानापेक्षं तस्य तु एकत्रावस्थानं दुर्लभमित्याह स
इति गोदोहनमात्रं कालं प्रतीक्षते न तदपि निर्भिक्षार्थं किंतु तेषामाश्रमं गृहं तीर्थीकुर्वन् तस्मादेवंभूतोऽत्र वक्तेत्या

भा० प्र० ततश्चातुर्होत्रोपलक्षिताश्चत्वार ऋत्विजश्चतुर्होतारस्तैरनुष्ठेयं कर्म चातुर्होत्रं शुद्धं शुद्धिकरं यज्ञसंतत्यै य
१९ ज्ञानामविच्छेदाय १९ चातुर्विध्यमेवाह ऋगिति उद्धृताः पृथक्कृताः २० तत्रेति निस्नातः पारंगतः २१ दा

सं० २

चातुर्होत्रं कर्म शुद्धं प्रजानां वीक्ष्य वैदिकं व्यदधाद्यज्ञसंतत्यै वेदमेकं चतुर्विधं १९ ऋ
ग्यजुःसामाथर्वाख्या वेदाश्चत्वार उद्धृताः इतिहासपुराणं च पंचमो वेद उच्यते २० त
त्रर्ग्वेदधरः पैलः सामगो जैमिनिः कविः वैशंपायन एवैको निस्नातो यजुषामुत २१ ॥
अथर्वांगिरसामासीत्सुमंतुर्दारुणो मुनिः इतिहासपुराणानां पिता मे रोमहर्षणः
२२ त एत ऋषयो वेदं स्वं स्वं व्यस्यन्ननेकधा शिष्यैः प्रशिष्यैस्तच्छिष्यैर्वेदास्ते शा
खिनोऽभवन् २३ त एव वेदा दुर्मेधैर्धार्यंते पुरुषैर्यथा एवं चकार भगवान्व्या
सः कृपणवत्सलः २४ स्त्रीशूद्रद्विजबंधूनां त्रयी न श्रुतिगोचरा कर्मश्रेयसि मू
ढानां श्रेय एवं भवेदिह २५

रुणः अथर्वोक्ताभिचारादिप्रवृत्तेः २२ शाखाभिचारमाह त एत इति व्यस्यन् विभक्तं कुर्वंतः २३ वेदविभा
गप्रयोजनमाह त एवेति येऽपूर्वं मतिमेधाविभिर्धार्यंते त एव २४ किंच स्त्रीशूद्रेति स्त्रीशूद्रद्विजबंधवश्चैव ॥ ९९ ॥
णिकेषु अधमास्तेषां कर्मरूपे श्रेयसि श्रेयसाधने एवं भवेत् अनेनैव प्रकारेण भवत्विति २५ ॥ ॥ ९ ॥

कस्मिन्युगे इत्यादिप्रश्नानां व्यासजन्मकथनपूर्वकमुत्तरमाह द्वापरे समनुप्राप्ते कदेत्यपेक्षायामाह तृतीये यु
गपर्य्यये परिवर्त्ते वासव्यां उपरिचरस्य वसोर्वीर्य्याज्जातायां सत्यवत्यां योगी ज्ञानी व्यासो जातः १४ जलमुपस्पृश्य स्ना
नादिकं कृत्वेत्यर्थः आसीनो बभूवेति शेषः विविक्ते देश इत्यादि चित्तैकाग्र्यार्थमुक्तं अनेनैव बदरिकाश्रमे

सूत उवाच द्वापरे समनुप्राप्ते तृतीये युगपर्य्यये जातः पराशराद्योगी वासव्यां कलया
हरेः १४ स कदाचित्सरस्वत्या उपस्पृश्य जलं शुचिः विविक्त एक आसीन उदिते रविमं
डले १५ परावरज्ञः स ऋषिः कालेनाव्यक्तरंहसा युगधर्मव्यतिकरं प्राप्तं भुवि युगे यु
गे १६ भौतिकानां च भावानां शक्तिह्रासं च तत्कृतं अश्रद्दधानान्निःसत्त्वान्दुर्मे
धान्ह्रसितायुषः १७ दुर्भगांश्च जनान्वीक्ष्य मुनिर्दिव्येन चक्षुषा सर्ववर्णा
श्रमाणां यद्दध्यौ हितममोघदृक् १८

न मुक्तं सूचितं १५ तत्र स च ऋषिः युगधर्मव्यतिकरादिकं वीक्ष्य सर्ववर्णाश्रमाणां यद्धितं तद्दध्याविति तृ
तीयेनान्वयः परावरज्ञः अतीतानागतवित् अव्यक्तं रंहो वेगो यस्य तेन कालेन युगधर्माणां व्यतिकरं संकरं
प्राप्तं वीक्ष्य युगे युगे १६ भौतिकानां शरीरादीनां तत्कृतं कालकृतं निःसत्त्वान् धैर्य्यशून्यान् दुर्मेधान्
मंदमतीन् १७ अमोघदृक् सर्वज्ञानसंपन्नः १८

असंपन्नेहेतुंस्वयमेवाशंकते किंचेति प्रायेणभूयस्त्वेन हियस्मात्तएव धर्माः अच्युतस्यप्रियाः ३१
भा० प्र० खिलंन्यूनंखिद्यतः खेदंप्राप्नुवतः कृसस्यव्यासस्य प्रागुदाहृतंसरस्वतीतीरस्थं ३२ तंनारदमा
२० गतमभिज्ञाय सहसाप्रत्युत्थायविधिवत्पूजयामासेति ३३ इतिप्रथमेचतुर्थोऽध्यायः ॥४ पंचमेसर्व
धर्मेभ्योहरिकीर्तनगौरवं व्यासचित्तप्रसादायनारदेनोपदिश्यते १ उपसमीपेआसीनं विप्रर्षिंव्यासं

किंवाभागवताधर्मानप्रायेणनिरूपिताः प्रियाःपरमहंसानांतएवह्यच्युतप्रियाः
३१ तस्यैवंखिलमात्मानंमन्यमानस्यखिद्यतः कृसस्यनारदोभ्यागादाश्रमंप्रागुदाहृतं
३२ तमभिज्ञायसहसाप्रत्युत्थायागतंमुनिः पूजयामासविधिवन्नारदंसुरपूजितं ३३
इतिश्रीमद्भागवतेमहापुराणेप्रथमस्कंधेनारदव्याससंगमेनामचतुर्थोऽध्यायः ४
सूतउवाच अथतंसुखमासीनउपासीनंबृहच्छ्रवाः देवर्षिःप्राहविप्रर्षिंवीणापाणिः
स्मयन्निव १ नारदउवाच पाराशर्यमहाभागभवतःकच्चिदात्मना परितुष्यतिशारीर
आत्मामानसएववा २

बृहच्छ्रवामहायशाः स्मयन्नीषद्धसन् इवशब्देनमुखप्रसत्तिर्द्योत्यते यद्वास्वेत्यनधिकारार्थं अ
ता० २ होमहानपिमुह्यतीतिस्मयमानः १ शारीरःशरीराभिमानी आत्मा आत्मना तेनशरीरेणकच्चित् किं २०
परितुष्यति मानसआत्मामनोभिमानीतेनमनसापरितुष्यतिनोवेति कच्चिन्नोवेति २ रामरामराम

अतएवतेषांकृपयाभारताख्यानंमुनिनाकृतं भूतानांश्रेयसिहिते सर्वात्मकेनापिकर्मणा नातिप्रसीदद्धृदयं
यस्यसः २६ चिन्ताप्रसन्नोहेतुंवितर्कयन् इदमुवाचस्वगतं २७ मानितानिपूजितानि निर्व्यलीकेन निष्कपटे
न २८ २९ देह्योदेहेभवः आत्माजीवः वस्तुतोविभुः परिपूर्णएव आत्मना स्वेनरूपेण असंपन्नः ता

इतिभारतमाख्यानंकृपयामुनिनाकृतं एवंप्रवृत्तस्यसदाभूतानांश्रेयसिद्विजाः
सर्वात्मकेनापियदानातुष्यद्धृदयंततः २६ नातिप्रसीदद्धृदयःसरस्वत्यास्तटेशुचौ
वितर्कयन्विविक्तस्थइदंप्रोवाचधर्मवित् २७ धृतव्रतेनहिमयाछन्दांसिगुरवोग्न
यः मानितानिर्व्यलीकेनगृहीतंचानुशासनं २८ भारतव्यपदेशेनह्याम्नायार्थ
श्चदर्शितः दृश्यतेयत्रधर्मादिःस्त्रीशूद्रादिभिरप्युत २९ तथापिवतमेदैह्यो
ह्यात्माचैवात्मनाविभुः असंपन्नइवाभातिब्रह्मवर्चस्यसत्तमः ३०

त्वात्मयमप्राप्तइवभाति ब्रह्मवर्चसम् वेदश्रवणाध्यापनोत्कर्षजन्म तेजः तत्रसाधवोब्रह्मवर्च
स्याः तेषुसत्तमः अतिश्रेष्ठोपि यद्वा नकेवलमसंपन्नइवाभाति प्रत्युतब्रह्मवर्चस्वी ब्रह्मवर्च
स्वानपि असत्तमइवाभाति पाठांतरेकमनीयतमोपीति ३० श्रीरामरामरामरामराम

भा० प्र० किंच त्वंत्रिलोकींपर्य्यटन् अर्कइवसर्वदर्शी योगबलेनचप्राणवायुरिवसर्वप्राणिनामंतश्च
२१ रः सन् आत्मसाक्षीबुद्धिवृत्तिः अतःपरेब्रह्मणिधर्मतः योगेननिस्नातस्य तदुक्तंयाज्ञवल्क्येन इ
ज्याचारदमाहिंसादानस्वाध्यायकर्मणां अयंतुपरमोधर्मोयद्योगेनात्मदर्शनमिति अवरेचब्रह्म

त्वंपर्य्यटन्नर्कइवत्रिलोकीमंतश्चरोवायुरिवात्मसाक्षी परावरेब्रह्मणिध
र्मतोव्रतैःस्नातस्यमेन्यूनमलंविचक्ष्व ७ श्रीनारदउवाच भवतानु
दितप्रायंयशोभगवतोमलम् येनैवासौनतुष्येतमन्येतद्दर्शनंखि
लम् ८ यथाधर्मादयश्चार्थामुनिवर्य्यानुकीर्त्तिताः नतथावासुदेव
स्यमहिमाह्यनुवर्णितः ९

णिवेदाख्येव्रतैःस्वाध्यायनियमैःनिस्नातस्यमेऽखिलमप्यर्थंयन्न्यूनंतद्विचक्ष्ववितर्कय ७ अनुदित
प्रायं अनुक्तप्रायं भगवद्यशोविनायेनैवधर्मादिज्ञानेनासौभगवान्नतुष्येत तदेवदर्शनंज्ञानं
खिलंन्यूनंमन्ये ८ ननुभगवद्यशएवतत्रतत्रानुवर्णितंतत्राह यथेति यथाधर्मादिसाधना २१
नितथाधर्मादिवत्प्राधान्येनवासुदेवस्यमहिमानोक्तइत्यर्थः ९

तेजिज्ञासितं ज्ञातुमिष्टं धर्मादियत्तत्सर्वं सुसंपन्नं सम्यग्ज्ञातं अपिशब्दादनुष्ठितं चेत्यर्थः अ
धीतिपाठे संबोधनं सुसंपन्नत्वे हेतुः महदद्भुतमित्यादि सर्वैरर्थैर्धर्मादिभिः परिबृंहितं परिपूर्णं
३ किंच यत्सनातनं नित्यं परंब्रह्म तच्चत्वयाजिज्ञासितं विचारितं अधीतं अधिगतं प्राप्तंचेत्यर्थः
तथापि शोचसि तत्किमर्थमिति शेषः ४ आत्मा शारीरो मानसश्च तन्मूलं तस्यात्र परितोषस्य कारणं॥

जिज्ञासितं सुसंपन्नमपि ते महदद्भुतं कृतवान्भारतं यस्त्वं सर्वार्थपरिबृंहितं ३॥
जिज्ञासितमधीतं च ब्रह्म यत्तत्सनातनं तथापि शोचस्यात्मानमकृतार्थ इव प्रभो ४ श्री
व्यास उवाच अस्त्येव मे सर्वमिदं त्वयोक्तं तथापि नात्मा परितुष्यते मे तन्मूलमव्यक्तमगाध
बोधं पृच्छामहे त्वात्मभवात्मभूतं ५ स वै भवान्वेद समस्तगुह्यमुपासितो यत्पुरुषः पुराणः॥
परावरेशो मनसैव विश्वं सृजत्यवत्यत्ति गुणैरसंगः ६

अव्यक्तं अस्फुटं हे नारद त्वां पृच्छाम आत्मभवो ब्रह्मा तस्यात्मनो देहाद्भूतः तं अत एवागाधो अतिगंभी
रो बोधो यस्य तं त्वां ५ अगाधबोधतां प्रपंचयन्नाह स वा इति द्वाभ्यां सर्वगुह्यज्ञाने हेतुः यस्मात्पुराणपुरुषउ
पासितः त्वया कथंभूतः परावरेशः कार्यकारणनियंता मनसैव संकल्पमात्रेण गुणैः कृत्वा विश्वं सृजतीत्यादि ६

भा० प्र० भक्तिहीनकर्मबंधनमेवेतिकैमुतिकन्यायेनदर्शयति नैष्कर्म्यमिति निष्कर्मब्रह्मतदेकाकारत्वा
२२ न्निष्कर्मतारूपंनैष्कर्म्यं अज्यतेअनेनेति अंजनमुपाधिः तन्निवर्त्तकंनिरंजनं एवंभूतमपिज्ञानंअ
च्युतेभावोभक्तिस्तद्वर्जितंचेत् अलमत्यर्थंनशोभते सम्यक्परोक्षायनकल्पतइत्यर्थः तदाशश्वत्का
लेफलकालेचअभद्रंदुःखरूपंयत्काम्यंकर्म यद्यप्यकारणंअकाम्यं तच्चेतिचकारस्यान्वयः तदपिकर्म
ईश्वरेनार्पितंचेत्कुतःपुनःशोभते वहिर्मुखत्वेनसत्वशोधकत्वाभावात् १२ तदेवभक्तिशून्यानिज्ञा

नैष्कर्म्यमप्यच्युतभाववर्जितंनशोभतेज्ञानमलंनिरंजनं कुतःपुनःशश्वदभद्रमीश्व
रेनचार्पितंकर्मयदप्यकारणं १२ अथोमहाभागभवानमोघदृक्शुचिश्रवाःसत्यरतो
धृतव्रतः उरुक्रमस्याखिलबंधमुक्तयेसमाधिनानुस्मरतद्विचेष्टितं १३ ॥ श्री ॥

ज्ञानवाक्चातुर्यकर्मकौशलानिव्यर्थान्येव यतः अतोहरेश्चरितमेवानुवर्णयेत्याह अथो अतःकारणा
त् अमोघायथार्थादृक्धीर्यस्य शुचिशुद्धंश्रवोयशोयस्य सत्येरतः धृतानिव्रतानियेनसभवानेवमहागु
णस्तावत् अतः उरुक्रमस्यविविधंचेष्टितंअनुस्मरलीलांसमाधिना चित्तैकाग्र्येणाखिलस्यबंधमुक्तये २२
त्वमनुस्मर स्मृत्वावर्णयेत्यर्थः एतच्चवाक्यांतरमितिमध्यमपुरुषप्रयोगोनानुपपन्नः १३ श्रीरामरामराम

वासुदेवव्यतिरिक्तादन्यविषयवद्देवान्यविषयं वा कुर्यात्तुर्य्यं च खिलमेवेत्याह नेति चित्रपदमपि यः
वचो हरेर्यशो न प्रगृणीत तद्वायसं तीर्थं काकतुल्यानां कामिनां रतिस्थानं उशंति मन्यंते कुतः मानसाः
सत्वप्रधाने मनसि वर्त्तमाना हंसाः यतयः यत्र न निरमंति कर्हिचिदपि नितरां न रमंते उशिक्क्षयाः उशि
कू कमनीयं ब्रह्म तत्क्षयो निवासो येषां तेन तथा प्रसिद्धा हंसा मानसे सरसि चरंतः कमनीयपद्मषंडनिवासाः त्य
क्तविचित्रान्नादियुक्तेपु च्छिष्टगर्त्ते काकक्रीडस्थाने न रमंत इति शेषः १० विनापि पदचातुर्य्यं भगवद्यशः

न यद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित् तद्वायसं तीर्थमुशंति मा
नसा न यत्र हंसा निरमंत्युशिक्क्षयाः १० तद्वाग्विसर्गो जनताघविप्लवो यस्मिन्प्र
तिश्लोकमबद्धवत्यपि नामान्यनंतस्य यशोंकितानि यच्छृण्वंति गायंति गृणंति साध
वः ११

प्रधानं वचः पवित्रमित्याह तद्वाग्विसर्ग इति सचासौ वाग्विसर्गश्च वाचः प्रयोगः जनानां समूहो जनता
तस्या अघं विप्लावयति नाशयतीति तथा यस्मिन्वाग्विसर्गे अबद्धवत्यपि अपशब्दादियुक्तेपि प्र
तिश्लोकं अनंतस्य यशोंकितानि नामानि भवंति तत्र हेतुः यत् यानि नामानि साधवो महांतः वक्त
रि सति शृण्वंति श्रोतरि सति गृणंति अन्यदा तु स्वयमेव गायंति कीर्त्तयंतीति ११ ॥ श्री ॥

भा॰ प्र॰ ननु यद्यप्येवं प्रवृत्तिमार्गो निंद्यते तर्हि निवृत्तिमार्गेण सर्वक्रियात्यागेनैव परमेश्वरस्वरूपानुभूतेः किं तद्यशः॰
२३ कथनेनापि तत्राह विचक्षणोऽर्हतीति निपुणोऽपि कश्चिदेव निवृत्तः सर्वक्रियानिवृत्त्या अस्य विभोः सुखं निर्विकल्पकं स्व
स्वात्मकं स्वरूपं वेदितुं ज्ञातुमर्हतीति न पुनरविचक्षणः प्रवृत्तिस्वभावः विमुक्तौ हेतुः नंतः कालतः पारं च देश
तो यस्य तस्य विभोश्चेष्टितं ततः कारणात् हे विभो अनात्मनः देहाद्यभिमानिनः अत एव गुणैः सत्वादिभिः प्रवर्त्तमानस्य
जनस्य दर्शय भवानिति त्वमित्यर्थः पाठांतरे हे भगवन्निति संबोधनं १६ एवं तावत्काम्यकर्मादेरनर्थहेतुत्वात् तं विहा
य हरेर्लीलैव वर्णनीयेत्युक्तं इदानीं तु नित्यनैमित्तिकस्वकर्मनिष्ठामप्यनादृत्य केवलं हरिभक्तिरेवोपदेष्टव्येत्याशये

विचक्षणोऽस्यार्हति वेदितुं विभोरनंतपारस्य निवृत्तितः सुखं प्रवर्त्तमानस्य गुणैरनात्मनस्ततो
भवान्दर्शय चेष्टितं विभो १६ त्यक्त्वा स्वधर्मं चरणांबुजं हरेर्भजन्नपक्वोथ पतेत्ततो यदि य
त्र क्व वाऽभद्रमभूदमुष्य किं को वार्थ आप्तोऽभजतां स्वधर्मतः १७

नाह त्यक्त्वेति ननु स्वधर्मत्यागेन भजन्भक्तिपरिपाकेन यदि कृतार्थो भवेत्तदा न काचिच्चिंता यदि पुनरपक्व एव
म्रियेत ततो भ्रश्येद्वा तदा स्वधर्मत्यागनिमित्तोऽनर्थः स्यादित्याशंक्याह ततो भजनात् कथंचित्पतेत् भ्रश्येत् ।
म्रियेत वा यदि तदपि भक्तिरसिकस्य कर्मानधिकारान्नानर्थशंका अंगीकृत्याप्याह वाशब्दः कटाक्षे यत्र क्व
वा नीचयोनावपि अमुष्य भक्तिरसिकस्य अभद्रमभूत्किं नाभूदेवेत्यर्थः भक्तिवासनासद्भावादिति भावः
हरिं अभजद्भिः तु केवलं स्वधर्मतः को वार्थः आप्तः प्राप्तः न कोपीत्यर्थः अभजतामिति षष्ठी तु संबंध २३
मात्रविवक्षया १७

विपक्षे दोषांतरमाह ततः उरुक्रमविचेष्टितात् पृथक्कृद्दृशः अत एवान्यथाप्रकारांतरेण यत्किंचिद्दर्थीतं तं वि
वक्षयाकृतैः स्फुरितैः रूपैर्नामभिश्च यत्कृत्यत्वेनोपस्थितैः दुःस्थितानामनवस्थिता सती मतिः कदाचित्क्वापि विषये
आस्पदं स्थानं न लभेत वातेनाहता आघूर्णिता नौरिव तदुक्तं गीतासु व्यवसायात्मिका बुद्धिरेकेह कुरुनंदन
बहुशाखा ह्यनंताश्च बुद्धयोऽव्यवसायिनामित्यादि १४ तदेवं हरियशो विना भारतादिषु कृतं धर्मादिवर्णनं न
किंचित्करमित्युक्तं प्रत्युत विरुद्धमेव जातमित्याह जुगुप्सितं निंद्यं काम्यकर्मादि स्वभावत एव रक्तस्य तत्रा

ततोऽन्यथा किंचन यद्विवक्षितः पृथक्कृदृशस्तत्कृतरूपनामभिः न कुत्रचित्क्वापि च दुःस्थिता मतिर्लभेत वाताहतनौरिवास्पदं १४ जुगुप्सितं धर्मकृतेऽनुशासतः स्वभावरक्तस्य महान् व्यतिक्रमः यद्वाक्यतो धर्म इतीतरः स्थितो न मन्यते तस्य निवारणं जनः १५ ॥ श्री॥

निषण्णः पुरुषस्य धर्मकृते धर्मार्थं अनुशासतस्तव महानयं व्यतिक्रमः अन्यायः कुत इत्यत आह यस्य वाक्यतो
ऽयमेव मुख्यो धर्म इति स्थितः इतरः प्राकृतो जनः तस्य काम्यकर्मादेः अन्येन तत्त्वज्ञेन क्रियमाणं निवारणं स्व
यमेव वा त्वया क्रियमाणं यद्वा न कर्मणा न प्रजया धनेन त्यागेनैकेन अमृतत्वमानशुरित्यादि क्रियमाणं यथा
र्थमेतदिति न मन्यते किंतु प्रकृतिमार्गानधिकृतविषयं तदिति कल्पयति तदुक्तं मतांतरोपन्यासे भट्टैः तत्रैवं
शक्तानेव कुर्युरेते पंग्वादयो नराः गृहस्थत्वं न शक्तास्ते कर्तुं तेषामयं विधिः नैष्ठिकं ब्रह्मचर्यं वा परिव्राजकतापि वा॥

भा॰ प्र॰ तदेवं भगवल्लीलाप्राधान्येनानुवर्णयेत्युक्तं तत्र को भगवान् काश्चतस्य लीला इत्यपेक्षायामाह इदं विश्वं भगवानि
२४ व सत्तु अस्माद्विश्वस्मादितरः ईश्वरात्प्रपंचो न पृथक् ईश्वरस्तु प्रपंचात्पृथगित्यर्थः तत्र हेतुः यतो भगवतो हे
तो जगतः स्थित्यादयो भवंति अनेनैव लीला अपि दर्शिताः यद्वा इदं विश्वं भगवान् इतरवद्यः सजीवोपि भग
वान् चेतनाचेतनप्रपंचस्तद्व्यतिरेकेण नास्ति स एवैकस्तत्वमित्यर्थः हि शब्देन सर्वं खल्विदं ब्रह्मेत्यादि प्रमाण
सूचितं तद्धि स्वयमेव भगवान्वेद प्रादेशमात्रमेकदेशमात्रं आचार्य्यवान् पुरुषो वेदेत्यादि श्रुत्यर्थसंपादना

इदं हि विश्वं भगवानिवेतरो यतो जगत्स्थाननिरोधसंभवाः तद्धि स्वयं वेद भवांस्तथापि वै प्रा
देशमात्रं भवतः प्रदर्शितं २० त्वमात्मनात्मानमवेह्यमोघदृक् परस्य पुंसः परमात्मनः कलां गुणानुवर्णितमिति २२
ब ३ अजं प्रजातं जगतः शिवाय तन्महानुभावाभ्युदयोधिगण्यतां २१ इदं हि पुंसस्तपसः श्रुत
स्य वा स्विष्टस्य सूक्तस्य च बुद्धिदत्तयोः अविच्युतोर्थः कविभिर्निरूपितो यदुत्तमश्लोकगुणा
नुवर्णनं २२

यप्रदर्शितम् २० न च त्वया चार्य्यापेक्षा ईश्वरावतारत्वादित्याह त्वमिति हे अमोघदृक् त्वं आत्मना स्वयं
आत्मानमजमेवासंतं जगतः शिवाय जातमवेहि कुतः परस्य पुंसः कलां अंशभूतं तत्कस्मात्महानुभा
वस्य हरेरभ्युदयः पराक्रमः अधि अधिकं गण्यतां निरूप्यतां २१ अनेनैव तपआदि सर्वं तव सफलं स्या
दित्याह इदं हीति श्रुतादयो भावे निष्ठा इदमेव हि तपःश्रवणादेरविच्युतो नित्योर्थः फलं किं तत् उत्तमश्लोकस्य २४

ननुस्वधर्ममात्रादपिकर्मणापितृलोकइतिश्रुतेः पितृलोकप्राप्तिःफलमस्त्येवतत्राह तस्यैवहेतोस्तदर्थं
यत्नंकुर्यात् यत् उपरिब्रह्मपर्य्यंतं अधःस्थावरपर्य्यंतंचभ्रमद्भिर्जीवैर्नलभ्यते षष्ठीतुपूर्ववत् तत्तुवि
षयसुखं अन्यतएवप्राचीनकर्मणःसर्वत्रनरकादावपि लभ्यतेदुःखवत् यथादुःखंप्रयत्नंविनापिलभ्यतेतद्व
त् तदुक्तं अप्रार्थितानिदुःखानियथैवायांतिदेहिनां सुखान्यपितथामन्येदैन्यमत्रातिरिच्यतइति १८ ॥

तस्यैवहेतोःप्रयतेतकोविदोनलभ्यतेयद्भ्रमतामुपर्य्यधः तल्लभ्यतेदुःखवदन्यतःसुखं
कालेनसर्वत्रगभीररंहसा १८ नवैजनोजातुकथंचनाव्रजेन्मुकुंदसेव्यन्यवदंगसंसृतिं
स्मरन्मुकुंदांघ्र्युपगूहनंपुनर्विहातुमिछेन्नरसग्रहोयतः १९ श्रीहरयेपरमात्मने॥

यदुक्तमत्रक्ववाभद्रमभूदितितदुपपादयति नवाइति मुकुंदसेवीजनः जातुकदाचित् कथंचनकुयो
निगतोपिसंसृतिंनाव्रजेत् नाविशेत् अंगअहो अन्यवत्केवलकर्मनिष्ठवत् इतिवैधर्म्यदृष्टांतः कुतइ
त्यतआह मुकुंदांघ्रोःउपगूहनं आलिंगनंयत् पुनःस्मरन्विहातुंनेछेत् यतोऽयंजनोरसग्रहः रसेन
रसनीयेनगृह्यतेवशीक्रियते यद्वारसनीयेग्रहःआग्रहोयस्य तदुक्तंभगवता यततेचततोभूयःसंसिद्धौकुरु
नंदन पूर्वाभ्यासेनतेनैवह्रियतेह्यवशोपिसइति १९

भा०प्र० प्रियंश्रवोयशोयस्यतस्मिन्भगवतिलब्धरुचेर्ममास्खलिताऽप्रतिहतामतिरभवदित्यनुषंगः यथामत्यापरेप्र
२५ पंचातीतेब्रह्मणिमयिसदसत्स्थूलंसूक्ष्मंचएतच्छरीरंस्वमाययास्वाविद्ययाकल्पितं नतुवस्तुतोऽस्तीतितद्ब्र
ह्मण्येवपश्यामि २७ एवंभूतत्वंपदार्थज्ञाने देहादिकृतविक्षेपनिवृत्ते तत्कारणभूतरजस्तमोनिवर्त्तिका

तस्मिंस्तदालब्धरुचेर्महामुनेप्रियश्रवस्यस्खलितामतिर्मम यथाहमेतत्सदसत्स्वमा
ययापश्येमयिब्रह्मणिकल्पितंपरे २७ इत्थंशरत्प्रावृषिकावृतूहरेर्विशृण्वतोमेनुसवं
यशोमलं संकीर्त्यमानंमुनिभिर्महात्मभिर्भक्तिःप्रवृत्तात्मरजस्तमोपहा २८ तस्यैवंमे
नुरक्तस्यप्रश्रितस्यहतैनसः श्रद्दधानस्यबालस्यदांतस्यानुचरस्यच २९ ज्ञानंगुह्यत
मंयत्तत्साक्षाद्भगवतोदितं अन्ववोचन्गमिष्यंतःकृपयादीनवत्सलाः ३० येनैवा
हंभगवतोवासुदेवस्यवेधसः मायानुभावमविदंयेनगच्छंतितत्पदं ३१ श्री राम

दृढाभक्तिर्जातेत्याह इत्थमितिहरेर्यशः अनुसवंत्रिकालं २८ तस्येतिविज्ञाततत्सुहृत्त्वंपदार्थस्यदृढभक्तिमतो
मेप्रश्रितस्यविनीतस्य २९ गुह्यतममितिसाधनभूतधर्मतत्वज्ञानंगुह्यंतत्साध्यंविविक्तात्मज्ञानंगुह्यतरं तस्मा
दप्यपरज्ञानंगुह्यतमंभगवतोदितंभागवतंशास्त्रंअन्ववोचन् उपदिष्टवंतः ३० तदेवज्ञानंपूर्वोक्तत्वंपदा २५
र्थज्ञानात्विवेकेनदर्शयति येनैवेति अविदंज्ञातवानहं ३१ श्री श्री रामरामरामरामरामरामरामरा

सत्संगतो हरिकथाश्रवणादिफलं स्ववृत्तांतेन प्रपंचयति अहं पुरा पूर्वकल्पे अतीतभवे पूर्वजन्मनि वेदवा
दिनां दास्याः सकाशाद्भवं जातोस्मि निरूपितो नियुक्तः क्व योगिनां शुश्रूषणे प्रावृषि वर्षोपलक्षिते चातुर्मा
स्ये निर्विविक्षतां निर्विश्य एकत्र वासं कर्तुमिच्छतां २३ अपेतानि अखिलानि चापलानि यस्मात्तस्मिन्निय

अहं पुरातीतभवेऽभवं मुने दास्यास्तु कस्याश्चन वेदवादिनां निरूपितो बालक एव योगिनां
शुश्रूषणे प्रावृषि निर्विविक्षतां २३ ते मय्यपेताऽखिलचापलेर्भके दांतेऽधृतक्रीडनकेऽनु
वर्तिनि चक्रुः कृपां यद्यपि तुल्यदर्शनाः शुश्रूषमाणे मुनयोल्पभाषिणि २४ उच्छिष्टले
पाननुमोदितो द्विजैः सकृत्स्म भुंजे तदपास्तकिल्बिषः एवं प्रवृत्तस्य विशुद्धचेतसस्तद्धर्म
एवात्मरुचिः प्रजायते। २५ तत्रान्वहं कृष्णकथाः प्रगायतामनुग्रहेणाशृणवं मनोहराः ताः
श्रद्धया मेऽनुपदं विशृण्वतः प्रियश्रवस्यंग ममाभवद्रुचिः २६

तेंद्रिये अधृतक्रीडनके त्यक्तक्रीडासाधने अनुवर्तिनि अनकूले २४ उच्छिष्टस्य लेपान् पात्रलग्नान्
तैर्द्विजैरनुज्ञातः सन् सकृत् भुंजेस्म तेन भोजनेनापास्तकिल्बिषो जातोस्मि तेषां धर्मे परमेश्वरभज
नेएव आत्मनो मनसो रुचिः प्रजायते स्मेत्यनुषंगः २५ अशृणवं श्रुतवानस्मि मे श्रद्धया ममेव स्वतः सिद्ध
या नत्वन्येन बलाज्जनितया अतो ममेत्यस्यापौनरुक्त्यं २६ ॥ ६५६ ॥ ६ ॥ ६ ॥ ६ ॥

भा॰ प्र॰ भगवदर्पणेनक्रियमाणंकर्मभक्तियोगंजनयतीतिसदाचारेणदर्शयति यत्रयदाभगवतःशिक्षयाकर्मा
२६ णिकुर्वाणाभवंति तदाकृष्णस्यगुणनामानिगृणंति अनुस्मरंतिचकृत्स्नमित्यर्थः इयंचभगवच्छिक्षा यत्क
रोषियदश्नासियज्जुहोषिददासियत् यत्तपस्यसिकौंतेयतत्कुरुष्वमदर्पणमिति ३६ कीर्त्तनस्मरणरूपभक्ति
हेतुत्वमुक्तं ध्यानहेतुत्वमाहद्वाभ्यां नमइति नमोधीमहिमनसानमनंकुर्वीमहि ३७ अमूर्त्तिकंमंत्रोक्तव्यति।

कुर्वाणायत्रकर्माणिभगवच्छिक्षयासकृत् गृणंतिगुणनामानिकृष्णस्यानुस्मरंतिच ३६ ॐ
नमोभगवतेतुभ्यंवासुदेवायधीमहि प्रद्युम्नायानिरुद्धायनमःसंकर्षणायच ३७ इतिमूर्त्त्य
भिधानेनमंत्रमूर्त्तिममूर्त्तिकं यजतेयज्ञपुरुषंससम्यग्दर्शनःपुमान् ३८ इमंस्वनिगमंब्रह्मन्न
वेत्यमदनुष्ठितं अदान्मेज्ञानमैश्वर्यंस्वस्मिन्भावंचकेशवः ३९ त्वमप्यदभ्रश्रुतविश्रुतंविभोः ४१
समाप्यतेयेनविदांबुभुत्सितं प्रख्याहिदुःखैर्मुहुरर्दितात्मनांसंक्लेशनिर्वाणमुशंतिनान्यथा ४०

रिक्तमूर्त्तिशून्यंयजतेपूजयति सपुमान्सम्यग्दर्शनोभवति ३८ एवंचकृतवतिमयिहरिःस्वसदृशंज्ञानादि।
कंदत्तवानित्याह इममिति इमंस्वनिगमंस्वोपदेशंमयानुष्ठितंअवेत्यज्ञात्वा भावंप्रीतिंच ३९ अतस्त्व
मप्येवंकुर्वित्याह त्वमिति अदभ्रमनल्पंश्रुतंयस्य हेअदभ्रश्रुत विभोर्विश्रुतंयशः प्रख्याहिकथयये
नविश्रुतेनबुद्धेन विदांविदुषांबुभुत्सितंबोद्धुमिष्टंसमाप्यते यतःदुःखैःपीडितानांक्लेशशांतिंप्रकारां २६

तत्साधनधर्मरहस्यंचसूचितमित्याह एतदिति तापत्रयस्याध्यात्मिकादेश्चिकित्सितंभेषजंनिवर्त्तकंसत्त्वशोधकमि
त्तियावत् किंतत् भगवतिभावितंसमर्पितंयत्कर्मतत् कथंभूते भगवतिईश्वरेसर्वनियंतरि एवमपिचब्रह्मणित्र
प्रच्युतपूर्णरूपे ३२ ननुसंसारहेतोःकर्मणःकथंतापत्रयनिवर्त्तकत्वंसामग्रीभेदेनघटतइतिसदृष्टांतमाहद्वा
भ्यां यश्चामयोरोगः येनघृतादिनाजायते तदेवकेवलमामयकारणभूतंद्रव्यंतमामयंनपुनातिननिवर्त्तयो

एतत्संसूचितंब्रह्मन्तापत्रयचिकित्सितम् यदीश्वरेभगवतिकर्मब्रह्मणिभावितं ३२
आमयोयेनभूतानांजायतेयश्चसुव्रत तदेवह्यामयंद्रव्यंनपुनातिचिकित्सितं ३३ ए
वंनृणांक्रियायोगाःसर्वेसंसृतिहेतवः तएवात्मविनाशायकल्पंतेकल्पिताःपरे ३४
यदत्रक्रियतेकर्मभगवत्परितोषणं ज्ञानंयत्तदधीनंहिभक्तियोगसमन्वितम् ३५

तीत्यर्थः किंतुचिकित्सितंद्रव्यांतरैर्भावितंसत्पुनात्येवयथा ३३ तथाआत्मविनाशायकर्मनिवृत्तये
कल्पंतेसमर्थाभवंति परेईश्वरेकल्पितास्संतः अत्रचप्रथमंमहत्सेवा ततस्तत्कृपा ततस्तद्धर्मेश्रद्धा ततोभ
गवत्कथाश्रवणं ततोभगवतिरतिः तयाचदेहद्वयविवेकज्ञानं ततोदृढाभक्तिः ततोभगवत्तत्त्वज्ञानं ततस्तत्कृ
पयासर्वज्ञत्वादिभगवद्गुणाविर्भाव इतिक्रमोद्रष्टव्यः ३४ ननुज्ञानेनाज्ञानप्राप्तकर्मनाशः तच्चज्ञानंभक्तियोगाद्भवति
कथंकर्मणाकर्मनाशःस्यात्तत्राह यदत्रेति ३५

भा० प्र० २७ तत्रतावत्किंचित्कालंतत्रैवमातृस्नेहयंत्रितोन्यवसमित्याहत्रिभिः एकएवाहमात्मजोयस्याःसायोषिन्मूढे
तिचस्नेहानुवंधेहेतुः ६ किंकरीत्वस्यार्थप्रपंचयति अस्वतंत्रासा अतोनकल्यानसमर्थाआसीत् दारुम
यीयोषेत्यतिपारवश्ये दृष्टांतः तदेवंसास्नेहंचक्रे ७ अहंचदिगादिष्वनभिज्ञः अतस्तत्रैवन्यवसमित्याह

धो एकात्मजामेजननीयोषिन्मूढाचकिंकरी मय्यात्मजेनान्यगतौचक्रेस्नेहानुवंधनं ६ सास्व
तंत्रानकल्पासीद्योगक्षेमंममेच्छती ईशस्यहिवशेलोकोयोषादारुमयीयथा ७ अहं
चतद्ब्रह्मकुलेऊषिवांस्तदपेक्षया दिग्देशकालाव्युत्पन्नोवालकःपंचहायनः ८ एक
दानिर्गतांगेहाद्दुहंतींनिशिगांपथि सर्पोऽदशत्पदास्पृष्टःकृपणांकालचोदितः ९
तदातदहमीशस्यभक्तानांशमभीप्सतः अनुग्रहंमन्यमानःप्रातिष्ठंदिशमुत्तरम् १०

अहंचतस्मिन्ब्रह्मकुले तस्यामातुःस्नेहानुवंधस्यापेक्षया कदाविरमेदिप्रतीक्षयादित्यर्थः ऊषिवान्
वासंकृतवान् पंचहायनःपंचवर्षः गेहान्निर्गतांगांदुहंतीं हेतौशतृप्रत्ययः दोग्धुंनिर्गतामित्यर्थः प
दापादेन आस्पृष्टःईषदाक्रांतःअदशत् ९ ततमातृमरणंशंकल्याणमभीप्सतईशस्यानुग्रहंमन्यमानः। २१
प्रातिष्ठंप्रस्थितोस्मि १०

इतिप्रथमेपंचमः ५ व्यासस्यप्रत्ययार्थंचषष्ठेप्राग्जन्मसंभवं स्वभाग्येनारदःप्राहकृष्णसंकथनो
द्भवं १ स्वयमपितथाचिकीर्षुर्गुरूपदेशानंतरंभावितच्चरितंपृच्छति भिक्षुभिरिति विप्रवसितेदूरदे
शगमनेकृतेसति विज्ञानस्योपदेष्टृभिः २ परंवयउत्तरमायुः तेत्वयाकथंवर्त्तितंनीतं इदमिति दा

इतिश्रीमद्भागवतेमहापुराणेप्रथमस्कंधेव्यासनारदसंवादेनामपंचमोध्यायः ५ सूतउ
वाच एवंनिशम्यभगवान्देवर्षेर्जन्मकर्मच भूयपप्रच्छतंब्रह्मन्व्यासःसत्यवतीसुतः १
श्रीवेदव्यासउवाच भिक्षुभिर्विप्रवसितेविज्ञानादेष्टृभिस्तव वर्त्तमानोवयस्याद्येततः
किमकरोद्भवान् २ स्वायंभुवकयावृत्त्यावर्त्तितंतेपरंवयः कथंचेदमुदस्राक्षीःकाले
प्राप्तेकलेवरं ३ प्राक्कल्पविषयामेतांस्मृतिंतेसुरसत्तम नह्येषव्यवधात्कालएषसर्वनि
राकृतिः ४ नारदउवाच भिक्षुभिर्विप्रवसितेविज्ञानादेष्टृभिर्मम वर्त्तमानोवयस्याद्ये
तएतदकारषं ५

सीपुत्रभूतंकलेवरं उदस्राक्षीः उत्सृष्टवानसि ३ एषकल्पांतलक्षणएककालः तेस्मृतिंकथंनव्यवधा
त्खंडितवान् अडागमाभावस्त्वार्षः यतएषसर्वस्यनिराकृतिरपलापीयस्मात्सः ४ अकारषंकृ
तवानहं रेफषकारयोर्विश्लेषः छंदोनुरोधेन ५ श्रीरामनारायणवासुदेवगोविंदवैकुंठमुकुं

भा० प्र० घोरं दुःसहं प्रतिभयाकारं भयंकररूपं व्यालादीनामजीरं क्रीडास्थानं एवं दृष्टवानोस्मि १४ परिश्रांतेंद्रिया
२८ णि आत्मा देहश्च यस्य तृषा परीतो व्याप्तः उपस्पृष्ट आचांतः १५ पिप्पलोपस्थे अश्वत्थमूले आश्रित उप
विष्टः आत्मना बुद्ध्या आत्मस्थं हृदिस्थं आत्मानं परमात्मानं १६ भावेन भक्त्या निर्जितं यच्चेतस्तेन औ

एक एवातियातो हमद्राक्षं विपिनं महत् घोरं प्रतिभयाकारं व्यालोलूकशिवाजिरं १४ प
रिश्रांतेंद्रियात्माहं तृट्परीतो बुभुक्षितः स्नात्वा पीत्वा ह्रदे नद्या उपस्पृष्टो गतश्रमः १५ त
स्मिन्निर्मनुजेरण्ये पिप्पलोपस्थ आश्रितः आत्मनात्मानमात्मस्थं यथाश्रुतमचिंतयं
१६ ध्यायतश्चरणांभोजं भावनिर्जितचेतसा औत्कंठ्याश्रुकलाक्षस्य हृद्यासीन्मे शनैर्हरिः ॥
१७ प्रेमातिभरनिर्भिन्नपुलकांगोतिनिर्वृतः आनंदसंप्लवे लीनो नापश्यमुभयं मुने १८ ॥
रूपं भगवतो यत्तन्मनःकांतं शुचापहं अपश्यन्सहसोत्तस्थे वैक्लव्याद्दुर्मना इव १९ ॥ ॥

त्कंठ्येन अश्रुकलायुक्ते अक्षिणी यस्य १७ प्रेम्णातिभरेण निर्भिन्नपुलकानि अंगानि यस्य आनंदसं
प्लवे महापूरे परमानंदे उभयं आत्मानं परं च १८ मनसः कांतमभिष्टं शुचा शोकः तां अपहंती २८
ति तथा ततः उत्तस्थे उत्थितोस्मि १९ ॥

स्फीतान् जनपदादीन् अतियातः सन् महद्विपिनम् अद्राक्षम् इति चतुर्थेनान्वयः जनपदादिषु नानागुणदोष
युक्तेषु समदृष्टिः सन् गतोहम् इति तात्पर्यार्थः स्फीतान् समृद्धान् देशान् तत्र तस्यां दिशि पुरग्रामव्रजाकरान्
तत्र पुराणि राजधान्य ग्रामाः भृगुप्रोक्ताः विप्राश्च विप्रभृत्याश्च यत्र चैव वसंति ते स तु ग्राम इति प्रोक्तः शूद्राणां
वास एव चेति व्रजा गोकुलानि आकराः रत्नाद्युत्पत्तिस्थानानि तान् खेटाः कर्षकग्रामाः खर्वटा गिरितट
ग्रामाः भृगुप्रोक्ता वा एकतो यत्र तु ग्रामो नगरं चैकतः स्थितं मिश्रं तु खर्वटं नाम नदीगिरिसमाश्रयम् इति ॥

स्फीतान्जनपदांस्तत्र पुरग्रामव्रजाकरान् खेटखर्वटवाटीश्च वनान्युपवनानि च ११ चि
त्रधातुविचित्राद्रीन्भग्नभुग्नद्रुमान् जलाशयान्शिवजलान् नलिनीः सुरसेविताः
१२ चित्रस्वनैः पत्ररथैर्विभ्रमद्भ्रमरश्रियः नलवेणुशरस्तंबकुशकीचकगह्वरं १३ ॥

वाट्यः पूगपुष्पादीनां वाटिकाः ताः वनानि स्वतःसिद्धवृक्षाणां समूहाः उपवनानि रोपितवृक्षाणां समू
हाः तानि च ११ चित्रैः धातुभिः स्वर्णरजताद्यैर्विचित्रान् अद्रींश्च भग्नैर्भग्ना भुग्नाः शाखा येषां ते द्रुमा येषु तान्
शिवानि भद्राणि जलानि येषां तान् नलिनीः सरसीश्च वाः सुवना येषां तैः पत्ररथैः पक्षिभिः तन्नादप्रचुरैरित्यर्थः ॥
विभ्रमद्भिर्भ्रमरैः श्रीः शोभा यासां ता नलिनीः १२ अतियातः अतिक्रम्य गतः सन् महद्विपिनं वनम् अद्राक्षं कीदृशं नल
वेणुशराणां स्तंबैः कुशैः कीचकैश्च गह्वरं दुर्गमं तत्र वेणुजात य एव विपुला तरागर्भाः कीचकाः १३

भा० प्र० २९ तत्प्रसिद्धं महद्भूतं अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेद इत्यादिश्रुतेः कीदृशं ईश्वरं सर्वनियंतर
नभसि लिंगं मूर्त्तिर्यस्य तत् नभोलिंगं सन्निहितमपि नलिंगत इत्यलिंगं तस्मैत्र दृष्टाय अवनामं प्रणामं विद
धे कृतवानहं तेनानुकंपितः सन् २६ हृत्तत्रपस्य कलञ्जः विमत्सरो जातो ऽस्मीति शेषः २७ कालेस्वावसरे

एतावदुक्त्वोपरराम तन्महद्भूतं नभोलिंगमलिंगमीश्वरं अहं च तस्मै महतां महीयसे शी
र्ष्णावनामं विदधेनुकंपितः २६ नामान्यनंतस्य हतत्रपः पठन् गुह्यानि भद्राणि कृता
नि च स्मरन् गां पर्यटंस्तुष्टमना गतस्पृहः कालं प्रतीक्षन् विमदो विमत्सरः २७ एवं
कृष्णमते ब्रह्मन् सक्तस्यामलात्मनः कालः प्रादुरभूत्काले तडित्सौदामनी यथा २८

कालो मृत्युः प्रादुरभूदाविर्बभूव अकस्मात्प्रादुर्भावे दृष्टांतः विद्युदिवेति सौदामिनीति वि
शेषणं स्फुरत्वप्रदर्शनार्थं सुदामा माला तत्र भवा सौदामिनी मालाकारेत्यर्थः यद्वा सुदामा पर्वतः
तेनैकदिशि तिस्रस्त्रेण स्फटिकादिमयपर्वतप्रांते भवा हि विद्युदति स्फुटा भवति तद्वदित्यर्थः २९
यद्वा तडिदित्यं तिक इत्यर्थः तडिदित्यं तिवज्रयोरिति नैरुक्तस्मरणात् २८

हृदि मनः प्रणिधाय स्थिरीकृत्य अवितृप्त इवाहमातुरोऽभवमिति शेषः २० गिरामगोचरः संवेदनस्याविषयभूत ईश्वरः २१ हंतेति सानुकंपसंबोधने मा इति मां द्रष्टुं नार्हति यतः न विपक्वाः न दग्धाः कषायाः मलाः कामादयो येषां तेषां कुयोगिनां अनिष्पन्नयोगानां २२ कुतस्तर्हि दृष्टोऽस्मि तत्राह सकृद्दर्शितं मयेति यत्त

दिदृक्षुस्तदहं भूयः प्रणिधाय मनो हृदि वीक्षमाणोपि नापश्यमवितृप्त इवातुरः २० एवं यतंतं विजने मामाहागोचरो गिरां गंभीरश्लक्ष्णया वाचा शुचः प्रशमयन्निव २१ हंतास्मिन्जन्मनि भवान्मा मां द्रष्टुमिहार्हति अविपक्वकषायाणां दुर्दर्शोहं कुयोगिनां २२ सकृद्यद्दर्शितं रूपमेतत्कामाय तेनघ मत्कामः शनकैः साधुः सर्वान्मुंचति हृच्छयान् २३ सत्सेवयादीर्घयापि जाता मयि दृढा मतिः हित्वाऽवद्यमिमं लोकं गंता मज्जनतामसि २४ मतिर्मयि निबद्धेयं न विपद्येत कर्हिचित् प्रजासर्गनिरोधेपि स्मृतिश्च मदनुग्रहात् २५॥

एतत्कामाय मयि अनुरागाय त्वत्कामेन किमित्यत आह मत्कामः पुमान् हृच्छयान् कामान् २३ अदीर्घयापि सतां सेवया अवद्यं निंद्यं लोकं देहं मज्जनतां मत्पार्षदतां पार्षदतां गंतासि २४ प्रजानां सर्गस्य निरोधे संहारेपि प्रजासर्गस्य निरोधे इति वा २५ श्रीरामनारायणकृष्णदामोदरमाधव

येकर्म्मिणस्ते वहिर्न यांति तत्तपआदिभिः वहिर्लोकंगताः अंतर्नयांति अहंतु महाविष्णोरनुग्रहात् अखंडित
भा० प्र० ब्रह्मचर्य्यव्रतः सन्नंतर्वहिश्च पर्येमि पर्यटामि क्वचिदपि अविहतघाता प्रतिहता गतिर्यस्य सः ३२ किमिति
३० पर्य्यटसि इत्यपेक्षायां लोकमंगलार्थमित्याह चतुर्भिः देवेन ईश्वरेण दत्ता स्वराः निषादर्षभगांधारषड्ज
मध्यमधैवतपंचमाइति सप्तमएवब्रह्म ब्रह्माभिव्यंजकत्वात् तेनविभूषितां स्वतःसिद्धसप्तस्वराणामित्य

अंतर्वहिश्चलोकांस्त्रीन्पर्य्येम्यस्कंदितव्रतः अनुग्रहान्महाविष्णोरविघातगतिः क्वचि
त् ३२ देवदत्तामिमांवीणांस्वरब्रह्मविभूषितां मूर्छयित्वाहरिकथांगायमानश्चराम्यहं
३३ प्रगायतःस्व[illegible]वीर्य्याणितीर्थपादःप्रियश्रवाः आहूतइवमेशीघ्रंदर्शनंयातिचेत
सि ३४ एतद्ध्यातुरचित्तानांमात्रास्पर्शेच्छयामुहुः भवसिंधुप्लवोदृष्टोहरिचर्य्यानुवर्णनं ३५

र्थः मूर्छयित्वा मूर्छनालापवतीकृत्वा ३३ स्वप्रयोजनमाह प्रगायतइति ३४ परप्रयो
जनमाह एतद्धीति मात्राः विषयास्तेषांस्पर्शाः भोगाः तेषामिच्छया आतुराणिचित्तानियेषाम
हरिचर्य्यानुवर्णनं यतः एतदेवभवसिंधुप्लवःपोतः नकेवलंश्रुतिप्रमाण्येन किंत्वन्वयव्यतिरेका ३०
भ्यांदृष्टएवेत्यर्थः ३५

प्रयुज्यमानेमयितामिति अयमर्थः हित्वावद्यमिमंलोकंगंतामज्जनतामसीतिभगवत्पार्षदरूपाशुद्
सत्वमयितनुः प्रतिश्रुतातांप्रतिभगवतामयिप्रयुज्यमानेनीयमाने आरब्धंयत्कर्मतन्निर्वाणंस
माप्तिंयस्य एकस्यांसोदामिन्यांतद्देवान्यासोदामि नीकदाचिद्यथाभवतितथैवममपांचभौतिकदेहभंगका
लएवशुद्धपार्षददेहप्राप्तिकालोयुगपदभूदिति आर आरब्धकर्मणोनिर्वाणमेवनिर्वाणंयस्येतिवासः पंच
भूतात्मकोदेहोन्यपतत् अनेनपार्षदतनूनामकर्मारब्धत्वंशुद्धत्वंनित्यत्वमित्यादिसूचितं २९ इदंत्रैलोक्यं

प्रयुज्यमानेमयितांशुद्धांभागवतींतनुम् आरब्धकर्मनिर्वाणोन्यपतत्पांचभौतिकः २९
कल्पांतइदमादायशयानेंभस्युदन्वतः शिशयिषोरनुप्राणंविविशेंतरहंविभोः ३०
सहस्रयुगपर्य्यंतउत्थायेदंसिसृक्षतः मरीचिमिश्राऋषयःप्राणेभ्योहंचजज्ञिरे ३१

आदायउदन्वतः एकार्णवस्यांभसिशयानेश्रीनारायणेशिशयिषोः शयनंकर्त्तुमिच्छोर्विभोर्ब्रह्मणोंत
तः मध्यं अनुप्राणंनिश्वासेनसहविविशेप्रविष्टोहं तलोवर्तीयोविश्वात्मादेहमाविश्यचक्रिणः अवापवैस्वंवि
निद्रंएकीभूयाथविष्णुनेतिकमोक्तेः स्वायनेंभसीतिपाठे स्वायने स्वस्यायने अंभसिशिशयिषोः ब्र
ह्मणइति श्रीनारायणेनाभेदविवक्षयोक्तमिति अवगंतव्यं ३० प्राणेभ्यः इंद्रियेभ्यः अहंमरीचि
मिश्राः तन्मुख्याऋषयश्चजज्ञिरे ३१

भा० प्र०
३२

ब्रह्मनद्यां ब्रह्मदैवतायां ॥ ब्राह्मणैरन्वितायां वा सत्रं कर्म वर्द्धयतीति तथा ॥ २ ॥ बदरीणां षंडेन समूहेन मंडिते ॥ मनः
प्रणिदध्यौ स्थिरीचकार ॥ समाधिनानुस्मरेति नारदोपदिष्टं ध्यानं कृतवानित्यर्थः ॥ ३ ॥ प्रणिहिते निश्चले ॥ अत्र हेतु
र्भक्तियोगेनामले सर्वं प्रथमं तु तमीश्वरमपश्यत् पूर्णमिति वा पाठः ॥ तदपाश्रयां ईश्वराश्रयां तदधीनां मायां चापश्य
त् ॥ ४ ॥ ईशमायाकृतां च जीवानां संसृतिमपश्यदित्याह ॥ ययेति सम्मोहितः स्वरूपावरणेन विक्षिप्तः ॥ परोऽपि ॥ गुणत्र
याद्व्यतिरिक्तोऽपि ॥ तत्कृतं त्रिगुणात्माभिमानकृतमनर्थं च कर्तृत्वादिकं प्राप्नोति ॥ ५ ॥ अनर्थमुपशमयति ॥ योऽधो

सूत उवाच ॥ ब्रह्मनद्यां सरस्वत्यामाश्रमः पश्चिमे तटे ॥ शम्याप्राश इति प्रोक्त ऋषीणां सत्रवर्द्धनः ॥ २ ॥ त
स्मिन्स्व आश्रमे व्यासो बदरीषंडमंडिते ॥ आसीनोऽप उपस्पृश्य प्रणिदध्यौ मनः स्वयं ॥ ३ ॥ भक्तियोगे
न मनसि सम्यक्प्रणिहितेऽमले ॥ अपश्यत्पुरुषं पूर्णं मायां च तदपाश्रयां ॥ ४ ॥ यया संमोहितो जी
व आत्मानं त्रिगुणात्मकं ॥ परोऽपि मनुतेऽनर्थं तत्कृतं चाभिपद्यते ॥ ५ ॥ अनर्थोपशमं साक्षाद्भक्तियो
गमधोक्षजे ॥ लोकस्याजानतो विद्वांश्चक्रे सात्वतसंहितां ॥ ६ ॥

क्षजे साक्षाद्भक्तियोगं तं चापश्यत् ॥ एतत्
सर्वं स्वयं दृष्ट्वा एवमजानतो लोकस्यार्थे ॥ सात्वतसंहितां श्रीभागवताख्यां चक्रे ॥ तदनेन श्लोकत्रयेण भागवतार्थः
संक्षेपतो दर्शितः ॥ एतदुक्तं भवति ॥ विद्याशक्त्या मायानियंता नित्याविर्भूतपरमानंदस्वरूपः सर्वज्ञः सर्वशक्तिरीश्वर
स्तन्मायया संमोहितस्तिरोभूतस्वरूपस्तद्विपरीतधर्मा जीवस्तस्य चेश्वरभक्त्या लब्धज्ञानेन मोक्ष इति तदुक्तं स्वा
मिना ह्लादिन्या संविदाश्लिष्टः सच्चिदानंद ईश्वरः ॥ स्वाविद्यासंवृतो जीवः संक्लेशनिकराकरः ॥ १ ॥ तथा स ईशो यद्वशे माया स

एतदेव उक्तमवधारणमनुभवेन दढयति ॥ यमादिभिर्योगैर्यथा न शाम्यति ॥ यद्वन्मुकुंदसेवया अद्धा साक्षात् ॥ आ
त्मा मनः शाम्यति कथंचिन्मुकुंदसेवामात्रेण शाम्यति किंपुनस्तद्गुणवर्णनेनेति भावः ॥ ३५ ॥ भवतो मनः परितोष
कं चाख्यातं ॥ ३६ ॥ आमंत्र्य अनुज्ञाप्य याद्दच्छिकः स्वप्रयोजनसंकल्पशून्यः ॥ ३७ ॥ हरिकथागायकं श्लाघंते

त्मा१

यमादिभिर्योगपथैः कामलोभहतो मुहुः ॥ मुकुंदसेवया यद्वत्तथात्माद्धा न शाम्यति ॥ ३५ ॥ सर्वं
तदिदमाख्यातं यत्पृष्टोहं त्वयानघ ॥ जन्मकर्मरहस्यं मे भवतश्चात्मतोषणं ॥ ३६ ॥ सूत उ
वाच ॥ एवं संभाष्य भगवान्नारदो वासवीसुतं ॥ आमंत्र्य वीणां रणयन्ययौ याद्दच्छिको
मुनिः ॥ ३७ ॥ अहो देवर्षिर्धन्योयं यत्कीर्तिं शार्ङ्गधन्वनः ॥ गायन्माद्यन्निदं तंत्र्या रमय
त्यातुरं जगत् ॥ ३८ ॥ इति श्रीमद्भागवते महापुराणे प्रथमस्कंधे षष्ठोध्यायः ॥ ६ ॥ शौन
क उवाच ॥ निर्गते नारदे सूत भगवान्बादरायणिः ॥ श्रुतवांस्तदभिप्रेतं ततः किमकरोद्विभुः ॥ १

अहो इति मायन्नृष्यन् ॥ तंत्र्या वीणया ॥ ३८ ॥ इति प्रथमे षष्ठः ॥ ६ ॥ अथ भागवतश्रोतुर्जन्मवक्तुं परीक्षि
तः सप्तवालयधार्ष्ट्र्याणेदंडं सप्तमउच्यते ॥ १ ॥ तस्य नारदस्याभिप्रेतं श्रुतवान् सन् ॥ १ ॥ श्रीरामरामस

परीक्षितेर्जन्म निरूपयिष्यन्नादौ तावद्गर्भस्य एवाश्वत्थाम्नो ब्रह्मास्त्रात् कृष्णेन रक्षित इति वक्तुं कथां
प्रस्तौति ॥ यदेत्यादिना ॥ यदा द्रौणिरश्वत्थामा कृष्णासुतानां ॥ द्रौपदीपुत्राणां शिरांस्युपाहरत् ॥ तदा तेन्मा
ताऽरुदत् ॥ तां च सांत्वयन् किरीटमाली ॥ अर्ज्जुन आहेति तृतीयेनान्वयः ॥ किमिति बालानां शिरांस्यानीतवा
न् ॥ इत्यपेक्षायामाह ॥ मृधे युद्धे ॥ यद्यपि पांडवा अपि कौरवा एव तथापि सृंजयवंशजो धृष्टद्युम्नः पांडवा

यदा मृधे कौरवसृंजयानां वीरेष्वथो वीरगतिं गतेषु ॥ वृकोदराविद्धगदाभिमर्शभग्नोरुदं
डे धृतराष्ट्रपुत्रे ॥ १३ ॥ भर्त्तुः प्रियं द्रौणिरिति स्म पश्यन् कृष्णासुतानां स्वपतां शिरांसि ॥ उपा
हरद्विप्रियमेव तस्य जुगुप्सितं कर्म विगर्हयंति ॥ १४ ॥ माता शिशूनां निधनं सुतानां निशम्य
घोरं परितप्यमाना ॥ तदारुदद्बाष्पकलाकुलाक्षी तां सांत्वयन्नाह किरीटमाली ॥ १५ ॥

नां सेनापतिरिति सृंजयानामित्युक्तं ॥ वीरगतिं स्वर्गं अथो अनंतरं वृकोदरेणाविद्धायाः क्षिप्ताया गदाया गदाया
अभिमर्शेन पातेन भग्नावूरुदंडौ यस्य ॥ तथाभूते धृतराष्ट्रपुत्रे दुर्य्योधने सति ॥ १३ ॥ भर्त्तुः दुर्य्योधनस्य स्मेति
वितर्के इति एवं स्यादिति पश्यन् ॥ तस्य तद्विप्रियमेवेति वाक्यांतरं ॥ विप्रियत्वे हेतुः जुगुप्सितमिति ॥ १४ ॥ घोरं
दुःसहं यदाभवत् ॥ बाष्पकलाभिर्विन्दुभिराकुले अक्षिणी यस्याः सा किरीटस्यैकत्वेपि तदग्राणां बहुत्वात् किरीटमा

संहितायामनर्थोपशमकत्वं दर्शयति ॥ यस्यां श्रूयमाणायामेव किंपुनः श्रुतायामित्यर्थः ॥ ७ ॥ अनुक्रम्य शो
धयित्वा ॥ ८ ॥ कस्य वा हेतोर्महतीं विततां ॥ ९ ॥ निर्ग्रंथाः ग्रंथेभ्यो निर्गताः ॥ तदुक्तं गीतासु ॥ यदा ते मोहकलिलं बु
द्धिर्व्यतितरिष्यति ॥ तदा गंतासि निर्वेदं श्रोतव्यस्य श्रुतस्य चेति ॥ यद्वा ॥ ग्रंथिरेव ग्रंथः निर्वृत्तहृदयग्रंथयइत्य

यस्यां वै श्रूयमाणायां कृष्णे परमपूरुषे ॥ भक्तिरुत्पद्यते पुंसां शोकमोहभयापहा ॥ ७ ॥ स
संहितां भागवतीं कृत्वानुक्रम्य चात्मजं ॥ शुकमध्यापयामास निवृत्तिनिरतं मुनिः ॥ ८ ॥ शौनक
उवाच ॥ स वै निवृत्तिनिरतः सर्वत्रोपेक्षको मुनिः ॥ कस्य वा महतीमेतामात्मारामः समभ्यसत् ॥ ९ ॥
सूत उवाच ॥ आत्मारामाश्च मुनयो निर्ग्रंथा अप्युरुक्रमे ॥ कुर्वंत्यहैतुकीं भक्तिमित्थंभूतगुणो हरिः ॥ १० ॥
हरेर्गुणाक्षिप्तमतिर्भगवान्बादरायणिः ॥ अध्यगान्महदाख्यानं नित्यं विष्णुजनप्रियः ॥ ११ ॥ परीक्षि
मे१ तो ऽथ राजर्षेर्जन्मकर्मविलापनं ॥ संस्थां च पांडुपुत्राणां वक्ष्ये कृष्णकथोदयं ॥ १२ ॥
र्थः ॥ ननु मुक्तानां किं भक्त्येत्या
दि सर्वोक्षेपपरिहारार्थमाह ॥ इत्थंभूतगुण इति ॥ १० ॥ भक्तिं कुर्वंतु नाम एतच्छास्त्राभ्यासे शुकस्य किं कारणमित्यत आह हरे
रिति ॥ अध्यगात् अधीतवान् ॥ विष्णुजनाः प्रिया यस्येति ॥ आख्यानादिप्रसंगेन तत्संगतिकामइति भावः ॥ ११ ॥ एतेन तस्य पु
राणमहायोगीत्यादिना शुकस्य व्याख्याप्रवृत्तिः कथमिति यत्पृष्टं तस्योत्तरमुक्तं यदन्यत्पृष्टं परीक्षितः प्रायोपवेशोऽस्य व
र्णं कथमिति ॥ तस्य जन्म महाश्चर्यमित्यादिना तस्योत्तरं वक्तुमाह ॥ परीक्षित इति ॥ विलापनं मुक्तिः मोक्षं वा ॥ संस्था महाप्रस्था
न ॥ श्रीकृष्णकथानामुदयो यथा भवति तथा ॥ १२ ॥

भा० प्र०
३३

अशरणं ॥ रक्षकरहितं ॥ ननु पलायनमेव रक्षकमस्ति न तस्यापि कुंठितत्वादित्याह ॥ श्रांता वाजिनो यस्य
तं ~~(श्रांता वाजिनो यस्य तं)~~ ब्रह्मशिरोस्त्रं ब्रह्मास्त्रं ॥१९॥ द्विजात्मज इत्यदीर्घदर्शित्वमाह ॥ तद्ब्रह्मास्त्रं ॥ समाहितः
कृतध्यानः ॥ उपसंहारमजानतोपि संधाने हेतुः ॥ प्राणकृच्छ्र इति ॥२०॥ ततः अस्त्रात्सर्वतो दिशं प्रादुः

यदाशरणमात्मानमैक्षत श्रांतवाजिनं ॥ अस्त्रं ब्रह्मशिरो मेने आत्मत्राणं द्विजात्मजः ॥१९॥ अथो
पस्पृश्य सलिलं संदधे तत्समाहितः ॥ अजानन्नपि संहारं प्राणकृच्छ्र उपस्थिते ॥२०॥ ततः प्रा
दुरभूत्तेजः प्रचंडं सर्वतो दिशं ॥ प्राणापदमभिप्रेक्ष्य विष्णुं जिष्णुरुवाच ह ॥२१॥ अर्जुन उवाच
कृष्ण कृष्ण महा भक्तानामभयंकर ॥ त्वमेको दह्यमानानामपवर्गोसि संसृतेः ॥२२॥ त्वमा
द्यः पुरुषः साक्षादीश्वरः प्रकृतेः परः ॥ मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि ॥२३॥ स एव
जीवलोकस्य मायामोहितचेतसः ॥ विधत्से स्वेन वीर्येण श्रेयो धर्मादिलक्षणं ॥२४॥ ॥ ऽऽ

बाहो ८

कृतं प्रकटीभूतं तेजः ॥ अभिप्रेक्ष्य ततः प्राणापदं चाभिप्रेक्ष्य ॥२१॥ प्रस्तुतं विज्ञापयितुं प्रथमं स्तौति ॥ कृष्णेति चतुर्भिः
संसृतेर्हेतोर्दह्यमानानां तस्या अपवर्गो पवर्जयिता ॥ नाशक इत्यर्थः ॥२२॥ अतस्त्वमीश्वरः ॥ साक्षात्कुतः ॥ यतः प्रकृतेः परः पुरु
षः तत्कुतः ॥ यतः आद्यः कारणं ॥ कारणत्वेप्यविकारित्वमाह ॥ मायां व्युदस्य ॥ अभिभूय कैवल्यरूपे आत्मन्येव स्थित
इति ॥२३॥ त्रिवर्गदातापि त्वमेवेत्याह ॥ स इति ॥ यस्त्वं मायां अभिभूय स्थितस्स जनस्य धर्मादि फलमुपासितः सन् विध

शुचः॥ शोकाश्रूणि प्रमृज्ज्यामि॥ परिमार्जयामि॥ यत्तयदा ब्रह्मबंधोर्ब्राह्मणाधमस्य॥ आततायिन इति॥ अग्निदो गरदश्चैव
शस्त्रपाणिर्धनापहः॥ क्षेत्रदारहरश्चैव षडेते आततायिन इति स्मरणात्॥ अत्राततायीशस्त्रपाणिः॥ तेन च पुत्रहंतृत्वं ल
क्ष्यते॥ गांडीवात् धनुषो मुक्तैर्विशिखैर्बाणैरुपाहरे त्वत्समीपमानयामि॥ यत्र शिरः आक्रम्य आसनं विधाय दग्धपुत्रा सती
१६॥ वल्गावोरम्या विचित्रा जल्पा भाषणानि तैः॥ स अर्जुनः॥ अच्युत एव मित्रं सूतः सारथिर्यस्य दंशितः सकवचः॥ उग्रंधनुश्चायं
यस्य कपिर्हनुमान्ध्वजे यस्य सः॥ गुरोः पुत्रं रथेनान्वद्रवत्॥ अन्वधावत्॥ १७॥ आपतंतं आधावंतं सद्रौणिः॥ कुमारहा॥ बाल

तदा शुचस्ते प्रमृजामि भद्रे यद्ब्रह्मबंधोः शिर आततायिनः॥ गांडीवमुक्तैर्विशिखैरुपाहरे त्वाक्रम्य
गुरुपुत्रं अ यत्स्नास्यसि दग्धपुत्रा॥ १६॥ इति प्रियां वल्गुविचित्रजल्पैः संसांत्वयित्वाऽच्युतमित्रसूतः॥ अन्वाद्रवद्दं
शित उग्रधन्वा कपिध्वजो गुरुपुत्रं रथेन॥ १७॥ तमापतंतं स विलक्ष्य दूरात्कुमारहोद्विग्नमना रथेन॥ परा
द्रवत्प्राण परीप्सुरुर्व्यां यावद्गमं रुद्रभयाद्यथार्कः॥ १८॥

घाती॥ उद्विग्नमनाः कंपितहृदयः॥ प्राणपरीप्सुः
प्राणान् लब्धुमिच्छुः॥ न तु कीर्तिं यावद्गमं यावद्गंतुं शक्यं तावत्॥ उर्व्यां पराद्रवत्॥ अपलायत॥ कः ब्रह्मा॥ न गोभ्र
त्वासुतो यथ्व मुद्यतः स्यन्॥ रुद्रस्य भयात् यथा पलायते स्म॥ अर्क इति पाठे वामनपुराणे कथा सूचिता तथाहि॥ विद्यु
न्माली नाम कश्चिद्दानवः सोमाहेश्वरस्तस्मै रुद्रेण सौवर्णं विमानं दत्तं ततोऽसावर्कस्य पृष्ठतो भ्राम्यन्॥ विमानदीप्त्या रा
त्रिं विलोपितवान्॥ ततोऽर्केण निजतेजोभिर्द्रावयित्वा॥ तद्विमानं पातितं॥ तच्छ्रुत्वा कुपितेन रुद्रेण भयादर्कः पर्य्यद्रव
त्॥ ततो रुद्रस्य क्रूरदृष्ट्या दह्यमानः पतन्॥ वाराणस्यां पतितो लोलार्कनाम्ना विख्यातो जातः॥ १८॥ ॥ ॥

भा० प्र० ततस्तयोरुभयोर्ब्रह्मास्त्रयोः॥ तेजसी शरैः संवृते संवेष्टिते परस्परं मिलित्वा ववृधाते॥ अवर्धेतां॥ किं कृत्वा रोद
३४ सी द्यावापृथिव्यौ खमंतरिक्षं॥ आवृत्य यथा प्रलये संकर्षणमुखाग्निः॥ उपरिस्थितोऽर्कश्च संहत्य वर्द्धेते तद्व
त्॥ ३०॥ तयोर्द्रौणिफाल्गुनयोः तेन दह्यमानाः सांवर्तकं प्रलयाग्निं॥ अमंसत मेनिरे॥ ३१॥ लोकानां व्य
तिकरं॥ व्यत्ययं नाशमित्यर्थः॥ वासुदेवस्य मतं चालक्ष्य ब्रह्मास्त्रद्वयमुपसंहृतवान्॥ ३२॥ गौतमवंशजा

संहत्यान्योन्यमुभयोस्तेजसी शरसंवृते॥ आवृत्य रोदसी खं च ववृधातेऽर्कवह्निवत्॥ ३०॥ दृष्ट्वा
स्त्रतेजस्तु तयोस्त्रील्लोकान्प्रदहन्महत्॥ दह्यमानाः प्रजाः सर्वाः सांवर्तकममंसत॥ ३१॥ प्रजोपद्र
वमालक्ष्य लोकव्यतिकरं च तं॥ मतं च वासुदेवस्य संजहारार्जुनो द्वयं॥ ३२॥ तत आसाद्य तरसा
दारुणं गौतमीसुतं॥ बबन्धामर्षताम्राक्षः पशुं रसनया यथा॥ ३३॥ शिबिराय निनीषंतं रज्वा
बध्वा रिपुं बलात्॥ प्राहार्जुनं प्रकुपितो भगवानंबुजेक्षणः॥ ३४॥ मैनं पार्थार्हसि त्रातुं ब्रह्मबंधु
मिमं जहि॥ योऽसावनागसः सुप्तानवधीन्निशि बालकान्॥ ३५॥

गौतमी कृपी तस्याः सुतं॥ अमर्षेण को
पेन ताम्रे अक्षिणी यस्य सः॥ निष्कृपत्वे दृष्टांतः पशुं यथेति तस्य बंधनं धर्म इत्यत्र दृष्टांतः॥ यथा याज्ञिकः पशु
मिति रसनया रज्वा॥ ३३॥ शोकरोषादियुक्तस्याप्यर्जुनस्य धर्मविख्यापनाय श्रीकृष्णवाक्यं तदाह षड्भिः॥
शिबिराय राजनिवेशाय नेतुमिच्छंतं प्रकुपित इव॥ ३४॥ अनागसो निरपराधान्॥ ३५॥ ॥ ऽऽ ॥ ऽऽ ३४

छा १

तथा चानेनावतारेण तव साधुपक्षपातो लक्ष्यत इत्याह ॥ तथेति ॥ किं भूभारहरणेन तदिमात्रेण न भवति तत्रा
ह ॥ स्वानां सातीनां भक्तानां अनुध्यानाय च ॥ तथा अनन्यभावानां ॥ एकांतभक्तानां च ॥ २५ ॥ एवं स्तुत्वा प्रस्तुतं वि
ज्ञापयति किमात्मकमिदं कुतो वा आयातीति स्वचित्तवितर्के ॥ २६ ॥ इदं द्रोणपुत्रस्य ब्राह्ममस्त्रं तेन च प्राणबाधे
प्राप्ते प्रदर्शितं केवलं ॥ न तु तत्प्रयोगे कुशल इत्यर्थः ॥ यतोऽसावुपसंहारं न वेद एतच्च त्वं वेत्थ जानासि ॥ २७ ॥ प्रत्यव

तथायं चावतारस्ते भुवो भारजिहीर्षया ॥ स्वानां चानन्यभावानां अनुध्यानाय चासकृत ॥ २५ ॥
किमिदं स्वित्कुतो वेति देवदेव न वेद्म्यहं ॥ सर्वतोमुखमायाति तेजः परमदारुणं ॥ २६ ॥ श्रीभग
वानुवाच ॥ वेत्थेदं द्रोणपुत्रस्य ब्रह्ममस्त्रं प्रदर्शितं ॥ नैवासौ वेद संहारं प्राणबाध उपस्थिते ॥ २७ ॥
न ह्यस्यान्यतमं किंचिदस्त्रं प्रत्यवकर्शनं ॥ जह्यस्त्रतेज उन्नद्धमस्त्रज्ञो ह्यस्त्रतेजसा ॥ २८ ॥ सूत उ
वाच ॥ श्रुत्वा भगवता प्रोक्तं फाल्गुनः परवीरहा ॥ स्पृष्ट्वापस्तं परिक्रम्य ब्राह्मं ब्राह्माय संदधे ॥ २९ ॥

प्रत्यवमर्शनं कृशत्वकरं ॥ निवर्तकमित्यर्थः ॥ अतस्तदस्त्रतेजः उन्नद्धं उत्कटं ब्रह्मास्त्रतेजसा जहि घातय ॥ त्व
त्प्रयुक्तं चास्त्रं तदुपसंहृत्यं ॥ स्वयमुपशाम्येत ॥ यतस्त्वमस्त्रज्ञोसि ॥ २८ ॥ परे शत्रवस्त एव वीरास्तान् हंतीति त
था ॥ फाल्गुनोऽर्जुनः ॥ अपः स्पृष्ट्वा आचम्य ॥ तं श्रीकृष्णं परिक्रम्य प्रदक्षिणीकृत्य ॥ ब्रह्माय ब्रह्मास्त्रनिवर्तयिनं ॥ २९ ॥

उवाच चेति । चकाराभ्यां । संभ्रमः सूचितः । बंधनेनानयनमसहमाना ॥ ४३ ॥ सरहस्यः गोप्यमंत्रसहितः । विस
र्गः शस्त्रप्रयोगः । उपसंयमउपसंहारः ताभ्यां सहितो सुसम्महस्य ॥ ४४ ॥ तस्य द्रोणस्यात्मनो देहस्यार्द्धं कृपी आस्ते
अर्द्धत्वे हेतुः पत्नी । अर्द्धो वा एष आत्मनो यत्पत्नीति श्रुतेः । जाया पत्नी अग्नी मादधीयातामिति श्रुतेः । उभयोरेक
कारकत्वोपगमाच्च । ननु भर्त्तरि मृते कथं साजीवतीति तत्राह । नान्वगात् । भर्त्तारं । यतो वीरसूः पुत्रवती ॥ ४५ ॥ त

उवाच चासहंत्यस्य बंधनानयनं सती । मुच्यतां मुच्यतामेष ब्राह्मणो नितरां गुरुः ॥ ४३ ॥ सर
हस्यो धनुर्वेदः सविसर्गोपसंयमः । अस्त्रग्रामश्च भवता शिक्षितो यदनुग्रहात् ॥ ४४ ॥ स एष
भगवान् द्रोणः प्रजारूपेण वर्त्तते । तस्यात्मनोर्द्धं पत्न्यास्ते नान्वगाद्वीरसूः कृपी ॥ ४५ ॥ तद्ध
र्म्मज्ञ महाभाग भवद्भिर्गौरवं कुलं । वृजिनं नार्हति प्राप्तुं पूज्यं वंद्यमभीक्ष्णशः ॥ ४६ ॥ मा रोदी
दस्य जननी गौतमी पतिदेवता । यथाहं मृतवत्सार्त्ता रोदिम्यश्रुमुखी मुहुः ॥ ४७ ॥ यैः को
पितं ब्रह्मकुलं राजन्यैरजितात्मभिः । तत्कुलं प्रदहत्याशु सानुबंधं शुचार्पितं ॥ ४८ ॥

तत्तस्मात् । गौरवं । गुरोः कुलं । भवद्भिः कर्तृभिः वृजिनं दुःखं प्राप्तुं नार्हति । किंतु पूज्यं वंद्यं च ॥ ४६
मृतवत्सा मृतपुत्रा ॥ ४७ ॥ विपक्षे दोषमाह यैरिति । तेषां राजन्यानां कुलं कर्म्म कथंभूतं सानु
बंधं । सपरिवारं शुचा शोकेनार्पितं व्याप्तं च ब्रह्मकुलं प्रदहति ॥ ४८ ॥ श्री हरये परमात्मने नमः ॥ ३५ ॥

रिपोरपिसुतस्यवालस्यवधोनधर्मइत्यन्यार्थैर्दर्शयति॥ मत्तंमद्यादिनाप्रमत्तमनवहितं॥ उन्म
त्तं ग्रहवातादिनाजडं॥ अनुद्यमं प्रपन्नंशरणागतं॥ विरथं॥ भग्नरथं॥ ३६॥ तद्वधोदण्डरूपस्तस्यैवश्रेयः॥ पुरुषा
र्थः॥ यद्यतोदण्डप्रायश्चित्तान्नरहितदोषात्सपुमानधोयातीति॥ तथाचस्मरंति॥ राजभिर्धृतदण्डास्तुकृत्वापापानि

मत्तंप्रमत्तमुन्मत्तंसुप्तंवालंस्त्रियंजडं॥ प्रपन्नंविरथंभीतंनरिपुंहंतिधर्मवित्॥ ३६॥ स्वप्राणान्
यःपरप्राणैःप्रपुस्णात्यघृणःखलः॥ तद्वधस्तस्यश्रेयोयद्दोषाद्यात्यधःपुमान्॥ ३७॥ प्रतिश्रुतंचभ
वतापांचाल्यैश्रृण्वतोमम॥ आहरिष्येप्रियस्तस्ययस्तेमानिनिपुत्रहा॥ ३८॥ तदसौवध्यतांपाप
आततायात्मवंधुहा॥ भर्तुश्चविप्रियंवीरकृतवान्कुलपांसनः॥ ३९॥ सूतउवाच॥ एवंपरीक्ष
ताधर्मंपार्थःकृष्णेनचोदितः॥ नैच्छद्धंतुंगुरुसुतंयद्यप्यात्महनंमहान्॥ ४०॥ अथोपेत्यस्वशिवि
रंगोविंदप्रियसारथिः॥ न्यवेदयत्तंप्रियायैशोचंत्याआत्मजान्हतान्॥ ४१॥ तथाहृतंपशुवत्पा
शवद्धमवाङ्मुखंकर्मजुगुप्सितेन॥ निरीक्ष्यकृष्णापकृतंगुरोःसुतंवामस्वभावाकृपयाननामच॥ ४२॥

मानवाः॥ विधुतकल्मषायांतिस्वर्गंसुकृतिनोयथेति॥ ३७॥ ३८॥ ३९॥ यद्यपिचोदितस्तथापिहंतुंनैच्छत्॥ आत्म
हनंपुत्रहंतारमपियतोमहान्॥ ४०॥ गोविंदःप्रियःसारथिर्यस्य॥ आत्मजान्पुत्रान्शोचंत्यै॥ ४१॥ तथापरिभवेन
आहृतमिति॥ कर्मणोजुगुप्सितेनदोषेणावाङ्मुखं॥ अपकृतं॥ अपकारिणं॥ कृपयानिरीक्ष्य॥ वामःशोभनःस्व

त्वप्रतिज्ञां पूरयेत्याह ॥ प्रियां सांत्वयता त्वयायत्प्रतिश्रुतं हननं तच्च सत्यं कुरु मह्यं मम तत्र वधे भीमस्य
प्रियं भवति ॥ अवधेद्रौपद्या ॥ हृद्ये श्रीकृष्णस्य हार्दं अभिप्रायं ॥ आज्ञाय ज्ञात्वा ॥ नह्युभयोः कर्म्म मुभयं यद्विदध्यात्त ॥ अ
तोयमभिप्राय इति ज्ञात्वेत्यर्थः ॥ ५६ ॥ असिना खड्गेन मूर्द्धन्यं मूर्द्धिजातं ॥ सहमूर्द्धजं ॥ सकेशं ॥ ५५ ॥ मणिनाच
हीनं ॥ निरयापयत्तं निःसारितवान ॥ ५६ ॥ अनेन श्रीकृष्णोक्तं सर्वं ॥ संपादितमित्याह ॥ वपनमिति ॥ ५७

कुरु प्रतिश्रुतं सत्यं यत्तत्सांत्वयता प्रियां ॥ प्रियं च भीमसेनस्य पांचाल्या मह्यमेव च ॥ ५४ ॥ सूत उवा
च ॥ अर्ज्जुनः सहसाज्ञाय हरेर्हार्दमथासिना ॥ मणिं जहार मूर्द्धन्यं द्विजस्य सहमूर्द्धजं ॥ ५५ ॥ विमुच्यर
शनावद्धं बालहत्याहतप्रभं ॥ तेजसा मणिना हीनं शिबिरान्निरयापयत् ॥ ५६ ॥ वपनं द्रविणादा
नं स्थानान्निर्यापणं तथा ॥ एष हि ब्रह्मवंधूनां वधो नान्योस्ति दैहिकः ॥ ५७ ॥ पुत्रशोकातुरास्स
र्वे पांडवाः सह कृष्णया ॥ स्वानां मृतानां यत्कृत्यं चक्रुर्निर्हरणादिकं ॥ ५८ ॥ इति श्रीमद्भागवते म
हापुराणे प्रथमस्कंधे सप्तमोध्यायः ॥ ७ ॥ अथ ते संपरेतानां स्वानामुदकमिच्छतां ॥ दातुं स
कृष्णा गंगायां पुरस्कृत्य ययुः स्त्रियः ॥ १ ॥

निर्हरणं दाहार्थं नयनं ॥ ५८ ॥ इति श्री प्रथमे सप्तमः ॥ ७ ॥ ॥

अष्टमे कुपितात् द्रौणेरस्त्राद्गर्भ्भापरीक्षितः ॥ श्रीकृष्णेन स्तुतिः कुंत्या राज्ञः शोकश्च कीर्त्यते ॥ १ ॥ ते पांडवाः संप
रेतानां मृतानां गंगायामुदकं दातुं स कृष्णाः कृष्णेन सहिताः ॥ स्त्रियः पुरस्कृत्य अग्रतः कृत्वा तस्मिन्कार्ये स्त्री

[illegible]

धर्ममित्यादयोवचसःषड्गुणाःपूर्वश्लोकषट्केद्रष्टव्याः ॥ तत्रधर्म्मंधर्मादनपेतं ॥ मुच्यत्तांमुच्यत्तामिति
न्याय्यं ॥ न्यायादनपेतंसरहस्यं ॥ इत्यादिकरुणं तस्याश्चात्मनोर्ह्यमितिनिर्व्यलीकं ॥ निष्कपटं तद्धर्म्मज्ञेति
समंपक्षपातशून्यंमारोदीदितिदुःखसाम्योक्तेः ॥ महत्तयैः कोपितमितिनिष्ठुरंत्वाहितोपदेशात् ॥ एवं
भूतेराज्ञ्याःवचः ॥ हे द्विजाः प्रत्यनंदत्त ॥ अनुमोदितवान् ॥ ४९ ॥ नकुलादयश्चप्रत्यनंदन् युयुधानःसात्यकिः ५० ॥

सूत उवाच ॥ धर्म्यंन्याय्यंसकरुणंनिर्व्यलीकंसमंमहत् ॥ राजाधर्मसुतोराज्ञ्याःप्रत्यनंदद्व
चोद्विजाः ॥ ४९ ॥ नकुलःसहदेवश्चयुयुधानोधनंजयः ॥ भगवान्देवकीपुत्रोयेचान्येयाश्च
योषितः ॥ ५० ॥ तत्राहामर्षितोभीमस्तस्यश्रेयान्वधःस्मृतः ॥ नभर्तुर्नात्मनश्चार्थेयोहन्सुप्तान्शि
शून्वृथा ॥ ५१ ॥ निशम्यभीमगदितंद्रौपद्याश्चचतुर्भुजः ॥ आलोक्यवदनंसख्युरिदमाहहस
न्निव ॥ ५२ ॥ श्रीभगवानुवाच ॥ ब्रह्मबंधुर्नहंतव्यआततायीवधार्हणः ॥ मयैवोभयमाम्नातंपरिपाह्य
नुशासनम् ॥ ५३ ॥

तस्यतथाविधस्य ॥ द्रौणेर्वधश्रेयः ॥ अन्यथास्यनरकपातप्रसंगात् ॥ तदाहनभर्त्तु
रिति ॥ अहन्‌जघान ॥ ५१ ॥ चतुर्भुजोक्तेरयंभावः ॥ भीमएनंहन्तुंप्रवृत्तेद्रौपद्याचसहसातन्निवारणेप्रवृत्ता
यामुभयोःसंवारणाय्याविष्कृतचतुर्भुजइतिसंदिहानस्यसख्युरर्जुनस्य ॥ ५२ ॥ वधार्हणः ॥ वधार्हः ॥ मयै
वशास्त्रकर्त्ताब्राह्मणोनहंतव्यः ॥ तथाआततायिनमायांतमपिवेदांतपारगंजिघांसंतंजिघांसीयान्नतेनब्र

रथमास्थितः सन् उत्तरां परीक्षिन्मातरं अभिमुखं धावंती उपलेभे ददर्श ॥८॥ उत्तरा श्रीकृष्णं प्रार्थे
यते ॥ पाहि पाहीति द्वाभ्यां ॥ अन्यस्तु प्रार्थनायोग्यो नास्तीत्याह ॥ त्वत्त्वत्तः ॥ अन्यं अभयं ॥ भयरहितं न
न पश्यामि ॥ यत्र लोके परस्परं मृत्युर्भवति तत्र ॥९॥ प्रस्तुतं भयमावेदयति ॥ अभिद्रवति ॥ अभिद्रव उत्तरोवाच

गंतुं कृतमतिर्ब्रह्मन् द्वारकां रथमास्थितः ॥ उपलेभेभिधावंतीमुत्तरां भयविह्वलां ॥८॥ उत्त
रोवाच ॥ पाहि पाहि महायोगिन् देवदेव जगत्पते ॥ नान्यं त्वदभयं पश्ये यत्र मृत्युः परस्परं ॥९॥
अभिद्रवति मामीश शरस्तप्तायसो विभो ॥ कामं दहतु मां नाथ मा मे गर्भो निपात्यतां ॥१०॥ सूत
उवाच ॥ उपधार्य वचस्तस्या भगवान्भक्तवत्सलः ॥ अपांडवमिदं कर्तुं द्रौणेरस्त्रमबुध्यत
थ ५ ॥११॥ तर्ह्येवाथ मुनिश्रेष्ठ पांडवाः पंच सायकान् ॥ आत्मनोभिमुखान्दीप्तानालक्ष्यास्त्राण्युपाद
दुः ॥१२॥ व्यसनं वीक्ष्य तत्तेषामनन्यविषयात्मनां ॥ सुदर्शनेन स्वास्त्रेण स्वानां रक्षां व्यधाद्विभुः ॥१३॥

ति ॥ अभिमुखमायाति ॥ तप्तमायसं लोहमयं शल्यं यस्य सः ॥ अतिकार्पण्य एवमाह ॥ काममिति कामं यथेष्टं ॥१०॥ पराभवे
नातिकुपितस्य द्रौणेः ॥ अपांडवं पांडवशून्यं इदं विश्वं कर्तुं प्रवृत्तं ब्रह्मास्त्रमबुध्यत ॥११॥ अत एव अभिमुखं तदा
गतमित्याह ॥ तर्ह्येव ॥१२॥ ब्रह्मास्त्रं शस्त्रांतरैरनिवर्त्यत्वात् ॥ तत्तद्दुःपरिहरं व्यसनं वीक्ष्य ॥ अनन्यविषय आत्मा ये

निनीय दत्वा हरिपादाब्जरजोभिः पूतायाः सरितः गंगायाः तस्याः जले पुनर्ग्रहणात् आप्लावपि स्नाता इत्तिगम्य
ते २ कुरुपतिं युधिष्ठिरं सहानुजं भीमादिभिः सहितं ३ मुनिभिः सहितः सांत्वयामस हतस्मः किंभू
वेन अप्रतिक्रियां कालस्य गतिं दर्शयन् येपि शोचयतु शक्ताः समुद्रं ग्राहसंकुलं उद्धर्त्तुं धरणीं श
क्ता ग्रसितुं चंद्रभास्करौ प्रविष्टाः तेपि कालेन हतां तवदनं शुभे एवं कालगतिं बुध्वा न त्वं शोचितुमर्हे

तेनिनीयोदकं सर्वे विलप्य च भृशं पुनः आप्लुता हरिपादाब्जरजःपूतसरिज्जले २ तत्रा
सीनं कुरुपतिं धृतराष्ट्रं सहानुजं गांधारीं पुत्रशोकार्त्तां पृथां कृष्णां च माधवः ३ सांत्व
यामास मुनिभिर्हतबंधून् शुचार्पितान् भूतेषु कालस्य गतिं दर्शयन्न प्रतिक्रियां ४
साधयित्वाजातशत्रोः स्वराज्यं कितवैर्हृतं घातयित्वासतो राज्ञः कचस्पर्शहतायुषः ५ याज
यित्वाश्वमेधैस्तं त्रिभिरुत्तमकल्पकैः तद्यशः पावनं दिक्षु शतमन्योरिवातनोत् ६ आमंत्र्य
पांडुपुत्रांश्च सैनेयोद्धवसंयुतः द्वैपायनादिभिर्विप्रैः प्रपूज्यैः प्रतिपूजितः ७ ॥ ॥ ऽऽ

सि। ५ कितवैर्धूर्त्तैर्दुर्योधनादिभिः द्रौपद्याः कचग्रहणादिना हतं नष्टमायुर्येषां तान् ५ याजयि
त्वेत्यादि भाविकथासंक्षेपः शतमन्योः शतक्रतोरिव ६ सैनेयः सिनेर्नप्ता सात्यकिस्तेन संयुतः ७

भा० प्र०
३८

किंच ॥ परमहंसानामात्मानात्मविवेकिनां ॥ ततो मुनीनां मननशीलानाममपि तत्स्वामलात्मनां ॥ निवृत्तरागादीनामपि
तथा तेन निजमहिम्ना न लक्ष्यसे ॥ अतो भक्तियोगं विधातुं त्वां वयं स्त्रियः कथं हि पश्येम ॥ यद्वा ॥ परमहंसानामपि
भक्तियोगविधानार्थं त्वां आरामाणामपि त्वचिंत्यनिजगुणैराकृष्य भक्तियोगं कारयितुमवतीर्णमित्यर्थः ॥ २० ॥
ज्ञानभक्त्योरशक्यत्वमुक्त्वा पुनः केवलं नमस्करोति ॥ श्रीकृष्णायेति द्वाभ्यां ॥ २१ ॥ पंकजं नाभौ यस्य ॥ पंकजवत्प्रसन्ने

तथा परमहंसानां मुनीनाममलात्मनां ॥ भक्तियोगविधानार्थं कथं पश्येम हि स्त्रियः ॥ २० ॥ कृ
ष्णाय वासुदेवाय देवकीनंदनाय च ॥ नंदगोपकुमाराय गोविंदाय नमो नमः ॥ २१ ॥ न
मः पंकजनाभाय नमः पंकजमालिने ॥ नमः पंकजनेत्राय नमस्ते पंकजांघ्रये ॥ २२ ॥ यथा
हृषीकेश खलेन देवकी कंसेन रुद्धातिचिरं सुचार्पिता ॥ विमोचिताहं च सहात्मजा विभो
त्वयैव नाथेन मुहुर्विपद्गणात ॥ २३ ॥

नेत्रे यस्य ॥ पंकजांकितावंघ्री यस्य तस्मै ॥ २२ ॥ तत्कृतोपकारानुस्मरति ॥ यथेति द्वाभ्यां ॥ अयमर्थः ॥ मातृतो
पि मय्यधिका तव प्रीतिः ॥ हे हृषीकेश यया देवकी कंसेन रुद्धा त्वया विमोचिता ॥ अहं च तथैव किं मोचितेति का
कोमह्न विशेषस्तत्रः ॥ तद्दर्शयति ॥ सा अतिचिरं रुद्धासती तस्मादेव सकृद्विमोचिता ॥ तथा सुचार्पिता सती
न च तस्याः पुत्रा रक्षिता अस्ति चान्यो नाथस्तस्याः ॥ अहं तु विपद्गणात् ॥ तत्रापि मुहुः शीघ्रं च सात्मजा च त्वयैव ना

३८

वैराट्या उत्तरायाः ॥ अंतस्थः सन्गर्भमावृतवान् ॥ तत्र हेतुर्यत आत्मा अंतर्यामी योगेश्वर इति च हि यस्मात् पि प्रवे-
श्याघटनार्थमुक्तं ॥ कुरूणां तंतवे संतानाय ॥ पांडवानामपि कुरुवंशजत्वादेवमुक्तम् ॥ १४ ॥ अमोघमप्रतिक्रियं च स-
म शाम्यत् ॥ संशांतमासीत् ॥ १५ ॥ एतत्तु ब्रह्मास्त्रशमनं आश्चर्यं मा मंस्थाः ॥ न मन्यस्व ॥ १६ ॥ कृष्णया सह ॥ १७ ॥ त्वा त्वां

अंतस्थः सर्वभूतानामात्मा योगेश्वरो हरिः ॥ स्वमायया वृणोद्गर्भं वैराट्याः कुरुतंतवे ॥ १४ ॥ यद्यप्यस्त्रं
ब्रह्मशिरस्त्वमोघं चाप्रतिक्रियं ॥ वैष्णवं तेज आसाद्य समशाम्यद्भृगूद्वह ॥ १५ ॥ मा मंस्था ह्येतदाश्च-
र्यं सर्वाश्चर्यमयेऽच्युते ॥ य इदं मायया देव्या सृजत्यवति हंत्यजः ॥ १६ ॥ ब्रह्मतेजोविनिर्मुक्तै-
रात्मजैः सह कृष्णया ॥ प्रयाणाभिमुखं कृष्णमिदमाह पृथा सती ॥ १७ ॥ कुंत्युवाच ॥ न-
मस्ये पुरुषं त्वाद्यमीश्वरं प्रकृतेः परं ॥ अलक्ष्यं सर्वभूतानामंतर्बहिरवस्थितं ॥ १८ ॥ माया-
जवनिकाछन्नमज्ञाधोक्षजमव्ययं ॥ न लक्ष्यसे मूढदृशा नटो नाट्यधरो यथा ॥ १९ ॥

नमस्ये ॥ नमस्करोमि ॥ ननु क्व निष्ठं मां कथं नमस्करोषि तत्राह ॥ आद्यं पुरुषं ॥ कुतः प्रकृतेः परं ॥ तत्कुतः ई-
श्वरं ॥ प्रकृतेरपि नियंतारं ॥ अत एव सर्वभूतानामंतर्बहिश्च परिपूर्णत्वेनावस्थितं ॥ तथाप्यलक्ष्यं ॥ १८ ॥ त-
त्र हेतुः मायैव जवनिका तिरस्करणी तया आच्छन्नं ॥ अतोऽहमज्ञा भक्तियोगानभिज्ञा केवलं नमस्यामि
अधोक्षजं ज्ञानेयस्मात्तं ॥ अव्ययं ॥ अपरिछिन्नं ॥ तत्प्रपंचः मूढदृशा देहाभिमानिना पुंसा त्वं न लक्ष्यसे ॥ य-

भा॰ १ ॥ ४९ ॥

भा० प्र०
३६

ननु देवकीपुत्रं मां कथमेवं स्तोषि तत्राह ॥ मन्ये त्वां कालं न तु देवकीपुत्रं तत्र हेतवः ॥ ईशानं नियंतारं ॥ अनादिनि
धनं ॥ आद्यंतशून्यं विभुं ॥ समं यथा भवति तथा सर्वत्र चरंतं ॥ ननु पार्थसारथेः कथं मम साम्यं ॥ तत्राह ॥ यद्यतस्त्वन्नो
निमित्तभूतात् ॥ भूतानामेव मिथः कलिः ॥ कलहो भवति न तु त्वयि वैषम्यं ॥ २८ ॥ ननु निग्रहानुग्रहरूपं मयि प्रसि
द्धं वैषम्यं तत्राह ॥ न वेदेति ॥ नृणां विडंबनमनुकरणमीहमानस्य कुर्वतः ॥ यस्मिंस्त्वयि विषमा मतिरनुग्रहनिग्र

मन्ये त्वां कालमीशानमनादिनिधनं विभुं ॥ समं चरंतं सर्वत्र भूतानां यन्मिथः कलिः ॥ २८ ॥ न वेद
कश्चिद्भगवंश्चिकीर्षितं तवेहमानस्य नृणां विडंबनं ॥ न यस्य कश्चिद्दयितोस्ति कर्हिचिद्द्वेष्यश्च यस्मि
न्विषमा मतिर्नृणां ॥ २९ ॥ जन्म कर्म च विश्वात्मन्नजस्याकर्तुरात्मनः ॥ तिर्यङ्नृषिषु यादस्सु
तदत्यंतविडंबनं ॥ ३० ॥ गोप्याददे त्वयि कृतागसि दाम तावद्या ते दशाश्रुकलिलांजनसंभ्र
भी १ माक्षं ॥ वक्त्रं निनीय भयभावनया स्थितस्य सा मां विमोहयति भीरपि यद्बिभेति ॥ ३१ ॥

रूपा भवति ॥ २९ ॥ अजस्य जन्म अकर्तुः कर्म तिर्यक्षु वराहादिरूपेण नृषु रामादिरूपेण ऋषिषु वामनादिरू
पेण यादस्सु मत्स्यादिरूपेण ॥ ३० ॥ नरविडंबनमत्याश्चर्यमित्याह ॥ गोपी यशोदा त्वयि कृतागसि दधिभांडस्फोट
नं कृतवति यावत् ॥ दाम रज्जुं आददे जग्राह ॥ तावत्तत्क्षणमेव ते या दशा अवस्था मां विमोहयति किंभूतस्य ॥
अश्रुकलिलं व्यामिश्रं अंजनं ययोस्ते च ते संभ्रमे व्याकुले अक्षिणी यस्मिंस्तद्वक्त्रं निनीय अधः कृत्वा ॥ ताडयिष्य
तीति भयस्य भावनया स्थितस्य ॥ यत् यतः ॥ त्वत्तः भीरपि स्वयं बिभेति तस्य ते दशा ॥ ३१ ॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ३६

विपद्गणमेव दर्शयति ॥ विषात् भीमस्य विषमोदकदानात् ॥ महाग्नेः जतुगृहदाहात् ॥ पुरुषादा हिडंबा
द्यो राक्षसा ॥ त्तिपांदर्शनात् ॥ असत्सभायाः ॥ द्यूतस्थानात् ॥ अभिरक्षिताः ॥ आस्म भवाम ॥ २४ ॥ यत् या
स्तु विपत्सु कीदृशं दर्शनं नास्ति पुनरपि भवदर्शनं यस्मात् ॥ अथवा पुनर्भवं मोक्षं दर्शयतीति ॥ ननु संप
त्स्वेव परमेश्वरदर्शनं युज्यते ॥ स्वस्थचित्तत्वात् ॥ तत्किं विपदः प्रार्थ्यंते ॥ २५ ॥ संपदस्तु श्रेयःपरिपंथिन्य इत्या

विषान्महाग्नेः पुरुषाददर्शनादसत्सभायावनवासकृच्छ्रतः ॥ मृधे मृधेनेकमहारथास्त्र
तो द्रौण्यस्त्रतश्चास्म हरेभिरक्षिताः ॥ २४ ॥ विपदः संतु नः शश्वत्तत्र तत्र जगद्गुरो ॥ भव
तो दर्शनं यत्स्यादपुनर्भवदर्शनं ॥ २५ ॥ जन्मैश्वर्यश्रुतश्रीभिरेधमानमदः पुमान् ॥ नैवा
र्हत्यभिधातुं वै त्वामकिंचनगोचरं ॥ २६ ॥ नमो किंचनवित्ताय निवृत्तगुणवृत्तये ॥ आत्मा
रामाय शांताय कैवल्यपतये नमः ॥ २७ ॥

ह ॥ जन्म सत्कुलजन्मादिभिरेधमानो मदो यस्य सः ॥ अभि
धातुं श्रीकृष्ण गोविंदेति वक्तुमपि अकिंचनानां गोचरं विषयभूतं ॥ २६ ॥ प्रस्तुतमनोरथपूरणाय प्रणम
ति ॥ अकिंचनाज्जनाख्यवित्तं सर्वस्वं यस्य तस्मै ॥ ततः किं निवृत्ताः गुणवृत्तयो धर्मार्थकामविषयाय
स्मात् तस्मै कुतः ॥ आत्मारामाय ॥ तत्कुतः ॥ शांताय रागादिरहिताय ॥ किंच कैवल्यं दातुं समर्थाय ॥ २७ ॥

इदानीं त्वत्वास्मत्त्यागोनुचित इत्याशयेनाह॥ अपीति चतुर्भिः॥ हे प्रभो सुहृदोनुजीविनश्च नोऽपि स्वित् किंस्वित्
त्वं जिहाससि॥ येषामस्माकमन्यत्परायणं नैवास्ति कुतः॥ राजसु योजितमंहो दुःखं यैः॥ स्वानां कृतमीहित
मपेक्षितं येनेति॥ संबोधनं॥ विसर्गान्तपाठे त्वं विशेषणं॥३७॥ ननु तव बंधवो यादवाः पुत्राश्च पांडवाः शूराः सम
र्थाश्च ततः किं कार्यमेवं भाषसे अत आह॥ केवयमिति॥ यद्वियर्हि भवतोऽदर्शनं यदा त्वमस्मान्न पश्यसि

अप्यद्य नस्त्वं स्वकृतेहित प्रभो जिहाससि स्वित्सुहृदोनुजीविनः॥ येषां न चान्यद्भवतः पदांबुजात्
परायणं राजसु योजितांहसां॥३७॥ केवयं नामरूपाभ्यां यदुभिः सह पांडवाः॥ भवतोऽदर्शनं यर्हि
हृषीकाणामिवेशितुः॥३८॥ नेयं शोभिष्यते तत्र यथेदानीं गदाधर॥ त्वत्पदैरंकिता भाति स्वल
क्षणविलक्षितैः॥३९॥ इमे जनपदाः स्वृद्धाः सुपक्वौषधिवीरुधः॥ वनाद्रिनद्युदन्वंतो ह्येधंते त
व वीक्षितैः॥४०॥ अथ विश्वेश विश्वात्मन्विश्वमूर्ते स्वकेषु मे॥ स्नेहपाशमिमं छिंधि दृढं पांडुषु वृष्णिषु
॥४१॥

तदा नाम्ना विख्याता रूपेण समृद्धाश्च यदुभिः सहिताः पांडवा नाम के वयं न केऽपि॥ अतितुच्छा इत्यर्थः॥ नामेत्यत्र
दृष्टांतो हृषीकाणामीशितुर्जीवस्यादर्शने यथा न किंचित् नाम च रूपं च तद्वत्॥३८॥ किंच यथेदानीमियमस्मत्पाल्याभू
मिः स्वैरसाधारणैर्वज्रांकुशादिभिर्लक्षणैर्विलक्षिते त्वत्पदैरंकिता सती भाति तत्र तदा त्वयि निर्गते स
न शोभिष्यते॥३९॥ अपि च इमे जनपदा देशाः स्वृद्धाः सुसमृद्धाः संतः॥४०॥ गमने पांडवानामकुशलमगमने च या
दवानामिति उभयतो व्याकुलचित्ता सती तेषु स्नेहनिवृत्तिं प्रार्थयते॥ अथेति॥ विश्वेशेत्यादि संबोधनानि स्नेहच्छेदे सा

[illegible] ॥४१॥

अतएवजगन्मोहनत्वयादुर्गे यत्वात्जन्मादिवक्कधावर्णयंतीत्याह॥ केचिदितिचतुर्भिः॥ पुण्यश्लोकस्य
प्रियस्ययुधिष्ठिरस्यकीर्तयेइति॥ यदोरेवकीर्तयेइतिवा॥ मलयस्यकीर्तयेवंशेवाचंदनं॥ ३२॥ तथावसुदे
वस्यदेवक्यांभार्य्यायांअजएवत्वमभ्यगात्॥ पुत्रत्वमितिशेषः॥ प्रथमपुरुषस्त्वार्षः॥ अभत्वमितिपाठः सुग
मं॥ ताभ्यामेवपूर्वंसुतपःपृश्निभ्यांयाचितःसन्॥ अस्यजगतःक्षेमाय॥ ३३॥ आत्मभुवेतिब्रह्मप्रार्थनस्यप्राधान्य

केचिदाहुरजंजातंपुण्यश्लोकस्यकीर्तये॥ यदोःप्रियस्यान्ववायेमलयस्येवचंदनं॥ ३२॥ अ
परेवसुदेवस्यदेवक्यांयाचितोभ्यगात्॥ अजस्त्वमस्यक्षेमायवधायचसुरद्विषां॥ ३३॥ भाराव
तारणायान्येभुवोनावइवोदधौ॥ सीदंत्याभूरिभारेणजातोह्यात्मभुवार्थितः॥ ३४॥ भवेस्मिन्
क्लिश्यमानानामविद्याकामकर्मभिः॥ श्रवणस्मरणार्हाणिकरिष्यन्निति केचन॥ ३५॥ शृ
ण्वंतिगायंतिगृणंत्यभीक्ष्णशःस्मरंतिनंदंतितवेहितंजनाः॥ तएवपश्यंत्यचिरेणतावकं
भवप्रवाहोपरमंपदांबुजम्॥ ३६॥
चिवत्वयामतांतरं॥ ३४॥ परमानंदस्वरूपाज्ज्ञानमविद्यात
तोदेहाद्यभिमानात्कामः॥ ततःकर्माणितैःक्लिश्यमानानांतन्निवृत्तयेश्रवणार्हाणिकरिष्यन्॥ ३५॥
अस्यपक्षस्यसिद्धांतत्वामभिप्रेत्यश्रवणादिफलमाह॥ शृण्वंतीति नंदंति अन्यैःकीर्त्यमानमभिनंदंतियेज
नाः॥ ईहितंचरितं॥ तावकंत्वदीयपदांबुजंतएवपश्यंत्येव॥ अचिरेणैवेतिचसर्वत्रावधारणंकीदृशंभवप्र

भा॰ प्र॰
६१

अथभीष्मनिर्य्याणोत्सवंवक्तुंउपोद्घातकथांप्रस्तौति॥ व्यासाद्यैः प्रवोधितोपिशुचार्पितः सन्नावु
ध्यत॥ विवेकंनप्राप॥ कुतः॥ ईश्वरेहाज्ञैः स्वभक्ताभीष्मनिर्य्याणमहोत्सवायराज्ञासहकुरुक्षेत्रंगंत
व्यं॥ तन्मुखेनैवायंप्रवोधनीयइतीश्वराभिप्रायेकार्य्यद्वयविधाकस्तमज्ञानद्भिरित्यर्थः॥ श्रीकृष्णे
नापिप्रवोधितोनावुध्यत॥ तत्रहेतुरद्भुतकर्मणा यथाकुरुपांडवसंधानार्थंगतोपियुद्धोचि
तमेववदन्नपिविग्रहमपिदृष्टौकृतवान्॥ एवमत्रापिप्रवोधयन्॥ अवोधमेवदृढीचकारेत्यर्थः

व्यासाद्यैरीश्वरेहाज्ञैः कृष्णेनाद्भुतकर्मणा॥ प्रवोधितोपीतिहासैर्नावुध्यतशुचार्पितः॥ ४६
आहराजाधर्मसुतश्चिंतयन्सुहृदांवधं॥ प्राकृतेनात्मनाविप्राः स्नेहमोहवशंगतः॥ ४७
अहोमेपश्यताज्ञानंहृदिरूढंदुरात्मनः॥ पारक्यस्यैवदेहस्यवह्व्योमेक्षौहिणीर्हताः॥ ४८

अवोधमेवप्रपंचयति॥ प्राकृतेन॥ अविवेकप्राप्तेन॥ आत्मनाचित्तेन॥ हेविप्राः॥ ४७॥ पारक्यस्यश्वशृगालभ
क्ष्याहारस्यदेहस्यार्थेमेमया॥ अक्षौहिणीः॥ अक्षौहिण्यः॥ अक्षौहिणीप्रमाणंव्यासेनोक्तं॥ अक्षौहिणीप्रसं
ख्यातारथानांद्विजसत्तमाः॥ संख्यागणिततत्वज्ञैः सहस्राण्येकविंशति॥ शतान्युपरिचैवाष्टौतथाभूयश्च
सप्ततिः॥ गजानांचप्रसंख्यानमेतदेवप्रकीर्तितं॥ ज्ञेयंशतसहस्राणिनवैवतु॥ नराणामपिपंचाशत्
शतानित्रीणिचैवहि॥ पंचषष्ठिसहस्राणितथाश्वानांशतानिच॥ दशोत्तराणिषट्प्राहुः संख्यातत्वविदोज्ञ

६१

ततः किमत आह। त्वयीति। अनन्यविषयासक्ता मे मतिः रतिमुद्वहतात्। अनवच्छिन्नां प्रीतिं करोत्वित्यर्थः। अौघं पूरं यथा गंगा प्रतिबंधं न गणयति एवं मतिरपि विघ्नान्न गणयत्विति भावः। ४२ एवमभ्यर्थ्य पुनः प्रणमति। श्रीकृष्णेति नमः। उपकारान् अनुस्मरंती बंधुघा संबोधयति। कृष्णसख अर्जुनस्य सखे। वृष्णीनां ऋषभश्रेष्ठ। अवन्यै भूम्यै दुह्यंति ये राजन्याः तेषां वंशदहन एवमप्यनपवर्गवीर्य। अक्षीणप्रभाव। गोविंद प्राप्तकामधेन्वैश्वर्य। गोद्विजसुराणामार्तिहरोऽवतारो यस्येति। ४३ कलानि मधुराणि पदानि ये षु तैः

त्वयि मेऽनन्यविषया मतिर्मधुपतेऽसकृत्। रतिमुद्वहतादद्धा गंगेवौघमुदन्वति॥ ४२॥
से३ श्रीकृष्ण कृष्णसख वृष्ण्यृषभाऽवनिध्रुग्राजन्यवंशदहनानपवर्गवीर्य। गोविंद गो
मो२ द्विजसुरार्त्तिहरावतार योगेश्वराखिलगुरो भगवन्नमस्ते॥ ४३॥ सूत उवाच॥ पृथयेत्थं कलपदैः परिणूताखिलोदयः। मंदं जहास वैकुंठो मोहयन्निव मायया॥ ४४॥ तां बाढमित्युपामंत्र्य प्रविश्य गजसाह्वयं। स्त्रियश्च स्वपुरं यास्यन्प्रेम्णा राज्ञा निवारितः॥ ४५॥

वैकुंठः परिणूतः स्तुतोऽखिल उदयो महिमा यस्य सः। णूस्तुतावित्यस्मात्। परिणुतेति वक्तव्ये दीर्घं छंदोनुरोधेन। मंदमीषत्। तस्य हासस्य च माया वैष्णवीति हि। हासो जनोन्मादकरी च मायेति। ४४ त्वयि मेऽनन्यविषया मतिर्येन प्रार्थितं तद्बाढमित्यंगीकृत्य रथस्थानात् गजाह्वयमागत्य पश्चात्ताश्च अन्याश्च सुभद्राप्रमुखाः स्त्रियः उपामंत्र्य अनुज्ञाप्य स्वपुरं यास्यन्। राज्ञा युधि

युधिष्ठिराय भीष्मेण सर्वधर्मनिरूपणं । कृष्णस्तुतिश्च मुक्तिश्च नवमेऽत्र प्रवर्ण्यते ॥ १ ॥ यदर्थं तस्यावि
विवेकः ॥ श्रीकृष्णेन संवर्द्धितस्तद्दर्शयति ॥ इतीति सर्वेषां धर्माणां विवित्सया वेदितुमिच्छया विनश
नं कुरुक्षेत्रे देवव्रतो भीष्मः ॥ १ ॥ सदश्वैः श्रेष्ठाश्वैर्युक्तै रथैः ॥ २ ३ ४ ॥ तत्र तदासन् ॥ ततः क्षणमेव गता

सूत उवाच ॥ इति भीतः प्रजाद्रोहात्सर्वधर्मविवित्सया ॥ ततो विनशनं प्रागाद्यत्र देवव्रतोऽपत
त् ॥ १ ॥ तदा ते भ्रातरः सर्वे सदश्वैः स्वर्णभूषितैः ॥ अन्वगच्छन्रथैर्विप्रा व्यासधौम्यादयस्तथा ॥ २ ॥ भ
गवानपि विप्रर्षे रथेन सधनंजयः ॥ स तैर्व्यरोचत नृपः कुवेर इव गुह्यकैः ॥ ३ ॥ दृष्ट्वा निपतितं भूमौ दि
वश्च्युतमिवामरं ॥ प्रणेमुः पाण्डवा भीष्मं सानुगाः सह चक्रिणः ॥ ४ ॥ तत्र ब्रह्मर्षयः सर्वे देवर्षय
श्च सत्तम ॥ राजर्षयश्च तत्रासन्द्रष्टुं भरतपुंगवं ॥ ५ ॥ पर्वतो नारदो धौम्यो भगवान्बादरायणः
बृहदश्वो भरद्वाजः सशिष्यो रेणुकासुतः ॥ ६ ॥ वशिष्ठ इंद्रप्रमदस्त्रितो गृत्समदोऽसितः ॥ कक्षी
वान्गौतमोऽत्रिश्च कौशिकोऽथ सुदर्शनः ॥ ७ ॥ अन्ये च मुनयो ब्रह्मन्ब्रह्मरातादयोऽमलाः
शिष्यैरुपेता आजग्मुः कश्यपांगिरसादयः ॥ ८ ॥ तान्समेतान्महाभागानुपलभ्य वसूत्तमः ॥
पूजयामास धर्मज्ञो देशकालविभागवित् ॥ ९ ॥

इत्यर्थः ॥ भरतपुंगवं भीष्मं ॥ ५ ॥ रेणुकासुतः परशुरामः ॥ ६ ७ ॥ ब्रह्मरातः शुकः आंगिरसो बृहस्पतिः ॥ ८ ॥

सुहृदः संबंधिनः मित्राणि सखायः पितरः पितृव्या ॥ ४९ ॥ द्विषां वध एव नः पापं न भवतीति यत् शास
नं शिष्टाश्च रूपं वचः कुतो न कल्पते यतस्तद्वचः प्रजाभर्तुरेव ॥ अयं भावः ॥ स्वप्रजानामन्यतो बाधे प्रसक्ते तद्
धोऽनुज्ञातः दुर्योधनेन तु प्रजायां पाल्यमानायां मया केवलं राज्यलोभेन हतत्वात् पापमेव जातं चेद्वृमि
ति ॥ ५० ॥ किंच ॥ युद्धे पुंसां वधो भवतु नाम धर्मः ॥ स्त्रीणां तु मया हतानां बंधवो यासां योऽसौ द्रोहः स तु द्विष्टोपु

बालद्विजसुहृन्मित्रपितृभ्रातृगुरुद्रुहः ॥ न मे स्यान्निरयान्मोक्षो ह्यपि वर्षायुतायुतैः ॥ ४९ ॥
नैनो राज्ञः प्रजाभर्तुर्धर्मयुद्धे वधो द्विषां ॥ इति मे न तु बोधाय कल्पते शासनं वचः ॥ ५० ॥
स्त्रीणां मद्धतबंधूनां द्रोहो योऽसाविहोत्थितः ॥ कर्मभिर्गृहमेधीयैर्नाहं कल्पो व्यपोहितुं ॥ ५१ ॥ य
था पंकेन पंकांभः सुरया वा सुराकृतं ॥ भूतहत्यां तथैवैकां न यज्ञैर्मार्ष्टुमर्हति ॥ ५२ ॥ इति श्रीम
द्भागवते महापुराणे प्रथमस्कंधे युधिष्ठिरानुतापो नामाष्टमोऽध्यायः ॥ ८ ॥ ❀ ॥ ७ ॥

त्थितः तं व्यपोहितुं अपाकर्तुं कल्पः समर्थो नाहं ॥ गृहमेधीयैर्गृहाश्रमविहितैः ॥ ५१ ॥ ननु च सर्वं पाप्मा
नं तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ चैनमेवं वेदेति श्रुतेः ॥ पापमश्वमेधेन नश्यदेवेत्याशंक्याविवेकाबद्धं
भितं हेतुवादमाश्रित्य निराकरोति ॥ यथा घनपंकेन पंकांभो न मृज्यते ॥ यथा वा सुरालेशकृतमप्राशस्त्यं वह्व्या सु
रया न मृज्यते ॥ तथैव भूतहत्यामेकां प्रमादतो जातां बुद्धिं ॥ एवं हिंसाप्रायैर्यज्ञैर्मार्ष्टुं शोधयितुं नार्हतीति ॥

॥ ७ ॥ ॥ प्र क्ष व प्र क्रि ल ॥ ४८

भा० प्र० ननु कृष्णं कथं कालो ऽतिक्रमेदित्यपेक्षायामाह ॥ न ह्यस्य श्रीकृष्णस्येत्थं गुल्य निर्दिशति ॥ विधित्सितं स्य विजिज्ञासया
६३ १६ ॥ दैवतंत्रमीश्वराधीनं व्यवस्य निश्चित्य ॥ तस्येश्वरस्यानुविहितः अनुवर्ती सन् कर्त्ता रिक्ता ॥ हे नाथ कुलपरंपरागतस्वा
मिन् ॥ प्रभो समर्थ ॥ अनाथाः प्रजाः पाहि ॥ १७ ॥ अनुविधेयः परमेश्वरश्च श्रीकृष्ण एवेत्याह ॥ एष एव भगवान् सर्वे
श्वरः यतः आद्यः पुमान् तत्त्वयतो नारायणः साक्षात् ॥ १८ ॥ तदुपपादयति ॥ अस्येति ॥ अनुभावं प्रभावं ॥ १९ ॥ त्वमज्ञाना

न ह्यस्य कर्हिचिद्राजन् पुमान्वेद विधित्सितं ॥ यद्विजिज्ञासया युक्ता मुह्यंति कवयो ऽपि हि ॥ १६ ॥ तस्मा
दिदं दैवतंत्रं व्यवस्य भरतर्षभ ॥ तस्यानुविहितो ऽनाथा नाथ पाहि प्रजाः प्रभो ॥ १७ ॥ एष वै भगवान् सा
क्षादाद्यो नारायणः पुमान् ॥ मोहयन्मायया लोकं गूढश्चरति वृष्णिषु ॥ १८ ॥ अस्यानुभावं भ
गवान्वेद गुह्यतमं शिवः ॥ देवर्षिर्नारदः साक्षाद्भगवान्कपिलो नृप ॥ १९ ॥ यं मन्यसे मातुलेयं प्रियं मि
त्रं सुहृत्तमं ॥ अकरोः सचिवं दूतं सौहृदादथ सारथिं ॥ २० ॥ सर्वात्मनः समदृशो ह्यद्वयस्यानहंकृ
तेः ॥ तत्कृतं मतिवैषम्यं निरवद्यस्य न क्वचित् ॥ २१ ॥

तं यमेवं मन्यसे ॥ मातुलेयं देवक्याः सुतं प्रियं प्रीतिविषयं ॥ मित्रं प्रीतिकर्त्तारं ॥ सुहृत्तमम् उपकारानपेक्षोपु
कारं च ॥ सौहृदात् विश्वासात् ॥ अकरोः कृतवानसि ॥ सचिवं मंत्रिणं ॥ २० ॥ ननु ईश्वरश्चेत् कथं नीचे सारथ्यादौ
प्रवृत्तः तत्राह सर्वेति ॥ तत्कृतं नीचोच्चकृतं ममयोग्यमयोग्यमिति वैषम्यं क्वचिदपि नास्ति कुतः निरवद्यस्य
रागादिशून्यस्य तत्कुतः ॥ अनहंकृतेः ॥ तत्त्वकुतः ॥ अद्वयस्य ॥ तदपि कुतः ॥ समदृशः ॥ तत्रापि हेतुः सर्वस्यात्मनः ॥ ६३

हृदिस्थं संतं पुरतश्चासीनं पूजयामास ॥ १० ॥ उपासीनान् समीपे उपविष्टान् प्रश्रयो विनयः प्रेम स्नेहः ताभ्यां संग
ताभ्यां ॥ संगतान् उपसन्नान् ॥ पाठांतरे ताभ्यामवनतान् ॥ अभ्याचष्ट ॥ अभ्यभाषत ॥ अनुरागास्रैः स्नेहाश्रुभिः ॥ अंधीभूतेन
चक्षुषा उपलक्षितः ददर्शेति वा ॥ ११ ॥ अभिभाषणमाह ॥ अहो इति एकादशभिः ॥ हे धर्मनंदनाः ॥ क्लिष्टं यथा भवत्येवं जी

कृष्णं च तत्प्रभावज्ञ आसीनं जगदीश्वरं ॥ हृदिस्थं पूजयामास माययोपात्तविग्रहं ॥ १० ॥ पांडुपुत्रानु
पासीनान् प्रश्रयप्रेमसंगतान् ॥ अभ्याचष्टानुरागास्रैरंधीभूतेन चक्षुषा ॥ ११ ॥ अहो कष्टमहोन्याय्य
यद्यूयं धर्मनंदनाः ॥ जीवितुं नार्हथ क्लिष्टं विप्रधर्माच्युताश्रयाः ॥ १२ ॥ संस्थितेतिरथे पांडौ पृथा वाल
प्रजा वधूः ॥ युष्मत्कृते बहून् क्लेशान् प्राप्ता तोकवती मुहुः ॥ १३ ॥ सर्वं कालकृतं मन्ये भवतां च यदप्रियं
सकालो यद्वशे लोको वायोरिव घनावलिः ॥ १४ ॥ यत्र धर्मसुतो राजा गदापाणिर्वृकोदरः ॥ कृष्णोस्त्री गां
डिवं चापं सुहृत्कृष्णस्ततो विपत् ॥ १५ ॥

वितुं नार्हथ एतद् अहो कष्टं जुगुप्सितं अन्याय्यं चैतत् ॥ यतो यूयं विप्र धर्मोऽच्युतश्च आश्रयो येषां ते ॥ १२ ॥ किंच ॥ संस्थितेम
तिवालाः प्रजा यस्याः सा वधूश्चेति दैन्यं दर्शितं ॥ तोकान्यपत्यानि तद्वती ॥ अपत्यैः सह क्लेशान् प्राप्तेत्यर्थः ॥ १३ ॥ कालकृते
विनशोकं वारयति सर्वमिति द्वाभ्यां ॥ भवतामपि ॥ यद्वशे यस्य वशवर्ती ॥ १४ ॥ अहो दुर्घटघटनापटुः काल इत्याह ॥ यत्रेति
कृष्णः ॥ अर्जुनः ॥ अस्त्री धन्वी ततः ॥ तत्रापि विपत् दुःखं पुण्यशारबलनैपुण्यशारीरबलनैपुण्यशस्त्रदैवसंपन्नानापीत्यर्थः ॥ १५ ॥

भा० प्र० ४४

पुनस्तत्रैव विशेषमाह दानेति ॥ मोक्षधर्मान् शमदमादीन् ॥ भागवद्धर्मान् हरितोषणान् द्वादश्यादिनियमरूपा
न् ॥ समासव्यासौ संक्षेपविस्तारौ तावेव योगौ उपायौ ताभ्यां ॥ २७ ॥ धर्मादींश्च यथाधिकारप्रतिनियतोपाय
सहितान् ॥ यथा यथावत् ॥ नानाख्यानेषु ये इतिहासास्तेषु यथासंततितथा वर्णयामास ॥ २८ ॥ छंदेनेच्छया मृत्युर्यस्य

दानधर्मान् राजधर्मान् मोक्षधर्मान् विभागशः ॥ स्त्रीधर्मान् भगवद्धर्मान् समासव्यासयोगतः ॥ २७ ॥ धर्मार्थ
काममोक्षांश्च सहोपायान् यथा मुने ॥ नानाख्यानेतिहासेषु वर्णयामास तत्त्ववित् ॥ २८ ॥ धर्मं प्रवदत
स्तस्य स कालः प्रत्युपस्थितः ॥ यो योगिनश्छंदमृत्योर्वांछितस्तूत्तरायणः ॥ २९ ॥ तदोपसंहृत्य गिरः
सहस्रणीर्विमुक्तसंगं मन आदिपूरुषे ॥ कृष्णे लसत्पीतपटे चतुर्भुजे पुरःस्थिते मीलितदृग्व्य
धारयत् ॥ ३० ॥ विशुद्धया धारणया हताशुभस्तदीक्षयैवाशुगतायुधव्यथः ॥ निवृत्तसर्वेंद्रि
यवृत्तिविभ्रमस्तुष्टाव जन्यं विसृजन् जनार्दनम् ॥ ३१ ॥

२९ ॥ सहस्रणी युद्धे समीपस्थान् सहस्रं रथि
नो नयति पालयतीति ॥ सहस्रणी भीष्मः ॥ सहस्रगीरिति पाठे सहस्रार्थवतीर्गीर्यस्य लसंतो पीतो पटो यस्य
तस्मिन् ॥ अमीलितदृगेव मनो व्यधारयत् ॥ ३० ॥ अनयैव विशुद्धधारणया हतमशुभं यस्य सः ॥ तस्य श्रीकृष्णस्य
ईक्षणकृपादृष्ट्यैव गतआयुधश्रमो यस्य सः ॥ अतएव निवृत्तः सर्वेंद्रियवृत्तीनां विभ्रमः विविधं भ्रमणं य

४४

तथापि सम त्वेपि हे भूप॥ अनुकंपितमनुकंपा॥ यत्तो मेऽसून् प्राणांस्त्यजतः साक्षात्स्वयमेव न तु विंद्रादिरूपे
ण॥२२॥ इदानीं देहत्यागपर्यंतं श्रीकृष्णावस्थानं प्रार्थयते॥ भक्त्येति द्वाभ्यां॥२३॥ यावदिति विलंबं द्योतयति
अहं हिनोमि त्यजामीति स्वातंत्र्यं॥ इदमित्यनात्मत्वेन ज्ञातं॥ प्रसन्नहासेन अरुणलोचनाभ्यां उल्लसत्॥ रुचि

तथाप्येकांतभक्तेषु पश्य भूपानुकंपितं॥ यन्मेसूंस्त्यजतः साक्षात्कृष्णो दर्शनमागतः॥२२॥
भक्त्यावेश्य मनो यस्मिन्वाचा यन्नामकीर्तयन्॥ त्यजन्कलेवरं योगी मुच्यते कामकर्मभिः॥२३॥
स देवदेवो भगवान्प्रतीक्षतां कलेवरं यावदिदं हिनोम्यहं॥ प्रसन्नहासारुणलोचनोल्लसन्मु
खांबुजो ध्यानपथश्चतुर्भुजः॥२४॥ सूत उवाच॥ युधिष्ठिरस्तदाकर्ण्य शयानं शरपंजरे॥ अ
पृच्छद्विविधान्धर्मानृषीणामनुशृण्वतां॥२५॥ पुरुषस्वभावविहितान्यथावर्णं यथाश्रमं॥
वैराग्यरागोपाधिभ्यामाम्नातोभयलक्षणान्॥२६॥

रं मुखांबुजं यस्य ध्यानस्य पंथा विषयः॥ यो नैवक्लिश्यते केवलं सोग्रतः सन् मां प्रतीक्षतामित्यर्थः॥२४॥ ततस्तस्य
सानुकंपं वाक्यमाकर्ण्य॥२५॥ पुरुषस्वभावेन विहितान्॥ नरजातिसाधारणान् वर्णयामासेति तृतीयेनान्वयः
यथावर्णं धर्मान्यथाश्रमं॥ आश्रमधर्मांश्च वैराग्यरागाभ्यामुपाधिभ्यां क्रमेणाम्नातं उभयं निवृत्तिप्रवृत्तिरूपं ल

भा० प्र०
४५

विजयसखित्वमेवानुवर्णयन्नुरतिं प्रार्थयते ॥ युधितुरगेति तुरगाणां रजस्तुरगरजस्तेन विधूसरास्ते विष्वक्कूइतस्त
तश्चलंतः कचाः कुंतलास्तैर्लुलितं विकीर्णं ॥ श्रमवारि स्वेदबिंदुयुक्तं तेन भक्तवात्सल्यद्योतकेनालंकृतमास्यं यस्य
स्य तस्मिन् ॥ श्रीकृष्णे मम आत्मा मनोऽस्तु रमतामित्यर्थः ॥ पुनः किंभूते ॥ मदीयैर्निशितैस्तीक्ष्णैः शरैर्विभिद्यमाना त्वक्
यस्य शरीरे एव विलसत्कवचं यस्य तस्मिन् ॥ ३४ ॥ किंच ॥ सपदीति ॥ सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत ॥ याव
देतान्निरीक्षेऽहं योद्धुकामानवस्थितान् ॥ इति सख्युरर्जुनस्य वचो निशम्य ॥ सपदि तत्क्षणमेव स्वपरबलयोर्मध्ये स्थिते पा

युधि तुरगरजोविधूम्रविष्वक्कचलुलितश्रमवार्य्यलंकृतास्ये ॥ मम निशितशरैर्विभिद्यमानत्वचि विल
सत्कवचेऽस्तु कृष्ण आत्मा ॥ ३४ ॥ सपदि सखिवचो निशम्य मध्ये निजपरयोर्बलयो रथं निवेश्य ॥ स्थित
वति परसैनिकायुरक्ष्णा हृतवति पार्थसखे रतिर्ममास्तु ॥ ३५ ॥ व्यवहितपृतनामुखं निरीक्ष्य स्व
जनवधाद्विमुखस्य दोषबुद्ध्या ॥ कुमतिमहरदात्मविद्यया यश्चरणरतिः परमस्य तस्य मेऽस्तु ॥ ३६ ॥

र्थसखे रतिरस्तु ॥ तत्र स्थित्वा कृतं तस्य दर्शयति ॥ परस्य दुर्योधनस्य सैनिकानामायुरक्ष्णा कालदृष्ट्या हृतवति ॥ असौ
भीष्मः ॥ असौ द्रोणः ॥ असौ कर्णः इति तत्प्रदर्शनव्याजेन दृष्ट्यैव सर्वेषामायुराकृष्यार्जुनस्य जयं कृतवति ॥ ३५ ॥ न के
वलं अर्जुनस्य सपत्नायुर्हरणेनैव जयमावहन् ॥ किंतु विद्याहरणेनापीत्याह ॥ व्यवहिता दूरे स्थिता या पृतना तस्
या मुखमिव मुखं ॥ अग्रे स्थितान् भीष्मादीन्निरीक्ष्येत्यर्थः ॥ स्वजनवधाद्विमुखस्य ॥ निवृत्तस्य ॥ तदुक्तं गीता
सु ॥ एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत् ॥ विसृज्य सशरं चापं शोकसंविग्नमानसः ॥ इति कुमतिः अ

॥ ३६ ॥ [illegible]
४५

परमफलरूपां श्रीकृष्णे रतिं प्रार्थयितुं प्रथमं स्वकृतं समर्पयति ॥ इति नानाधर्मोद्युपायैर्मतिर्मनोधारणालक्षणा
उपकल्पिता समर्पिता ॥ क्व सात्वतानां पुंगवे श्रेष्ठे भगवति ॥ वितृष्णा निःकामा ॥ अवितृष्णेति वा छेदः ॥ अवितृ
ष्णत्यर्थः ॥ विगतो भूमा यस्मात्तस्मिन् ॥ यमपेक्ष्यान्यत्र महत्त्वं नास्तीत्यर्थः ॥ तदेव परमैश्वर्यमाह स्वसुखं स्व
रूपभूतपरमानंदमुपगते प्राप्तवत्येवक्वाति कदाचिद्विहर्तुं क्रीडितुं प्रकृतिमुपेयुषि स्वीकृतवति ॥ ननु स्व

भीष्म उवाच ॥ इति मतिरुपकल्पिता वितृष्णा भगवति सात्वतपुंगवे विभूम्नि ॥ स्वसुखमु
पगते क्वचिद्विहर्तुं प्रकृतिमुपेयुषि यद्भवप्रवाहः ॥ ३२ ॥ त्रिभुवनकमनं तमालवर्णं र
विकरगौरवरांबरं दधाने ॥ वपुरलककुलावृताननाब्जं विजयसखे रतिरस्तु मेऽनवद्या
॥ ३३ ॥

रूपतिरोधानेन जीववत्पारतंत्र्यमित्यर्थः ॥ विहर्तुमित्युक्तं प्रपंचयति ॥ यद्यतः ॥ प्रकृतेर्भवप्रवाहः ॥ सृष्टिपरंपरा भ
वति ॥ ३२ ॥ इदानीं श्रीमूर्तिं वर्णयन् ॥ रतिं प्रार्थयते ॥ त्रिभुवनकमनं ॥ त्रिलोकामेकमेव यत्कमनीयं ॥ तद्वपुर्दधाने
रतिमेस्तु तमालवन्नीलो वर्णो यस्य तत् प्रातःकालीनारवेः कर इव स्वतएव गौरे पीतेंऽबरे यस्मिन् ॥ तत ॥ अलककुले
रूपर्यावृतमाननाब्जं ॥ यस्मिन् तत् ॥ विजयसखे पार्थसारथौ अनवद्यात्र हैतुकी फलाभिसंधिरहिता रतिरस्तु ॥ ३३ ॥

भा०प्र० ९९ तदैवमन्यायैरपि भृत्यरक्षाव्यग्रे हरौ रतिमाशास्ते ॥ विजयोऽर्जुनः तस्य रथ एव कुटंबं अत्र कृत्यैः परिरक्षणीयो यस्य
तस्मिन् ॥ आत्तं तोत्रं प्रतोदो येन तस्मिन् धृताश्च ते हयानां रश्मयः प्रग्रहास्ते संति यस्य तस्मिन् व्रीह्यादिभ्यश्चेति नेक
ऽन्तादपि रश्मिशब्दादिन् ॥ तच्छ्रिया तया सारथ्यश्रिया ईक्षणीये शोभमाने ॥ मुमूर्षोर्मर्तुमिच्छोः ॥ नन्वन्यायवर्त्तिनि
किमिति रतिः प्रार्थ्यते अत आह ॥ भगवति अचिंत्यैश्वर्ये ॥ तदाह ॥ इह युद्धे हताः सर्वे यं निरीक्ष्य रूपं तत्समानं रू

विजयरथकुटंब आत्ततोत्रे धृतहयरश्मिनि तच्छ्रियेक्षणीये ॥ भगवति रतिरस्तु मे मुमूर्षोर्यमिह
निरीक्ष्य हता गताः सरूपं ॥ ३९ ॥ ललितगतिविलासवल्गुहासप्रणयनिरीक्षणकल्पितोरु
मानाः ॥ कृतमनुकृतवत्य उन्मदांधाः प्रकृतिमगन् किल यस्य गोपवध्वः ॥ ४० ॥ ॥ ॥ ॥ ६

पं गताः प्रापुरिति दिव्यदृष्ट्या पश्यन्नाह ॥ ३९ ॥ क्षत्रधर्मेण युध्यमानाः तत्स्वरूपं प्रापुरित्येतन्न चित्रं ॥ यतो मदांधा
अपि प्रापुरित्याह ॥ ललितगतिश्च विलासश्च रासादिमंजुगत्यादिभिः आत्मीयैस्तदीयैर्वा कल्पित उरुमानः पूजा या
सां ताः ॥ अत उत्कटेन मदेनांधा अत एव तदेकचित्तत्वेन तस्य कृतं कर्म गोवर्द्धनोद्धरणादिकं ॥ अनुकृतवत्यो गोपवध्
र्यस्य प्रकृतिं स्वरूपं अगमन् ॥ यं अगमन् ॥ प्राप्ताः मकारलोपस्त्वार्षः किल प्रसिद्धं तस्मिन्मे मतिरस्त्विति पूर्वेणैवान्वयः ॥ ४० ॥

९९

ममम हांतमनुग्रहं कृतवानित्याह ॥ द्वाभ्यां ॥ स्वनिगमं ॥ अशस्त्र एवाहं ॥ साहाय्यमात्रं करिष्यामीत्येवं
भूतां स्वप्रतिज्ञां हित्वा ॥ श्रीकृष्णं शस्त्रं ग्राहयिष्यामी इत्येवंरूपां मत्प्रतिज्ञामृतं सत्यं यथा भवति तथा
अधिकां कर्तुं योरथस्थः सन् ॥ अवप्लुतः सन् ॥ योऽभ्ययात् ॥ अभिमुखमधावत् ॥ इभं हंतुं हरिः सिंह इ
व ॥ किंभूतः ॥ धृतो रथचरणश्चक्रं येन सः ॥ तथा च संरंभेण मनुष्यनाट्य विस्मृतेः हृदरस्य सर्वभूतभुवन
भारेण प्रतिपदं चलत् स्खलंती गौः पृथ्वी यस्मात्तेनैव संरंभेण पथि गलत् पतितमुत्तरीयं वस्त्रं यस्य स मुकुंदो

स्वनिगममपहाय मत्प्रतिज्ञामृतमधिकर्तुमवप्लुतो रथस्थः ॥ धृतरथचरणोऽभ्ययाच्चल
द्गुर्हरिरिव हंतुमिभं गतोत्तरीयः ॥ ३७ ॥ शितविशिखहतो विशीर्णदंशः क्षतजपरिप्लुत
आततायिनो मे ॥ प्रसभमभिससार मद्वधार्थं स भवतु मे भगवान् गतिर्मुकुंदः ॥ ३८ ॥

मे गतिर्भवत्वित्युत्तरेणान्वयः ॥ ३७ ॥ एवं यद्यभ्ययात् तत् दास्यमानस्याततायिनो मे शितैस्तीक्ष्णैर्विशिखैर्हत
अतो विशीर्णदंशः ॥ विध्वस्तकवचः ॥ क्षतजेन रुधिरेण परिप्लुतः ॥ व्याप्तः सन् ॥ प्रसभं बलात् वारयंतमर्जुन
मतिक्रम्य मद्वधार्थमभिससार ॥ अभिजगाम ॥ एवं यो लोकप्रतीत्या अर्जुनपक्षपाती वस्तुतः ॥ वस्तु
तस्तु ममैवानुग्रहं कृतवान् ॥ यत मम भक्तेनेत्युक्तं वचः मा रुथास्तु स भगवान्मे गतिर्भवत्वित्यर्थः ॥ ३८ ॥ ५५

निःष्कले निरुपाधौ संपद्यमानं मिलितं ॥ आज्ञाय आलक्ष्य ॥ ६४ ॥ देवैर्मानवैश्च वादिताः ॥ राज्ञां मध्ये ये साधवः
सन्नस्य वः ॥ ६५ ॥ निर्हरणानि ॥ संस्कारादीनि ॥ सम्यक् परेतस्य ॥ मुक्तस्यापीत्यर्थः ॥ ६६ ॥ ६७ ॥ पितरं धृतराष्ट्रं
तपस्विनी संतापवती ॥ ६८ ॥ राजा युधिष्ठिरः ॥ ६९ ॥ इति प्रथमे नवमः ॥ ९ ॥ दशमे कृतकार्यस्य हस्तिनापुरतो हरेः ॥

संपद्यमानमाज्ञाय भीष्मं ब्रह्मणि निष्कले ॥ सर्वे बभूवुस्ते तूष्णीं वयांसीव दिनात्यये ॥ ६४ ॥ तत्र दुंदु
भयो नेदुर्देवमानववादिताः ॥ शशंसुः साधवो राज्ञां स्वात्यये तु पुष्पवृष्टयः ॥ ६५ ॥ तस्य निर्हरणादी
नि संपरेतस्य भार्गव ॥ युधिष्ठिरः कारयित्वा मुहूर्तं दुःखितोऽभवत् ॥ ६६ ॥ तुष्टुवुर्मुनयो हृष्टाः कृष्णं
तद्गुह्यनामभिः ॥ ततस्ते कृष्णहृदयाः स्वाश्रमान्प्रययुः पुनः ॥ ६७ ॥ ततो युधिष्ठिरो गत्वा सहकृष्णो ग
जाह्वयं ॥ पितरं सांत्वयामास गांधारीं च तपस्विनीं ॥ ६८ ॥ पित्रा चानुमतो राजा वासुदेवानुमोदितः ॥
चकार राज्यं धर्मेण पितृपैतामहं विभुः ॥ ६९ ॥ इति श्रीमद्भागवते महापुराणे प्रथमस्कंधे नवमोऽध्या
यः ॥ ९ ॥ शौनक उवाच ॥ हत्वा स्वरिक्थस्पृध आततायिनो युधिष्ठिरो धर्मविदां वरिष्ठः ॥ सहानु
जैः प्रत्यवरुद्धभोजनः कथं प्रवृत्तः किमकारषीत्ततः ॥ १ ॥

स्त्रीभिः संस्तूयमानस्य वर्ण्यते हास्तिनागमः ॥ राज्यं च कारेत्युक्तं तत्र पृच्छति ॥ हत्वेति ॥ स्वस्य रिक्थे धने स्पर्द्धंत इति स्पृधः ये ते तथा ॥
यद्वा ॥ स्वरिक्थाय स्पृधः संग्रामो येषां ॥ अत एव धनादिहरणादाततायिनः ॥ तान्हत्वा प्रत्यवरुद्धभोजनः ॥ बंधुवधदुःखेन संकु
चितभोगः ॥ राज्यलाभेन प्राप्तभोगो वा ॥ कथं राज्ये प्रवृत्तः ॥ प्रवृत्तो वा तदा किमकार्षीत् ॥ १ ॥ ॥ ॥ ऽऽ ॥ ॥ ॥ ऽऽ ॥ ६७

जगत्सृज्यत्तामनुस्मरन्नाह ॥ मुनिगणैर्नृपवर्यैश्च संकुले व्याप्ते ॥ अंतःसदसि सभामध्ये युधिष्ठिरस्य राजसूये ॥ ए
षां मुनिगणादीनां ईक्षणीयः ॥ अहो रूपमहो महिमेत्येवमाश्चर्येण विलोकनीयः सन् उपपेदे प्राप एष जगतामा
त्मा मम दृष्टिगोचरः ॥ दृष्टिविषयः सन् आविःप्रकटो वर्त्तते ॥ अहो मे भाग्यमिति भावः ॥ ४१ ॥ सोहं कृतार्थोस्मीत्याह ॥ त
मिममजं ॥ सम्यगधिगतः प्राप्तोस्मि ॥ सम्यक्कृतामाह ॥ विधूतभेदमोहः ॥ तदर्थभेदस्यौपाधिकत्वमाह ॥ आत्मकल्पि

मुनिगणनृपवर्यसंकुलेंऽतःसदसि युधिष्ठिरराजसूय एषां ॥ अर्हणमुपपेद ईक्षणीयो मम दृशि
गोचर एष आविरात्मा ॥ ४१ ॥ तमिममहमजं शरीरभाजां हृदि हृदि धिष्ठितमात्मकल्पितानां ॥ प्र
तिदृशमिव नैकधार्कमेकं समधिगतोस्मि विधूतभेदमोहः ॥ ४२ ॥ सूत उवाच ॥ कृष्ण एवं भगव
ति मनोवाग्दृष्टिवृत्तिभिः ॥ आत्मन्यात्मानमावेश्य सोऽन्तःश्वास उपारमत ॥ ४३ ॥ ॥ ऽऽ ॥ ॥ ऽऽ

तानां स्वयं निर्मितानां शरीरभाजां प्राणिनां हृदि हृदि प्रतिहृदयं धिष्ठितं अकारलोपस्त्वार्षः ॥ नैकधाऽधिष्ठानभेदाद
नेकधा भातमित्यर्थः ॥ अत्र दृष्टांतः ॥ सर्वप्राणिनां दृशं दृशं प्रति एकमेवार्कं ॥ अनेकधा प्रतीतमिवेति ॥ ४२ ॥ मनो
वाक् दृष्टीनां वृत्तिभिः ॥ परमात्मनि ॥ श्रीकृष्णे अंतरेव लीनः श्वासो यस्य सः ॥ ४३ ॥ रामरामरामरामरामराम

इदानींद्वारकागमनंनिरूपयितुमाह॥ उषित्वेति॥ स्वसुः॥ सुभद्रायाः॥ ७॥ तंयुधिष्ठिरं॥ ८॥ युयुत्सुः॥ धृतराष्ट्रा
द्वैश्यायांजातः॥ गौतमःकृपः॥ यमौनकुलसहदेवौ॥ ९॥ अन्याश्चस्त्रियः॥ मत्स्यसुताउत्तरा॥ तस्याःपुनर्ग्रहणंगर्भ
रक्षकस्यविरहेमोहाधिक्यात्॥ यद्वामत्स्यसुतासत्यवती॥ १०॥ तेषांकृष्णविरहासहनंकैमुत्यन्यायेना

उषित्वाहास्तिनपुरेमासान्कतिपयान्हरिः॥ सुहृदांचविशोकायस्वसुश्चप्रियकाम्यया॥ ७॥ आ
मंत्र्यचाभ्यनुज्ञातःपरिष्वज्याभिवाद्यतं॥ आरुरोहरथंकैश्चित्परिष्वक्तोभिवादितः॥ ८॥ सुभद्रा
द्रौपदीकुंतीविराटतनयातथा॥ गांधारीधृतराष्ट्रश्चयुयुत्सुर्गौतमोयमौ॥ ९॥ वृकोदरश्चधौ
म्यश्चस्त्रियोमत्स्यसुतादयः॥ नसेहिरेविमुह्यंतोविरहंशार्ङ्गधन्वनः॥ १०॥ सत्संगान्मुक्तदुः
संगोहातुंनोत्सहतेबुधः॥ कीर्त्यमानंयशोयस्यसकृदाकर्ण्यरोचनं॥ ११॥ तस्मिन्न्यस्तधियः
पार्थाःसहेरन्विरहंकथं॥ दर्शनस्पर्शनालापशयनासनभोजनैः॥ १२॥ सर्वेतेनिमिषैरक्षैस्तम
नुद्रुतचेतसः॥ वीक्षंतःस्नेहसंबद्धाविचेलुस्तत्रतत्रह॥ १३॥

ह॥ सत्संगादितिद्वाभ्यां॥ सतांसंगाद्धेतोःमुक्तः
स्त्र्यादिविषयोदुःसंगोयेनसः॥ सद्भिःकीर्त्यमानंरुचिकरंयस्ययशःसकृदप्याकर्ण्यसत्संगंहातुंत्यक्तुंनशक्नोति
११॥ दर्शनादिभिस्तस्मिन्श्रीकृष्णेन्यस्ताअर्थस्थापिताधीर्येषांते॥ १२॥ अतएवअनिमिषैर्नेत्रैस्तमेववीक्ष्यमाणास्तत्रतत्राहृ
यमाणयानाद्यर्थं॥ चेलुः॥ तस्मिन्यतःस्नेहेनसम्यग्बद्धाः॥ अतएवतमनुगतानिचेतांसियेषांते॥ १३॥ ॥ऽऽ॥ ॥ऽऽ॥ ॥ऽऽ॥ ॥ऽऽ॥

राज्येप्रवृत्तोश्रीकृष्णस्यप्रीतिंपर्य्यालोच्यप्रवृत्तस्तस्याशयेनोत्तरमाह ॥ वंशंकुरोःसंरोहयित्वापरीक्षितंरक्षित्वेन
संरोह्य ॥ अंकुरितंकृत्वाकथंभूतं ॥ वंशदवाग्निनिर्हृतं ॥ वंशाएवदवोवनेतस्मादुद्भूतःक्रोधरूपोऽग्निस्तेननिर्हृतंद
ग्धं ॥ निजराज्येनिवेश्यपद्य ॥ १ ॥ प्रवृत्तोहेतुमुक्त्वाकिमकार्षीदित्यस्योत्तरमाह ॥ निशम्येति ॥ प्रवृत्तंयत्तविज्ञानंपरमे
श्वराधीनंजगत्नस्वतंत्रमित्येवंभूतं ॥ तेनविधूतोविभ्रमोऽहंकर्त्तेत्येवंभूतोमोहोयस्यसः ॥ अनुजैरनुवर्त्तितःसेवितःसन्

सूतउवाच ॥ वंशंकुरोर्वंशदवाग्निनिर्हृतंसंरोहयित्वाभवभावनोहरिः ॥ निवेशयित्वानिजराज्यईश्वरो
युधिष्ठिरंप्रीतमनाबभूवह ॥ १ ॥ निशम्यभीष्मोक्तमथाच्युतोक्तंप्रवृत्तविज्ञानविधूतविभ्रमः ॥ शशा
सगामिंद्रइवाजिताश्रयःपरिध्युपांतामनुजानुवर्त्तितः ॥ २ ॥ कामंववर्षपर्ज्जन्यःसर्वकामदुघाम
ही ॥ सिषिचुस्मव्रजान्गावःपयसोधस्वतीर्मुदा ॥ ३ ॥ नद्यस्समुद्रागिरयःसवनस्पतिवीरुधः ॥ फलं
त्योषधयस्सर्वाःकाममन्वृतुतस्यवै ॥ ४ ॥ नाधयोव्याधयःक्लेशादैवभूतात्महेतवः ॥ अजातशत्रा
वभवन्जंतूनांराज्ञिकर्हिचित् ॥ ६ ॥
अजितःश्रीकृष्णएवप्रियोयस्यसः ॥ परिधिःसमुद्रःतत्पर्य्यंतांगांपृथ्वींपालयामास ॥ २ ॥ तस्यराज्यंमनुवर्णयति
काममितित्रिभिः ॥ महीसर्वकामदोग्ध्रीबभूव ॥ व्रजान्गोष्ठानि ॥ ऊधस्वतीः ॥ ऊधस्वत्यः ॥ ऊधःक्षीराशयःस्थूलोधस
स्त्यर्थः ॥ सिषिचुः ॥ अभ्यषिंचन् ॥ ४ ॥ अन्वृतुऋतावृतौ ॥ ५ ॥ अधयोमनोव्यथाव्याधयोरोगाःक्लेशाःशीतो
ष्णादिकृतादैवंभूतानि च ॥ आत्माचहेतुर्येषां ॥ आधिदैविकादीनि ॥ तेजंतूनांनअभवन् ॥ ६ ॥ ॥ ६६ ॥ ६६ ॥

भा० प्र०

॥६९॥

तत्रतेजःसौंदर्याद्यतिशयेनविस्मितान्यःसखीभ्योऽन्याःस्त्रियःकथयंति॥नात्रविस्मयःकार्यःसाक्षादीश्व
रत्वादस्येति सवाइतिचतुर्भिः वैस्मरणेकिलेतिप्रसिद्धः प्रमाणद्योतनेयएकएवाद्वितीयःपुरुषआसीत्स
एवायंश्रीकृष्णःकुत्रासीत्॥अविशेषआत्मनिनिःप्रपंचेनिजरूपेकेरा॥अग्रेगुणेभ्यः॥गुणक्षोभात्पूर्वंतत्पानि
शिप्रलयेचतत्स्थलक्षणंजगदात्मनिजीवेनिमीलि तात्मन्नितितल्लुप्तसप्तम्यंतपदंज्ञातावेकवचनंईश्वरेलीन
रूपेषुजीवेषुसत्स्वित्यर्थः॥ननुजीवानांब्रह्मत्वात्कथंलयस्तत्राह॥सुप्तासुशक्तिषुसतीषुजीवोपाधिभूतसत्वादिशक्तिलय

ऋषयऊचुः॥सर्वैकिलायंपुरुषःपुरातनोयएकआसीदविशेषआत्मनि॥अग्रेगुणेभ्योजगदात्मनीश्वरेनिमी
लितात्मन्निशिसुप्तशक्तिषु॥२१॥सएवभूयोनिजवीर्यचोदितांस्वजीवमायांप्रकृतिंसिसृक्षतीं॥अनामरू
पात्मनिरूपनामनीविधित्समानोनुससारशास्त्रकृत्॥२२॥

एवंजीवलयइत्यर्थः॥२१॥तदेवंसृष्टेरादौप्रलयानं
तरंचनिःप्रपंचावस्थानमुक्त्वासृष्टिप्रलययोर्मध्येसप्रपंचावस्थानेमाहुः सएवब्रह्मप्रच्युतस्वरूपस्थितिरेवप्रकृतिं
अनुससारअधिष्ठितवानभूयःपुनःसृष्टिप्रवाहस्यानादित्वात्॥कीदृशींनिजवीर्यचोदितां॥स्वकालशक्तिप्रेरितांस्वांशभूतां
जीवानांमायांमोहिनीं॥अतएवसिसृक्षतींस्त्रष्टुमिच्छंतीं॥किमर्थमनुससार॥अनामरूपेआत्मनिजीवरूपनाममनीविधातुमि
छन्॥उपाधिसृष्ट्याभूतानांभोगायेत्यर्थः॥कर्माणिचविधातुंवेदान्कृतवानित्याह॥शास्त्रकृदिति॥२२॥॥७॥॥७॥

श्रीरामजी॥॥ऽऽ॥श्रीरामरामराम ॥॥ऽऽ॥ श्रीरामरामेति॥॥ ॥ऽऽ॥ श्रीरामायरामचंद्रायनमः॥ ॥६९॥

अगारान्निर्यातिनिर्गच्छति॥औत्कंठ्याद्धेतोः॥उद्गलत्॥स्रवत्‌वाष्पंअश्रुन्यरुंधन्नेत्रेष्वेवरुधितवंत्यः॥तत्रहेतुः॥अ
भद्रंनोस्यादमंगलंमाभूदित्येतदर्थं॥१४॥प्रेमव्रीडास्मितयुक्तमीक्षणंयासांताः॥१६॥गुडाकानिद्रातस्याईशोजि
तनिद्रोऽर्जुनः॥१७॥व्यजनेचामरेजगृहतुर्मधुपतिःश्रीकृष्णः॥१८॥सत्याःश्रीकृष्णेतासामव्यभिचारात् किंतु ना

न्यरुंधन्नुद्गलद्वाष्पमौत्कंठ्याद्देवकीसुते॥निर्यात्यगारान्नोभद्रमितिस्याद्बांधवस्त्रियः॥१४॥मृ
दंगशंखभेर्यश्चवीणापणवगोमुखाः॥धुंधुर्यानकघंटाद्यानेदुर्दुंदुभयस्तदा॥१५॥प्रासाद
शिखरारूढाःकुरुनार्योदिदृक्षया॥ववृषुःकुसुमैःकृष्णंप्रेमव्रीडास्मितेक्षणाः॥१६॥सितात
पत्रंजग्राहमुक्तादामविभूषितं॥रत्नदंडंगुडाकेशःप्रियःप्रियतमस्यह॥१७॥उद्धवःसात्यकिश्
चैवव्यजनेपरमाद्भुते॥विकीर्यमाणःकुसुमैरेजेमधुपतिःपथि॥१८॥अश्रूयंताशिषःसत्या
स्तत्रतत्रद्विजेरिताः॥नानुरूपानुरूपाश्चनिर्गुणस्यगुणात्मनः॥१९॥अन्योन्यमासीत्संजल्प
उत्तमश्लोकचेतसां॥कौरवेंद्रपुरस्त्रीणांसर्वश्रुतिमनोहरः॥२०॥

नुरूपाश्चताअनुरूपाश्चनिर्गुणस्यपरमानंदस्यसुखीभवेत्यादयोनानुरूपाः॥गुणात्मनोमानुष्यनाट्याव
तारेनुरूपाश्चेत्यर्थः॥संधिरार्षः॥१९॥सर्वासांश्रुतीनांमनोहराउपनिषदोपिमूर्तिमत्यःसंजल्पः॥स्तुतिभाष

४

भा० प्र० विशेषतः श्रीकृष्णावतारसौभाग्यं वर्णयंति ॥ अहो इति पंचभिः ॥ यद्यस्मात् एष पुरुषोत्तमः श्रियः पतिः स्वजन्मना
५० यदोः कुलं अंचति विराजयति ॥ सत्करोति ॥ अतिश्लाघ्यतममतः चंक्रमणेन च मधोर्वनं मथुरां सत्करोति ॥ अतस्तत्पु
ण्यतममिति तस्यैवार्थस्याप्यत्यंतातिशये अलमिति ॥ तत्राप्याश्चर्यं अहो इत्युक्तं ॥ २६ ॥ अहो बत इत्याश्चर्यं
किं तत् ॥ कुशस्थली द्वारका स्वर्गे उत्कृष्टं इति यद्यशस्तस्य तिरस्करी पराभवकर्त्री भुवश्च पुण्ययशःकर्त्री भवति

अहो अलं श्लाघ्यतमं यदोः कुलं अहो अलं पुण्यतमं मधोर्वनं ॥ यदेष पुंसामृषभः श्रियः पतिः
स्वजन्मना चंक्रमणेन चांचति ॥ २६ ॥ अहो बत स्वर्यशसस्तिरस्करी कुशस्थली पुण्ययशस्करी
भुवः ॥ पश्यंति नित्यं यदनुग्रहेषितं स्मितावलोकं स्वपतिं स्म यत्प्रजाः ॥ २७ ॥ नूनं व्रतस्नानहु
तादिनेश्वरः समर्चितो ह्यस्य गृहीतपाणिभिः ॥ पिबंति याः सख्यधरामृतं मुहुर्व्रजस्त्रियः सं
मुमुहुर्यदाशयाः ॥ २८ ॥

यत् यतः ॥ यत्रत्याः सर्वाः प्रजाः स्वानुग्रहेण ईषितं स्मितपूर्वावलोकं ॥ यद्वा ॥ अनुग्रहार्थमिषितं इष्टं स्वस्या
त्मनः पतिं श्रीकृष्णं ननु पित्रादिवद्देहमात्रपतिं नित्यं पश्यंति स्म ॥ उषितमिति पाठे ॥ स्वानुग्रहार्थमुषितं ॥ कृत
निवासं तेनैव स्वर्गोत्सित्यर्थः ॥ २७ ॥ हे सखि ॥ अस्य गृहीतपाणिभिः पत्नीभिः ॥ ईश्वरो यमेव नूनं जन्मांतरेषु स
मर्चितः ॥ यस्मिन्नधरामृते आशा यासां ताः संमोहं मापुः इति मनोहरत्वमुक्तं ॥ २८ ॥ ॥ ६६ ॥ ५ ५०

अस्य दर्शनमिति दुर्लभमस्माभिर्लभ्यमित्याहुः ॥ सर्वैश्वर्यं ॥ यस्य पदं रूपं अङ्घ्रिं वा निर्जितो मातरिश्वा प्राणो यैः
ज्ञःसमार्षं ॥ सूरय एव पश्यंति ॥ केन भक्त्या उत्कलितं उत्कंठितो मत्तो यश्चात्मा बुद्धिस्तेन ॥ दृश्यते त्वेष यातु ध्येति
ऋतेः बुद्धिवैमल्यस्याप्ययमेव हेतुरित्याहुः ॥ ननु हे सखि ॥ एष एव सत्त्वं बुद्धिं परिमार्ष्टुं सम्यक् शोधयितुमर्ह
ति ॥ ननु योगादयइत्यर्थः ॥ यद्यप्यनुग्रहो एव सत्त्वं ज्ञानं परिमार्ष्टुं नाशयितुं दुर्गमनेनाप्रत्यूहीभवितुं नार्हति
किं त्वनेन सहैव गंतव्यमित्यर्थः ॥ २२ ॥ पुण्यश्लोकतामाहुः ॥ हे सखि यो वेदेषु रहस्यागमेषु च रहस्य निरूप

सवाश्रयं यत्पदमत्र सूरयो जितेंद्रिया निर्जितमातरिश्वनः ॥ पश्यंति भक्त्युत्कलितामलात्म
नानन्वेष सत्त्वं परिमार्ष्टुमर्हति ॥ २३ ॥ स वाश्रयं सत्यनुगीतसत्कथो वेदेषु गुह्येषु च गुह्यवा
दिभिः ॥ य एक ईशो जगदात्मलीलया सृजत्यवत्यत्ति न तत्र सज्जते ॥ २४ ॥ यदास्य धर्मेण त
मो धियो नृपाञ्जीवंति तत्रैव हि सत्त्वतः किल ॥ धत्ते भगं सत्यमृतं दयां यशो भवाय रूपाणि दधद्युगे
युगे ॥ २५ ॥

कैः अनुगीता सत्कथः ॥ अन्वनुगीताः सत्याः कथा यस्य सरवायं ॥ गानप्रकारमाहुः ॥ एक ईश इ ॥
त्यादि ॥ २४ ॥ एवंभूतस्य नानावतारकारणमाहुः ॥ यदा हीति ॥ तमोध्याप्ताधीर्येषां ते नृपाश्च अधर्मेण जीवं
ति ॥ केवलं प्राणान्पुष्णंति ॥ तत्र तदा एव एव भवाय स्थित्यै सत्त्वतः ॥ विशुद्धसत्त्वेन रूपाणि दधत् भगादीनि ध
त्ते प्रकटयति युगे युगे तत्तदवसरे भगं ऐश्वर्यं सत्त्वं सत्यप्रतिज्ञत्वं ॥ ऋतं यथार्थोपदेशकत्वं ॥ दयां भक्तकृपां

९७

भा० प्र०
५१

कुरुक्षेत्रंकुरुदेशांतर्गतमेवक्रमोत्रनविवक्षितः॥३४॥मरुर्निरुदकोदेशः॥धन्वोल्पोदकः॥आनर्त्तान्द्वारका
देशान्॥सविभुः॥उपागात्प्राप्तः॥हिभार्गवमनाक्ईषत्॥श्रांतावाहायस्यसः॥३५॥तत्रतत्रदेशे तत्रत्यैर्जनैःप्रत्यु
द्यतानिनिवेदितानि॥अर्हणानिउपायनानियस्मैसः॥सायंअपराह्नेपश्चाद्दिशंपश्चिमांदिशंभेजेप्राप्तः॥तत्त
दागविष्टःस्वर्गस्थःसूर्यःगांउदकंगतइत्यर्थः॥अह्नोवाएषप्रातःउदेत्यापः॥सायंप्रविशतीतिश्रुतेः॥यद्वातदस्मा

कुरुजांगलपांचालान्सूरसेनान्सयामुनान्॥ब्रह्मावर्तंकुरुक्षेत्रंमत्स्यान्सारस्वतानथ॥३४॥मरुध
न्वमतिक्रम्यसौवीराभीरयोःपरान्॥आनर्त्तान्भार्गवोपागाच्छ्रांतवाहोमनाग्विभुः॥३५॥तत्रतत्रह
तत्रत्यैर्हरिःप्रत्युद्यतार्हणः॥सायंभेजेदिशंपश्चाद्गविष्टोगांगतस्तदा॥३६॥इतिश्रीमद्भागवतेम
हापुराणेप्रथमस्कंधेनामदशमोध्यायः॥१०॥सूतउवाच॥आनर्त्तान्सउपव्रज्यस्वृद्धान्
जनपदान्स्वकान्॥दध्मौदरवरंशंखंविषादंशमयन्निव॥१॥

(तेषां)

(मे २) येकाल्लेज्ञानेरथाद्वत्तीर्यगविष्ठोभस्मै
स्थितः ततःगांजलाशयंगतःसन्॥पश्चाद्दिशंसंध्यांभेजे॥उपासितवानित्यर्थः॥३६॥इतिप्रथमेदशमः॥१०॥आ
नर्त्तैःस्तूयमानस्यपुरींनिविशवंधुभिः॥एकादशेरतिःसम्यग्यादवेंद्रस्यवर्ण्यते॥उत्सवैस्वलंकृत्यैरमुदेचध्वा
जतोरणां॥उत्तुसद्वत्त्वदीपालिंस्वपुरंप्रभुराविशत्॥१स्वृद्धान्समृद्धान्दरवरंपांचजन्यंदध्मौवादितवान्॥१॥ ॥५१॥

एतत्प्रपंचयति ॥ याइति द्वाभ्यां ॥ वीर्यप्रभावएवशुल्कं मूल्यं तेन शुष्मिणः बलिष्ठान् प्रद्युम्नः सांबश्च अंबश्च अस्त
तायां सां रुक्मिणीजांबवतीनाग्नजितीनां ताश्चादिर्यासां सत्यभामादीनां ताभ्यश्च या अपराश्च स्य श्लोकस्योत्त
रश्लोकेनान्वयः ॥ २९॥ एताः स्त्रीत्वमेव परं केवलं साधु शोभनं कुर्वंते अपास्तपेशलं भद्रं स्वातंत्र्यं यस्मान्निरस्तं शौचं शुचि
त्वं यस्मात्तं धाम तमपि जातु कदाचिदपि नापैति न निर्गच्छति आहृतिभिर्व्यवहारैः ॥ य द्वा ॥ पारिजातादिप्रियवस्त्वाह

यावीर्यशुल्केन हृताः स्वयंवरे प्रमथ्य चैद्यप्रमुखान् हि शुष्मिणः ॥ प्रद्युम्नसांबांबसुतादयोपरा ।
याश्चाहृता भौमवधे सहस्रशः ॥ २९॥ एताः परं स्त्रीत्वमपास्तपेशलं निरस्तशौचं बत साधु कुर्वते ॥ या
सां गृहात्पुष्करलोचनः पतिर्न जात्वपैत्याहृतिभिर्हृदि स्पृशन् ॥ ३०॥ एवंविधा गदंतीनां स गिरः पु
रयोषितां ॥ निरीक्षणेनाभिनंदन् सस्मितेन ययौ हरिः ॥ ३१॥ अजातशत्रुः पृतनां गोपीथाय मधुद्वि
षः ॥ परेभ्यः शंकितः स्नेहात्प्रायुंक्त चतुरंगिणीं ॥ ३२॥ अथ दूरागतान् शौरिः कौरवान् विरहातुरान्
संनिवर्त्य दृढं स्निग्धान् प्रायात्स्वनगरीं प्रियैः ॥ ३३॥

रगैः हृदिस्पृशन् आनंदयन् ॥ ३०॥ एवंविधाश्चित्रा गिरः स
स्मितेन निरीक्षणेनाभिनंदन् सहर्षिर्ययौ ॥ ३१॥ मधुद्विषोपि गोपीथाय रक्षणाय स्नेहात् परेभ्यः शत्रुभ्यः शंकितः सन् प्रायुंक्त ॥ ह
स्त्यश्वरथपादातं सेनांगं स्याच्चतुर्विधमित्येवं चतुरंगिणी पृतना सेना ॥ ३२॥ पांडोः कुरुवंशजत्वात् पांडवा अपि कौ
रवा एव तान् प्रियैः उद्धवादिभिः सह ॥ ३३॥ ॥ १० ॥ रामरामराम ॥ रामरामरामराम ॥ ॥ रामरामराम

अतोभवायोद्भवायनोऽस्माकंत्वंभवहेविश्वभावनकृतिनःकृतार्थायोवभूविमज्ञानावयं॥७॥कृतार्थतामे
वादुः॥अहोभगवतावयंसनाथाःस्मयद्यस्मात्तवरूपंपश्येमत्रैविष्टपानामपिदूरेदर्शनंयस्यदेवाना
मपिदुर्लभंइत्यर्थः॥प्रेमणायस्मितंतेनयुक्तंस्निग्धंनिरीक्षणंयस्मिन्॥तद्रूपंसर्वेषुचांगेषुसौभगंयस्मिन्
८॥अर्भकाइवसकरुणमाहुः॥यर्हियदाभोअंबुजाक्षनोभवानितिपाठेनेइत्यनादरेणषष्ठी॥अस्मान

भवायनस्त्वंभवविश्वभावनत्वमेवमाताथसुहृत्पतिःपिता॥त्वंसद्गुरुर्नःपरमंचदैवतं
यस्यानुवृत्त्याकृतिनोवभूविम॥७॥अहोसनाथाभवतास्मयद्वयंत्रैविष्टपानामपिदूरदर्शनं
प्रेमस्मितस्निग्धनिरीक्षणाननंपश्येमरूपंतवसर्वसौभगं॥८॥यर्ह्यंबुजाक्षापससारभोभवा
न्कुरून्मधून्वाथसुहृद्दिदृक्षया॥तत्राब्दकोटिप्रतिमःक्षणोभवेद्रविंविनाक्ष्णोरिवनस्तवाच्यु
त॥९॥कथंवयंनाथचिरोषितेत्वयिप्रपन्नाखिलतापशोषणं॥जीवेमसौंदर्यसुहाससशो
भितमपश्यमानावदनंमनोहरं॥१०॥

नाइत्यत्रअपससार॥अपहायजगाम॥कुरून्हस्तिनापुरं॥मधून्मथुरांवा॥तत्रतदारविंविनाआंध्यादयस्तथो
यथा॥एवंतवनः॥त्वदीयानामस्माकमपीत्यर्थः॥९॥नकेवलमदर्शनेऽस्माकमांध्यंकिंतुजीवनमपिदुर्लभ
मित्याहुः॥कथमितिप्रपन्नानांत्वस्माकंयोयोखिलस्तापस्तस्यशोषणंनाशकंत्वांप्रपन्नानांतस्मात्संभवा

दरः शंखः ॥ दध्मायमानः ॥ अतिशयेन भगवताऽऽपूर्य्यमाणः ॥ उच्चकाशे शुशुभे इत्यन्वयः ॥ कथंभूतः ॥ धवलमुद
रं यस्य सः धवलोदरः ॥ उरुक्रमः कृष्णस्तस्याधरशोणेन रागेण शोणिमा वा यस्य ॥ अधरशोणशोणिमा स्वाधरैर्र
मनु ॥ करकंजे करकमलयोः संपुटे मध्ये वर्त्तमानः कथं शुशुभे अब्जखंडे रक्तकमलसमूहे कलहंसो राजहंसः
उच्चकाशे यथा तद्वत् ॥ २ ॥ जगतो यद्भयं तस्य भयावहं ॥ प्रत्युद्ययुः ॥ प्रत्युज्जग्मुः भर्तुर्द्दर्शने लालसा औत्सुक्यं या

स उच्चकाशे धवलोदरो दरोप्युरुक्रमस्याधरशोणशोणिमा ॥ दध्मायमानः करकंजसंपुटे
यथाब्जखंडे कलहंस उत्स्वनः ॥ २ ॥ समुपश्रुत्य निनदं जगद्भयभयावहं ॥ प्रत्युद्ययुः प्रजाः सर्वा
भर्तुर्द्दर्शनलालसाः ॥ ३ ॥ तत्रोपनीतबलयो रवेर्द्दीपमिवादृताः ॥ आत्मारामं पूर्णकामं निजला
भेन नित्यदा ॥ ४ ॥ प्रीत्युत्फुल्लमुखाः प्रोचुर्हर्षगद्गदया गिरा ॥ पितरं सर्वसुहृदमवितारमिवार्भ
काः ॥ ५ ॥ नताः स्म ते नाथ सदांघ्रिपंकजं विरिंचिवैरिंच्यसुरेंद्रवंदितं ॥ परायणं क्षेममिहेच्छतां परं न यत्र
कालः प्रभवेत्परः प्रभुः ॥ ६ ॥

सांताः ॥ ३ ॥ तत्र तस्मिन् श्रीकृष्णे उपनीताः समर्पिताः बलयः उपायनानि याभिः ॥ निरपेक्षेपि तस्मिन्नादरेण समर्प
णे दृष्टांतः रवे दीपमिवेति ॥ ४ ॥ पितरं अर्भक इव तं ॥ सर्वसुहृदमवितारं रक्षितुरित्युत्तरेणान्वयः ॥ सौहृदत्वेनो
पावितारं ॥ नतु कामेन अत्र हेतुः परमानंदनिजस्वरूपलाभेनैव पूर्णकामं ॥ ५ ॥ विरिंचिब्रह्मा वैरिंच्याः सनकादयः ॥ इ
हसंसारे परं क्षेममिच्छतां परायणं ॥ परमप्रापणं ॥ कुतः परेषां ब्रह्मादीनां प्रभुरपि कालो यत्र प्रभुर्न भवेत् ॥ ६ ॥

भा० प्र०
५३

प्रेष्ठमायांतं निशम्य श्रुत्वा वसुदेवादयः प्रत्युज्जग्मुरिति चतुर्थेनान्वयः ॥१७॥ प्रहर्षवेगेनोच्छसितानि उज्झिता
निशयनादीनि यैः ॥ श्वसिर्द्रुतगतौ ॥१८॥ वारणेंद्रं मंगलार्थं पुरतः कृत्वा सुसुमंगलैः सुमंगलसहितैः पुष्पादि
युक्तपाणिभिः ॥ ब्रह्मघोषो मंत्रपाठः ॥१९॥ प्रणयेन स्नेहेनागतं साध्वसं संभ्रमो येषां वारमुख्या नर्तक्यो नटस्त्रियः

निशम्य प्रेष्ठमायांतं वसुदेवो महामनाः ॥ अक्रूरश्चोग्रसेनश्च रामश्चाद्भुतविक्रमः ॥१७॥ प्रद्युम्न
श्चारुदेष्णश्च सांबो जांबवतीसुतः ॥ प्रहर्षवेगोच्छसितशयनासनभोजनाः ॥१८॥ वारणेंद्रं
पुरस्कृत्य पाणिभिः सुसुमंगलैः ॥ शंखतूर्यनिनादेन ब्रह्मघोषेण चादृताः ॥१९॥ प्रत्युज्ज
ग्मू रथैर्हृष्टाः प्रणयागतसाध्वसाः ॥ वारमुख्याश्च शतशो यानैस्तद्दर्शनोत्सुकाः ॥ लसत्कुंड
लनिर्भातकपोलवदनश्रियः ॥२०॥ नटनर्तकगंधर्वाः सूतमागधवंदिनः ॥ गायंति चोत्तमश्लोक
चरितान्यद्भुतानि च ॥२१॥

प्रत्युज्जग्मुः ॥ अद्भुतानि चेति चकारस्य वंदिन इत्यन्वयः ॥ लसत्कुंडलैर्निर्भातानि कपोलानि तैर्वदने श्रीर्यासां ताः
वारमुख्या नर्तक्यो वेश्याः ॥२०॥ नटा नवरसाभिनयचतुराः ॥ तालाद्यनुसारेण नृत्यंतो नर्तकाः ॥ गंधर्वा गायकाः ॥ सूताः
पौराणिकाः प्रोक्ता मागधा वंशशंसकाः ॥ वंदिनस्त्वमलप्रज्ञाः प्रस्तावसदृशोक्तयः ॥ ते सर्वे गायंतीति चेति चकारस्या

॥५३॥

इति च एवंविधाः अन्याश्चोच्चारिता वाचः श्रुत्वा नरदृष्ट्या सानंदावलोकनेनानुग्रहं कुर्वन् पुरीं द्वारकां प्राविशत् ॥११॥ तां स्तौति
पंचभिः ॥ स्वतुल्यबलैर्मधुभोजादिभिर्गुप्तां रक्षितां ॥१२॥ सर्वेषु ऋतुषु सर्वविभवाः पुष्पादिसंपदो येषां तेषु पुण्यवृक्षाः
लताश्च मालतामंडपाश्च येषु ते हृद्यानादिभिर्वेष्टितायां पद्माकराः सरांसि तैः श्रीः शोभा यस्यां तां ॥ उद्यानं फलप्रधानं ॥ उपव
नं ॥ पुष्पप्रधानं ॥ आरामः क्रीडार्थं वनं ॥१३॥ गोपुरं पुरद्वारं ॥ गृहद्वारं कृतानि कौतुकेन उत्सवेन तोरणानि यस्यां ग

इति चोदीरिता वाचः प्रजानां भक्तवत्सलः ॥ शृण्वानोनुग्रहं दृष्ट्या वितन्वन्प्राविशत्पुरीं ॥११॥ मधु
भोजदशार्हार्हकुकुरांधकवृष्णिभिः ॥ आत्मतुल्यबलैर्गुप्तां नागैर्भोगवतीमिव ॥१२॥ सर्वर्तुसर्व
विभवपुण्यवृक्षलताश्रमैः ॥ उद्यानोपवनारामैर्वृतपद्माकरश्रियं ॥१३॥ गोपुरद्वारमार्गेषु कृ
तकौतुकतोरणां ॥ चित्रध्वजपताकाग्रैरंतःप्रतिहतातपां ॥१४॥ संमार्जितमहामार्गरथ्यापणकच
त्वरां ॥ सिक्तां गंधजलैरुप्तां फलपुष्पाक्षतांकुरैः ॥१५॥ द्वारि द्वारि गृहाणां च दध्यक्षतफलेक्षुभिः ॥
अलंकृतां पूर्णकुंभैर्वलिभिर्धूपदीपकैः ॥१६॥

रुडादिचिह्नांकिताः ॥ ध्वजाः जयपटपत्रांकिताः पताका
नामग्रैः अंतः प्रतिहत आतपो यस्यां ॥१४॥ संमार्जितानि निःसारितरजस्कानि महामार्गादीनि यस्यां ॥ महामार्गो रा
जमार्गः ॥ रथ्या इतरमार्गः ॥ आपणकाः पण्यवीथयः ॥ चत्वराण्यंगणानि ॥ फलादिभिरुप्तां अवकीर्णां ॥१५॥१६॥

भा० प्र०
५४

सितैरातपत्रव्यजनैरुपस्कृतो मंडितः ॥ अर्केऽस्य उडुपोनद्वत्र सहितश्चंद्रश्च चापमिंद्रधनुश्च वैद्युतं विद्युत्तेजाः तैः ॥ अ-
र्कः छत्रस्योपमानं नक्षत्राणि पुष्पवृष्टेः चंद्रः परिभ्रमत्कृतमंडलाकारयोश्चामरव्यजनयोः चापं वनमालाया ॥ वि-
द्युत्तेजः पिशंगवाससो ॥ अभूतोपमेयं ॥ यदि घनस्योपरि सूर्यबिंबं भवतश्चंद्रो सर्वतो नक्षत्राणि मध्ये च मिलि-
तं चापद्वयं स्थिरं विद्युत्तेजो यदि भवेत्तर्हि स घनो यथा भातीत्यर्थः ॥ २८ ॥ देवकीप्रमुखाः सप्रववंद्य

सितातपत्रव्यजनैरुपस्कृतः प्रसूनवर्षैरभिवर्षितः पथि ॥ पिशंगवासा वनमालया बभौ घनो यथार्कोडुपचापवैद्युतैः ॥ २८ ॥ प्रविष्टस्तु गृहं पित्रोः परिष्वक्तः स्वमातृभिः ॥ ववंदे शिरसा सप्त देवकीप्रमुखा मुदा ॥ २९ ॥ ताः पुत्रमंकमारोप्य स्नेहस्नुतपयोधराः ॥ हर्षविह्वलितात्मानः सिषिचुर्नेत्रजैर्जलैः ॥ ३० ॥ अथाविशत्स्वभवनं सर्वकाममनुत्तमं ॥ प्रासादा यत्र पत्नीनां सहस्राणि च षोडश ॥ ३१ ॥ पत्न्यः पतिं प्रोष्य गृहानुपागतं विलोक्य संजातमनोमहोत्सवाः ॥ उत्तस्थुरारात्सहसासनाशयात्साकं व्रतैर्व्रीडितलोचनाननाः ॥ ३२ ॥

तिसात्सौंदर्यादरविशेषज्ञापनार्थमुक्तं ॥ अष्टादशापि वसुदेवस्य भार्या मातृतुल्यत्वात्तु मस्कृता एव ॥ २९ ॥ ३० ॥ सहस्राणि
च षोडशेति च कारादष्टोत्तरशताधिकानीति ज्ञेयं ॥ ३१ ॥ प्रोष्य देशांतरे उषित्वा आरात्तदूरादेव विलोक्य संजातो मनसि महो-
त्सवो यासां ताः ॥ आसनादाशयाच्च आसनो हृदेन श्रीकृष्णेनात्मनः संश्लेषे अंतःकरणव्यवधानमपि न सहंत इत्यर्थः ॥
व्रीडितानि लोचनानि आननानि च यासां ॥ अपांगैरेव वीक्षणात् ॥ व्रीडितलोचनाः ॥ अवनतमुखत्वात् व्रीडिताननाः ॥ साकं व्रतै-
रिति हास्यव्रीडावर्जनादिनियमात्त्र पितृभ्यः समुत्तस्थुरित्यर्थः ॥ धृतव्रता एवोत्तस्थुरिति वा ॥ व्रतानि च याज्ञवल्क्ये नोक्तानि

क्रीडाशरीरसंस्कारं समाजोत्सवदर्शनं ॥ हास्यं परगृहे या-
नं त्यजेत्प्रोषितभर्तृकेति ॥ ३२ ॥

यथाविधियेः॥ सहयथोपचितंतैस्तथासमागमंकृत्वा सर्वेषांमनंकृतवानित्यर्थः॥ २२॥ तदाहप्रह्वेति॥ प्रह्वत्वं
शिरसानतिः॥ अभिवादनंवाचानतिः॥ आश्लिष्यअभयंदत्वा॥ अपाकानामथाभिव्याप्यवरैःअभीष्टदानैश्चमानं
कृतवान् इत्यर्थः॥ २३॥ अन्यैश्चवंदिभिश्च॥ २४॥ हेविप्रहेशौनकतस्यत्तणेमहानुत्सवोयासां॥ २५॥ यद्यस्मात्त॥ नि

भगवांस्तत्रबंधूनांपौराणांमनुवर्तिनां॥ यथाविध्युपसंगम्यसर्वेषांमानमादधे॥ २२॥ प्रह्वाभिवा
दनाश्लेषकरस्पर्शस्मितेक्षणैः॥ आश्वास्यचाश्वपाकेभ्योवरैश्चाभिमतैर्विभुः॥ २३॥ स्वयंचगुरुभि
र्विप्रैःसदारैःस्थविरैरपि॥ आशीर्भिर्युज्यमानोन्यैर्वंदिभिश्चाविशत्पुरं॥ २४॥ राजमार्गंगते
कृष्णेद्वारकायाःकुलस्त्रियः॥ हर्म्याण्यारुरुहुर्विप्रतदीक्षणमहोत्सवाः॥ २५॥ नित्यंनिरी
क्षमाणानांयदपिद्वारकौकसां॥ नवितृप्यंतिहिदृशःश्रियोधामांगमच्युतम्॥ २६॥
श्रियोनिवासोयस्योरःपानपात्रंमुखंदृशां॥ बाहवोलोकपालानांसारंगाणांपदांबुजं॥ २७॥

त्यंसदाअच्युतंनिरीक्षमाणानामपिदृशोनैवतृप्यंति॥ अतआरुरुहुः॥ कथंभूतंश्रियःशोभायाधामस्थानंअं
गंयस्यतं॥ २६॥ एतदेवाभिनयेनाह॥ श्रियोलक्ष्म्यायस्योरोवक्षःनिवासः॥ यस्यमुखंसर्वप्राणिनांदृशांसौंदर्यामृ
तपानायपात्रंयस्यबाहवोलोकपालानांनिवासः॥ सारंश्रीकृष्णंगायंतीतिसारंगाभक्तास्तेषांयस्यपदांबुजंनिवासस्तंनि

भागवतटीकाप्रथमस्कंधः॥ ९१॥

भा० प्र०
५५

नन्वेवं स्त्रीसंगादिभिः संसारप्रतीतेः कथं भगवानस्पृष्टवत्तीर्णइत्युच्यते॥ तत्राह॥ उद्दामेति द्वाभ्यां॥ यासां उद्दामः गंभीरो
योभावोभिप्रायः॥ तस्यापि पिशुनः सूचकोऽमलोवल्गुः सुंदरोहासो व्रीडावलोकश्च ताभ्यां निहतः अमदनः श्रीमहादेवो
पि संमुह्य लज्जया चापं पिनाकं अजहात्॥ अथवा ताडितो मदनोपि जगद्विजयी संमुह्येति कर्तव्यतामूढः सन् धनुस्त
त्याज हीनाः प्रमदोत्तमाः कामविजयिन्योपि एवंप्रभावा याः स्त्रियः इत्येवावहिवत्तित॥ यद्वा॥ भगवता मोहिनीरूपेण
महेशोपि मोहितएव॥ एताश्च ताः द्विलासा एवेति॥ तथापि ताः कुहकैः कपटैः विभ्रमैः यस्येंद्रियं मनः विमथितुं न शेकुः॥ नक्षो
भयितुं शक्ताः॥ ३७॥ तमीदृशं अयं प्राकृतो लोकः आत्मौपम्येन स्वसादृश्येन संगिनं मनुजं मन्यते॥ अत्र हेतुः एवानं

उद्दामभावपिशुनामलवल्गुहासव्रीडावलोकनिहतो मदनोपि यासां॥ संमुह्य चापमजहात्प्रमदो
त्तमास्ता यस्येंद्रियं विमथितुं कुहकैर्न शेकुः॥ ३७॥ तमयं मन्यते लोको ह्यसंगमपि संगिनं॥ आ
त्मौपम्येन मनुजं व्यापृण्वानं यतो बुधः॥ ३८॥ एतदीशनमीशस्य प्रकृतिस्थोपि तद्गुणैः॥ न युज्यते
सदात्मस्थैर्यथा बुद्धिस्तदाश्रया॥ ३९॥

व्याप्रियमाणं मनुष्यबुद्ध्या पारं कुर्वंतं यतोयमबुधः॥ अतत्वज्ञः॥ ३८॥ कुतइत्यपेक्षायामैश्वर्यलक्षणमाह॥ एतदिति
ईशस्येशनं ऐश्वर्यमेतदेव॥ किं तत्॥ प्रकृतिस्थोपि तत्स्थाः गुणैः सुखदुःखादिभिः सदा न युज्यते इति यत्॥ यथा आत्म
स्थैः आनंदादिभिः आत्माश्रयापि बुद्धिर्न युज्यते तद्वत्॥ वैधर्म्ये दृष्टांतो वा॥ आत्मस्थैः सत्ताप्रकाशादिभिर्यथा बु
द्धिर्युज्यते॥ एवं वा अस्मदात्मादेहः तत्रस्थैर्गुणैः तदाश्रयापि बुद्धिः तदुपाधिर्जीवो युज्यते एवं प्रकृतिस्थोपि तद्गु
णैर्न युज्यत इति यतः॥ एतदीशनमीशस्येति॥ ३९॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ॥ ५५

ऋयांतंदृशोत्सवेमात्मनावुद्धापरिरेभिरे ॥ ततोदृष्टिभिः ॥ ततः समीपमागतं आत्मजैः पुत्रैर्गृहीतकेरमा
लिंगितवत्यइत्यर्थः ॥ अत्रहेतुः दुरंतभावात्अतिगंभीराभिप्रायांतदाचतासांनेत्रयोः ॥ निरुद्धमप्यवुवाष्यंवै
क्लवात् ॥ वैवश्यात् ॥ आस्रवतईषत्सुस्राव ॥ अतएवधैर्यहान्याविलज्जतीनां ॥ हेभृगुवर्यचित्रंश्रृणुइति ॥ ३३

तमात्मजैर्दृष्टिभिरंतरात्मनादुरंतभावाः परिरेभिरेपतिं ॥ निरुद्धमप्यास्रवदंवुनेत्रयोर्वि-
लज्जतीनां भृगुवर्यवैक्लवात् ॥ ३३ ॥ यद्यप्यसौपार्श्वगतोरहोगतस्तथापितस्यांघ्रियुगंनवं
नवं ॥ पदेपदेकाविरमेततत्पदाच्चलापियच्छ्रीर्नजहातिकर्हिचित् ॥ ३४ ॥ एवंनृपाणां
क्षितिभारजन्मनामक्षौहिणीभिः परिवृत्ततेजसां ॥ विधायवैरंश्वसनोयथानलंमिथो
वधेनोपरतोनिरायुधः ॥ ३५ ॥ सएषनरलोकेस्मिन्नवतीर्णः स्वमायया ॥ रेमेस्त्रीरत्नकूटस्थो
भगवान्प्राकृतोयथा ॥ ३६ ॥

पार्श्वगतः समीपस्थः ॥ तत्रापिरहोगतः ॥ एकांतेप्रवर्त्तमानेस्म ॥ पदेपदेप्रतिक्षणंनवंनवमेव ॥ अत्रकैमुत्यन्यायः
काविरमेतेति ॥ चला चंचलस्वभावापि ॥ ३४ ॥ उक्तंश्रीकृष्णचरितंसंक्षिप्याह ॥ एवमितिद्वाभ्यां क्षितेर्भारायजन्म
येषां ॥ अक्षौहिणीभिः कृत्वापरिवृत्तंसर्वतः प्रसृतंतेजः प्रभावोयेषां ॥ श्वसनोवायुर्वेणूनांअन्योन्यसंघर्षेणानलं
विधायमिथोदाहेनयथोपशाम्यति ॥ तद्वत् ॥ ३५ ॥ स्त्रीरत्नकूटस्थः ॥ उत्तमस्त्रीकदंबस्थः ॥ ३६ ॥ ॥ ss ४ ॥

निःस्पृहस्यापि राज्ञः श्रीकृष्णानुग्रहात्तादृक्पौत्रः समजनीति वक्तुं तस्य श्रीकृष्णभक्त्युद्रेकमाह ॥ अपीपल
दिति त्रिभिः ॥ पितृवदपीपलत् पालयामास ॥ ४ ॥ क्रतवस्तदुपार्जितलोकाश्च ॥ ५ ॥ सुरस्पार्हाः सुराणां स्पृ
हणीयास्ते संपदादयः ॥ कामा विषयाः ॥ राज्ञः किमु मुदं प्रीतिमधिजह्रुर्न तु कृतवंत इत्यर्थः ॥ अत्र हेतुः

सूत उवाच ॥ अपीपलद्धर्मराजः पितृवद्रंजयन्प्रजाः ॥ निस्पृहः सर्वकामेभ्यः कृष्णपा
दानुसेवया ॥ ४ ॥ संपदः क्रतवो लोका महिषी भ्रातरो मही ॥ जंबूद्वीपाधिपत्यं च यशश्च त्रिदिवं
गतं ॥ ५ ॥ किं ते कामाः सुरस्पार्हा मुकुंदमनसो द्विजाः ॥ अधिजह्रुर्मुदं राज्ञः क्षुधितस्य यथेत
रे ॥ ६ ॥ मातुर्गर्भगतो वीरः स तदा भृगुनंदन ॥ ददर्श पुरुषं कंचिद्दह्यमानोऽस्त्रतेजसा ॥ ७ ॥
अंगुष्ठमात्रममलं स्फुरत्पुरटमौलिनं ॥ अपीच्यदर्शनं श्यामं तडिद्वाससमच्युतं ॥ ८ ॥

मुकुंद एव मनो यस्येति ॥ क्षुधितस्यान्नैकमनसः ॥ यथा इतरे स्रक्चंदनादयो प्रियं न कुर्वंति तद्वत् ॥ ६ ॥
प्रस्तुतमाह ॥ मातुरिति ॥ ७ ॥ पुरटं सुवर्णं स्फुरत्पुरटं मौलिर्यस्यास्ति तं ॥ व्रीह्यादिभ्यश्चेति नप्रत्ययः ॥ अपी
च्यं अतिसुंदरं दृश्यत इति दर्शनं रूपं यस्य ॥ तडिद्वाससीयस्येति ॥ श्याममिति च पदाभ्यां विद्युद्भूषितमे
घोपमा सूचिता ॥ अच्युतं अविकारं ॥ ८ ॥

तत्पतत्योपिनस्यतत्वंनजानंतीत्याह ॥ तं स्वैरं आत्मवशंपरंह: एकातेअनुव्रतंअनुरक्तंचमेनिरे ॥ भर्तुर प्रमाणविद: प्रमाणमियत्ताम हिमाजानंतरत्याह ॥ ईश्वरंरतेवक्तंमतय: ॥ अहंरत्तयोययाखाधीनस्वधर्मायोगिनंमन्यंतेतद्वत ॥ यद्वा ॥ यथातासां मतय: कल्पना: ॥ तथानमीश्वरंस्त्रेणादिरूपंमेनिरेइत्यर्थ: ॥ ६० ॥ इतिप्रथमेएकादश: ॥ ११ ॥ पुरोक्तंयत्प्रसंगायद्रौणिदंडादिविस्तरं ॥ द्वादशेतुतद्देवाथपरीक्षिज्जन्मवर्ण्यते ॥ १ ॥ परीक्षितोथराजर्षेर्जन्मकर्मविलापनं ॥ संस्थांचपांडुपुत्राणांवक्ष्ये

तंमेनिरेवला मूढा: स्त्रैणंचानुव्रतंरह: ॥ अप्रमाणविदोभर्तुरीश्वरंमतयोयथा ॥ ६० ॥ इतिश्रीमद्भागवतेमहापुराणेप्रथमस्कंधेएकादशोध्याय: ॥ ११ ॥ शौनकउवाच ॥ अश्वत्थाम्नोपसृष्टेन ब्रह्मशीर्ष्णोरुतेजसा ॥ उत्तराया हतोगर्भईशेनाजीवित: पुन: ॥ १ ॥ तस्यजन्ममहाबुद्धे: कर्माणि चमहात्मन: ॥ निधनंचयथैवासीत्सप्रेत्यगतवान्यथा ॥ २ ॥ तदिदंश्रोतुमिच्छामिगदितुंयदि मन्यसे ॥ ब्रूहिन: श्रद्दधानानांयस्यज्ञानमदाच्छुक: ॥ ३ ॥

कौत्मक योदयमिति प्रतिज्ञायपांडवानांराज्यस्थितिरूपाद्यान्तरूपासप्रसंगासप्त माध्यायमारभ्यनिरूपित ॥ इदानीमोपोद्घातिकमुक्त्वानुवादपूर्वकंपृच्छति ॥ अश्वत्थाम्नेति ॥ उपसृष्टेन विसृष्टेन ॥ तस्यजन्मइत्यादिब्रूहिइत्युत्तरेणान्वय: ॥ १ ॥ सपरीक्षित्प्रेत्यदेहंत्यक्त्वा ॥ २ ॥ प्रार्थयेनत्वाज्ञापयामीत्याह ॥ गदितुंयदिमन्यसेअनुग्रहेणतर्हिब्रूहीति ॥ यस्यज्ञानम

दाक्षुक इति श्रवणेछायांकारणम ॥ ३ ॥

A3

भा०प्र०
५१

हे पौरर्षभ ॥ पुरूणां पुरुवंश्यानां ॥१५॥ शुक्ले शुद्धे अस्मिन् प्रजातंतौ ॥ दैवेन कथंभूतेन ॥ अप्रतिघातेन दुर्निवारेण ॥ सं-
स्थां नाशं उपेयुषि गते सति वोऽनुग्रहार्थाय यस्मात् प्रभवनशीलेन ॥ श्रीमहाविष्णुना रातो दत्तः ॥१६॥ तस्मान्नाम्ना लोके
विष्णुरात इति नाम्ना भविष्यति ॥ महाभागवतश्च ॥ गुणैर्महान् भविष्यति ॥ नात्र संदेह इति ॥ तं राजानं ब्राह्मणा ऊचुरि-

तमूचुर्ब्राह्मणास्तुष्टा राजानं प्रश्रयान्वितं ॥ एष ह्यस्मिन्प्रजातंतौ कुरूणां पौरवर्षभः ॥१५॥ दैवेना-
प्रतिघातेन शुक्ले संस्थामुपेयुषि ॥ रातो वोऽनुग्रहार्थाय विष्णुना प्रभविष्णुना ॥१६॥ तस्मान्ना-
म्ना विष्णुरात इति लोके बृहच्छ्रवाः ॥ भविष्यति न संदेहो महाभागवतो महान् ॥१७॥ युधिष्ठिर
उवाच ॥ अप्येष वंश्यान् राजर्षीन् पुण्यश्लोकान्महात्मनः ॥ अनुवर्तिता स्विद्यशसा साधुवादे-
न सत्तमाः ॥१८॥ ब्राह्मणा ऊचुः ॥ पार्थ प्रजाविता साक्षादिक्ष्वाकुरिव मानवः ॥ ब्रह्मण्यः सत्यसं-
धश्च रामो दाशरथिर्यथा ॥१९॥ एष दाता शरण्यश्च यथा ह्यौशीनरः शिबिः ॥ यशो वितनिता स्वा-
नां दौष्यंतिरिव यज्वनां ॥२०॥

ति त्रयाणामन्वयः ॥१७॥ महाभागवतो भविष्यतीत्युक्ते हृष्टः पृच्छति ॥ अपि स्वित्साधुवादेन यशसा सत्कीर्त्या
अनुवर्तिता भविष्यति पूर्वेष्वेवाः ॥ अतःपरमप्यनुषंगः ॥१८॥ प्रजानामविता रक्षकः ॥ मानवः मनोः पुत्रः ॥ ब्राह्म-
णेषु हितः ॥ सत्यप्रतिज्ञश्च ॥ श्रीरामो यथा ॥१९॥ उशीनरदेशाधिपतिः शिबिः ॥ येन श्येनाय स्वमांसं दत्वा शर-
णागतः कपोतो रक्षितः ॥ स्वानां ज्ञातीनां यज्वानां च यशो विस्तारको दौष्यंतिर्भरत इव ॥२०॥ ॥ ॥ ॥ ॥५१॥

तत्रं दाहेत्रीर्णयत्कांचनं तन्मये कुंडल्येयस्य ॥ तत्तजातं क्रोधाद्रक्तनेत्रं ॥ अहे भइत्तस्यापि गर्भे ज्वलात्वाद्दिपीडे तिसंरंभाद
त्यारक्तनेत्रमिति भावः ॥ ९ ॥ अस्त्रतेजो विधमंतं विनाशयंतं नीहारं हिमं गोपतिः सूर्य इव संनिकर्षे समीपे दद्दर्श दृष्ट्वा च अ
सौ करतिपर्यैत्तन वितर्कितवान् ॥ १० ॥ अमेयात्मा कथं तत्त्हिद्धतवानित्यतर्क्यरूपः धर्मं गोपायतीति धर्मगुप् दशमा
समासपरिछेद्यस्य तस्य मिषतः पश्यतः यत्र दृष्टः तत्रैवांतर्हितः ॥ नत्वन्यत्र गतः यतो विभुः सर्वगतः ॥ ११ ॥ उदर्कः उत्तरं फलं

श्रीमद्दीर्घस्ततुर्वोर्ध्वं तप्तकांचनकुंडलं ॥ तत्तजातं गदापाणिमात्मनः सर्वतो दिशं ॥ ९ ॥ परिभ्रमंतमुल्का
भं भ्रामयंतं गदां मुहुः ॥ अस्त्रतेजः स्वगदया नीहारमिव गोपतिः विधमंतं संनिकर्षे पर्यैत्तत कइत्यसौ ॥ १० ॥
विधूय तदमेयात्मा भगवान्धर्मगुब्विभुः ॥ मिषतो दशमासस्य तत्रैवांतर्दधे हरिः ॥ ११ ॥ ततः सर्वगुणोदर्के सा
नुकूलग्रहोदये ॥ जज्ञे वंशधरः पांडोर्भूयः पांडुरिवौजसा ॥ १२ ॥ तस्य प्रीतमना राजा विप्रैर्धौम्यकृपादिभिः
जातकं कारयामास वाचयित्वा च मंगलं ॥ १३ ॥ हिरण्यं गां महीं ग्रामान्हस्त्यश्वान्नृपतिर्वरान् ॥ प्रादात्स्वन्नं
च विप्रेभ्यः प्रजातीर्थे स तीर्थवित् ॥ १४ ॥

सर्वगुणानुत्तराधिकास्सत्व के त्वंगेन तत्र हेतुः ॥ अनुकूलैरन्यैर्ग्रहैः सहितानां शुभग्रहाणामुदयो यस्मिन् ॥ १२ ॥ जातके जातक
र्म मंगलं पुण्याहं ॥ १३ ॥ वरान् श्रेष्ठान् स्वन्नं शोभनमन्नं च तीर्थविद्दानकालज्ञः ॥ यावन्न छिद्यते नालं तावन्नाप्नोति सूतकं ॥ छि ॥ ९६ ॥
न्ने नाले ततः पश्चात्सूतकं तु विधीयते इति वचनात् ततः पूर्वं प्रादात् ॥ आमान्नं वा प्रजातीर्थे पुत्रोत्पत्तिपुण्यकाले ॥ पुत्रे जाते व्य
तिपाते दत्तं भवतीत्यादि यं ॥ इति स्मृतेः ॥ देवाश्च पितरश्चैव पुत्रे जाते द्विजन्मनां ॥ आयांति ह्निरपश्रेष्ठ पुण्याहमिति

परीक्षिदितिनामनिर्वक्तिसएषइति ॥ यद्यस्मात्प्रभुःसमर्थःसन् गर्भेदृष्टंपुरुषंअनुध्यायन् ॥ ईक्षमाणेषु
नरेषुमध्येसर्वमेवनरंपरीक्षेत ॥ अयमसौभवेदितिनोवाइतिविचारयेत्ततःपरीक्षिदितिख्यातः ॥ दृष्टंदृष्टमिति
वापाठः ॥ ३० ॥ शुक्लेशुक्लपक्षेप्रसिद्धउडुपोऽन्वहंयथाकाष्ठाभिःपंचदशकलाभिः ॥ आपूर्यमाणोवर्द्धते ॥ एवंपितृ
भिः ॥ युधिष्ठिरादिभिः ॥ कामैश्चातुःषष्टिकलाभिश्चापूर्यमाणोववृधे ॥ ३१ ॥ पूर्वमपकृष्योक्तान् अश्वमेधान्स्वा

सएषलोकेविख्यातःपरीक्षिदितियत्प्रभुः ॥ गर्भेदृष्टमनुध्यायन्परीक्षेतनरेष्विह ॥ ३० ॥ सराज
पुत्रोववृधेआशुशुक्लइवोडुपः ॥ आपूर्यमाणःपितृभिःकाष्ठाभिरिवसोन्वहं ॥ ३१ ॥ यक्ष्यमा
णोश्वमेधेनज्ञातिद्रोहजिहासया ॥ राजालब्धधनोदध्यौनान्यत्रकरदंडयोः ॥ ३२ ॥ तदभिप्रे
तमालक्ष्यभ्रातरोच्युतचोदिताः ॥ धनंप्रहीणमाजह्रुरुदीच्यांदिशिभूरिशः ॥ ३३ ॥ तेनसंभृतसंभा
रोलब्धकामोयुधिष्ठिरः ॥ वाजिमेधैस्त्रिभिर्भीतोयज्ञैःसमयजद्धरिं ॥ ३४ ॥ आहूतोभगवान्रा
ज्ञायाजयित्वाद्विजैर्नृपं ॥ उवासकतिचिन्मासान्सुहृदांप्रियकाम्यया ॥ ३५ ॥ ततोराज्ञाभ्यनुज्ञातः
कृष्णयासहबंधुभिः ॥ ययौद्वारवतींब्रह्मन्सार्जुनोयदुभिर्वृतः ॥ ३६ ॥

वसरेसप्रकारंकथयति ॥ ज्ञाति
द्रोहस्यहातुमिच्छयायक्ष्यमाणः ॥ करदंडयोरन्यत्रताभ्यांविनानलब्धधनोदध्यौचिंतयामासकरदंडस्यपरि
जनभरणमात्रोपक्षीणत्वात् ॥ ३२ ॥ प्रहीणंमरुत्तस्ययज्ञेत्यक्तंसुवर्णपात्रादिकमानीतवंतः ॥ ३३ ॥ संभृतसं
भारः ॥ संपादितयज्ञोपकरणः ॥ भीतोज्ञातिद्रोहात् ॥ ३४ ॥ ३५ ॥ ३६ ॥

अर्ज्जुनयोः पार्थकार्त्तवीर्य्ययोः ॥ २१ ॥ हिमवानिव सतां निषेव्यः ॥ अनन्यगतिकत्वेन वसुधेव तितिक्षुः ॥ क्षमिता प्रीत्या
मातापितराविव सहिष्णुः ॥ २२ ॥ पितामहो ब्रह्मा तेन समः ॥ साम्ये समत्वे रमाश्रयो हरिः ॥ २३ ॥ सर्वैः सद्गुणैर्य

धन्विनामग्रणीरेष तुल्यश्चार्ज्जुनयोर्द्वयोः ॥ हुताश इव दुर्द्धर्षः समुद्र इव दुस्तरः ॥ २१ ॥ मृगेंद्र इव
विक्रांतो निषेव्यो हिमवानिव ॥ तितिक्षुर्वसुधेवासौ सहिष्णुः पितराविव ॥ २२ ॥ पितामहसमः सा
म्ये प्रसादे गिरिशोपमः ॥ आश्रयः सर्वभूतानां यथा देवो रमाश्रयः ॥ २३ ॥ सर्वसद्गुणमाहात्म्ये एष
कृष्णमनुव्रतः ॥ रंतिदेव इवोदारो ययातिरिव धार्मिकः ॥ २४ ॥ धृत्या बलिसमः कृष्णे प्रह्लाद इव
सद्ग्रहः ॥ आहर्त्तैषोश्वमेधानां वृद्धानां पर्य्युपासकः ॥ २५ ॥ राजर्षीणां जनयिता शास्ता चोत्पथ
गामिनां ॥ निग्रहीता कलेरेष भुवो धर्मस्य कारणात ॥ २६ ॥ तक्षकादात्मनो मृत्युं द्विजपुत्रोपसर्ज्जिता
त् ॥ प्रपत्स्यत उपश्रुत्य मुक्तसंगः पदं हरेः ॥ २७ ॥ जिज्ञासितात्मयाथात्म्यो मुनेर्व्याससुतादसौ ॥ हित्वे
दं नृप गंगायां यास्यत्यद्धाकुतोभयं ॥ २८ ॥ इति राज्ञ उपादिश्य विप्रा जातककोविदाः ॥ लब्धोपचितयः
सर्वे प्रतिजग्मुः स्वकान्गृहान् ॥ २९ ॥

माहात्म्यं तस्मिन्नश्लोकस्तमतुल्यः ॥ २४ ॥ सतां सद्ग्रहः अभिनिवेशो आहर्त्ता कर्त्ता ॥ २५ ॥ राजर्षीणां जनमेजयादीनां ॥ २६ ॥
द्विजपुत्रेणप्रेरितात्तक्षकात् आत्मनो मृत्युं उपश्रुत्य हरेः पदं प्रपत्स्यते भजिष्यति ॥ २७ ॥ ततश्च जिज्ञासितमात्मनो याथात्म्यं

विरहेण यदौत्कंठ्यं तेन कातरा विवशाः ॥ ६ ॥ ८ पक्षिणोऽपत्यानि यथातिस्नेहेन पक्षछायया वर्द्धयंति तेनह
त् ॥ युष्मत्पक्षस्य पातच्छायया समेधितान् नः ॥ अस्मान् किं स्मरथ समेधितत्वमेवाह ॥ विपद्गणात्तस्मा
न्मोचिताः स्म ॥ ८ ॥ वः युष्माभिः ॥ कया वृत्त्या वर्त्तितं देहवृत्तिः कृता ॥ कानि च तीर्थादीनि सेवितानीति ॥ ९

मुमुचुः प्रेमबाष्पौघं विरहौत्कंठ्यकातराः ॥ राजा तमर्हयांचक्रे कृतासनपरिग्रहं ॥ ६ ॥ तं भु
क्तवंतमासीनं विश्रांतं सुखमासने ॥ प्रश्रयावनतो राजा प्राह तेषां च शृण्वतां ॥ ७ ॥ युधिष्ठि
र उवाच ॥ अपि स्मरथ नो युष्मत्पक्षछायासमेधितान् ॥ विपद्गणाद्विषाग्न्यादेर्मोचिताय
त्समातृकाः ॥ ८ ॥ कया वृत्त्या वर्त्तितं वश्चरद्भिः क्षितिमंडलं ॥ तीर्थानि क्षेत्रमुख्यानि सेवि
तानीह भूतले ॥ ९ ॥ भवद्विधा भागवतास्तीर्थभूताः स्वयं विभो ॥ तीर्थीकुर्वंति तीर्थानि स्वांतस्थे
न गदाभृता ॥ १० ॥ अपि नः सुहृदस्तात बांधवाः कृष्णदेवताः ॥ दृष्टाः श्रुता वा यदवः स्वपुर्यां
सुखमासते ॥ ११ ॥ इत्युक्तो धर्मराजेन सर्वं तत्समवर्णयत् ॥ यथानुभूतं क्रमशो विना यदुकुल
क्षयं ॥ १२ ॥ नन्वप्रियं दुर्विषहं नृणां स्वयमुपस्थितं ॥ नावेदयत्सकरुणो दुःखितान्द्रष्टुमक्षमः ॥ १३

भवतां च तीर्थाटनं न स्वार्थं किंतु तीर्थानुग्रहार्थमित्याह ॥ मलिनजनसंपर्केण तीर्थानि मलिनानि संति ॥ संतः
पुनः स्वयं तीर्थीकुर्वंति ॥ स्वांतं मनः तत्रस्थेन स्वस्यांतःस्थितेनेति वा ॥ १० ॥ अपि किं सुखमासते भवद्भिः कापि दृष्टाः

इति श्रीप्रथमे द्वादशः ॥ १२ ॥ निर्गमो धृतराष्ट्रस्य विदुरोक्त्यात्र योदितः ॥ उक्तः पौत्राभिषेकेण वंशो महो-
दयं ॥ १ ॥ इदानीं परीक्षितः कलिनिग्रहादिकर्माणि कथयिष्यन् विदुरागमने धृतराष्ट्रप्रस्थानं ॥ ततोऽर्जु-
नागमनं ततः पांडवप्रस्थानं च निरूपयति त्रिभिरध्यायैः ॥ गतिं हरिं तद्धाम गत्या स्त्रवा पूर्वं विविक्षितं तद्गोतुमि

इति श्रीमद्भागवते महापुराणे प्रथमस्कंधे नाम द्वादशोऽध्यायः ॥ १२ ॥ सूत उवाच ॥ विदु-
रस्तीर्थयात्रायां मैत्रेयादात्मनो गतिं ॥ ज्ञात्वागाद्धास्तिनपुरं तयावाप्तविविक्षितः ॥ १ ॥ यावत-
कृतवान् प्रश्नान् क्षत्ता कौषारवाग्रतः ॥ जातैकभक्तिर्गोविंदे तेभ्यश्चोपरराम ह ॥ २ ॥ तं बंधुमा-
गतं दृष्ट्वा धर्मपुत्रः सहानुजः ॥ धृतराष्ट्रो युयुत्सुश्च सूतः शारद्वतः पृथा ॥ ३ ॥ गांधारी द्रौपदी
ब्रह्मन् सुभद्रा चोत्तरा कृपी ॥ अन्याश्च जामयः पांडोर्ज्ञातयः ससुताः स्त्रियः ॥ ४ ॥ प्रत्युज्जग्मु-
ः प्रहर्षेण प्राणं तन्व इवागतं ॥ अभिसंगम्य विधिवत् परिष्वंगाभिवादनैः ॥ ५ ॥ ॥ ६६ ॥

ष्टं संवेद्येन ॥ तदेवाह ॥ यावतः कर्मयोगव्रतादिविषयान् प्रश्नान् प्रथमं कृतवान् ॥ कौषारवस्य मैत्रेयस्य पुरतः पश्चा-
त्त्रिचतुरः प्रश्नान् अथ ज्ञानमात्रेण गोविंदे जातैकभक्तिः कृतार्थः सन् ॥ तेभ्यः प्रश्नेभ्यः उपरराम ॥ परं न जिज्ञासितवा-
न् ॥ २ ॥ सूतः संजयः ॥ शारद्वतः कृपः ॥ ३ ॥ कृपी द्रोणभार्या ॥ जामयो ज्ञातिभार्याः ॥ च अन्याः स्त्रियः ॥ ४ ॥ प्राणं तन्व इति
कृतस्त्रिन्नमच्छादिदोषमतः ॥ प्राणे सन्ने सति तत्तन्वः करीघ्रादयो निश्चेष्टा भवन्ति ॥ पुनस्तस्मिन्नाविर्भूते यथोत्तिष्ठं

भा० प्र० कथं धनादिवियोगः सोढुं शक्यः अत आह ॥ येन चेति अभिपन्नः अभिग्रस्तः ॥ २० ॥ अत्रावस्थानुमतिं दैन्यमितिद
॥ ६० ॥ र्शयन् वैराग्यमुत्पादयति ॥ पितृभ्रातृभिः सप्तभिः ॥ आत्मा च देहः ॥ २१ ॥ येन च पुत्रा हतास्तेन भीमेन दत्तं पिंडं गृह्ण
न् श्ववद्गृहपालः श्वा ॥ २२ ॥ निसृष्टः प्रक्षिप्तः ॥ गरो विषं दूषिता अवमताः ॥ तद्दत्तैरन्नादिभिर्लब्धैः ॥ असुभिः कियत्प्रयो

येन चैवाभिपन्नोयं प्राणैः प्रियतमैरपि ॥ जनः सद्यो वियुज्येत किमुतान्यैर्धनादिभिः ॥ २० ॥ पितृभ्रा
तृसुहृत्पुत्रा हतास्ते विगतं वयः ॥ आत्मा च जरया ग्रस्तः परगेहमुपासते ॥ २१ ॥ अहो महीयसी जं
तोर्जीविताशा यया भवान् ॥ भीमेनावर्जितं पिंडमादत्ते गृहपालवत् ॥ २२ ॥ अग्निर्निसृष्टो दत्तश्च
गरो दाराश्च दूषिताः ॥ हृतं क्षेत्रं धनं येषां तद्दत्तैरसुभिः कियत् ॥ २३ ॥ तस्यापि तव देहोयं कृपण।
स्य जिजीविषोः ॥ परैत्यनिच्छतो जीर्णो जरया वाससी इव ॥ २४ ॥ गतस्वार्थमिमं देहं विरक्तो मुक्त
बंधनः ॥ अविज्ञातगतिर्जह्यात्स वै धीर उदाहृतः ॥ २५ ॥ यः स्वकात्परतो वेह जातनिर्वेद आत्मवा
न् ॥ हृदि कृत्वा हरिं गेहात्प्रव्रजेत्स नरोत्तमः ॥ २६ ॥

जनं न किंचिदित्यर्थः ॥ २३ ॥ तस्यापि एवं दैन्यम
नुभवतोपि परैति हीयते ॥ २४ ॥ गतस्वार्थं यशोधर्मादिशून्यं मुक्तबन्धनः त्यक्ताभिमानः ॥ क्व गतं इत्यवि
ज्ञाता गतिर्यस्य सः धीरः ॥ प्राप्तदुःखस्य स्वयं सहनेन मुक्तिप्राप्तेः ॥ २५ ॥ नरोत्तमस्तु ततः प्रागेव कृतप्रतीकारः स्वका
त् ॥ स्वस्वतः एव परतः परोपदेशतो वा ॥ २६ ॥ ॥ रामराम रामराम रामराम रामराम ॥ ॥ ॥ ६६ ॥ ॥ ६० ॥

श्रेयस्कृत् तत्त्वमुपदिशन्त ॥ १३ ॥ ननु शूद्रोऽसौ कथमुपदिशेत् । न ह्यसौ शूद्रः यमस्तद्रूपेणासीत् । किं तत्र कारणं यमे च
आगते । अमुत्र कोऽदंडधर इत्यपेक्षायामाह । अबिभ्रदिति धृतवानित्यर्थः । मांडव्यशापात् । क्वचिच्चौराननुधावंतो
राजभटा मांडव्यस्याश्रमेषेत्तपश्चात्तः समीपे तेन तान्संप्राप्य तेन सह निबध्यानीय राज्ञे निवेदयन्त राज्ञा सर्वान् शूलमा
रोपयामासुः । ततो राजा तमृषिं ज्ञात्वा शूलादवतार्य प्रसादयामास । ततो मुनिर्यमं गत्वा कुपित उवाच । कस्मादहं

कंचित्कालमथावात्सीत्सत्कृतो देववत्सुखं । भ्रातुर्ज्येष्ठस्य श्रेयस्कृत्सर्वेषां प्रीतिमावहन् ॥ १४ ॥
अबिभ्रदर्यमा दंडं यथावदघकारिषु । यावद्दधार शूद्रत्वं शापाद्वर्षशतं यमः ॥ १५ ॥ युधिष्ठि
रो लब्धराज्यो दृष्ट्वा पौत्रं कुलंधरं । भ्रातृभिर्लोकपालाभैर्मुमुदे परया श्रिया ॥ १६ ॥ एवं गृहेषु
सक्तानां प्रमत्तानां तदीहया । अत्यक्रामदविज्ञातः कालः परमदुस्तरः ॥ १७ ॥ विदुरस्तदभिप्रेत्य
धृतराष्ट्रमभाषत । राजन्निर्गम्यतां शीघ्रं पश्येदं भयमागतं ॥ १८ ॥ प्रतिक्रिया न यस्येह कुतश्चि
त्कर्हिचित्प्रभो । स एष भगवान्कालः सर्वेषां नः समागतः ॥ १९ ॥

शूलमारोपित इति तेनोक्तं । त्वं बाल्ये शल
भं कुशाग्रेण विध्य क्रीडितवानिति । तच्छ्रुत्वा मांडव्यस्तं शशाप । बाल्येऽज्ञानतो मे महांतं दंडं यतस्त्वं कारितवान् । अतः शूद्रो
भवेति ॥ १५ ॥ इदानीं राज्यापकर्षं निरूपयति । युधिष्ठिर इति । कुलंधरं वंशधरं ॥ १६ ॥ तदीहया गृहव्यापारेण प्रमत्तानां अत्य
क्रामत् । आयुः कालोऽतिक्रांतः । यद्वा तानभ्यभवदित्यर्थः ॥ १७ ॥ अभिप्रेत्य ज्ञात्वा ॥ १८ ॥ ननु ततः प्रतीकारः क्रियतां किं

निरूपयितुं उत्कर्षं २

निर्गमेन तत्राह । प्रतिक्रियेति सर्वेषामिति । यैः प्रतिकर्त्त
व्यं तेषामपीत्यर्थः ॥ २९ ॥

अकृतप्रज्ञे मंदमतौ मयि शमलं अपराधं आशंसमानः भार्य्यया सह ॥ ३३ ॥ यौ अरक्षतां तौ इतः स्थानात् क्व गतौ ॥ ३४ ॥ कृपया स्नेह
वैक्लव्याच्चातिपीडितः आत्मेश्वरं ॥ धृतराष्ट्रं अचक्षाणः अपश्यन् ॥ विरहकर्षितश्च सूतः संजयः न प्रत्युत्तरमाह ॥ ३५ ॥ आत्मना
बुद्ध्या आत्मानं मनो विष्टभ्य धैर्य्ययुक्तं कृत्वा ॥ प्रभोर्धृतराष्ट्रस्य गांधार्य्याश्च ॥ ३६ ॥ व्यवसितं निश्चयं ॥ यतो मुषितः वंचितोस्मि

अंबा च हतपुत्रार्त्ता पितृव्यः क्व गतः सुहृत् ॥ अपि मय्यकृतप्रज्ञे हतबंधुः स भार्य्यया ॥ आशंसमानः शमलं गंगा
यां दुःखितोऽपतत् ॥ ३३ ॥ पितर्य्युपरते पांडौ सर्वान्नः सुहृदः शिशून् ॥ अरक्षतां व्यसनतः पितृव्यौ क्व गतौ
इतः ॥ ३४ ॥ सूत उवाच ॥ कृपया स्नेहवैक्लव्यात्सूतो विरहकर्षितः ॥ आत्मेश्वरमचक्षाणो न प्रत्याहा
तिपीडितः ॥ ३५ ॥ विमृज्याश्रूणि पाणिभ्यां विष्टभ्यात्मानमात्मना ॥ अजातशत्रुं प्रत्यूचे प्रभोः पादा
वनुस्मरन् ॥ ३६ ॥ संजय उवाच ॥ नाहं वेद व्यवसितं पित्रोर्वः कुलवर्द्धन ॥ गांधार्य्या वा महाबाहो मु
षितोस्मि महात्मभिः ॥ ३७ ॥ अथाजगाम भगवान्नारदः सहतुंबरुः ॥ प्रत्युत्थायाभिवाद्याह सानुजोऽ
भ्यर्चयन्मुनिं ॥ ३८ ॥ युधिष्ठिर उवाच ॥ नाहं वेद गतिं पित्रोर्भगवन्क्व गतावितः ॥ अंबा वा हतपुत्रा
र्त्ता क्व गता च तपस्विनी ॥ ३९ ॥

३६ ॥ एवं किंचित्कालं शोचति तस्मिन् ॥ अथ नारदश्चाजगाम ॥ अत्रास्ति कश्चित्पुस्तके पाठान्तरम् ॥ तदुक्तं
ध्य यत्संप्रदायं व्याख्यायते ॥ शोकवेगाद् भ्यर्चयन्निवाह ॥ राजन्न त्वभ्यर्चयेत् न कुतः शोकाक्रांतः क्रोधाविष्टः श्रद्धया
रहितश्च पुमान् ॥ गुरुदेवद्विजातीनां पूजनं न समाचरेदिति स्मृतेः ॥ ३७ ॥ नाहं वेद वेद्मि ॥ ३८ ॥ रामरामरामरामराम ६१

त्वंतु नरोत्तमो नाभूः अतस्तदानीं धीरो भवेत्याह ॥ अथेति ॥ अर्वाक् अर्वाचीनः एष्यन्नित्यर्थः ॥ गुणान्धैर्यदयादीन्
विकर्षतीति अछिन्नत्वं नीतीति तथा ॥२७॥ आजमीढः ॥ आजमीढवंशजः ॥ प्रज्ञाचक्षुः ॥ अंधः ॥ एवं बोधितः सन् द्रढिम्नः चि
तस्य द्रढीत ॥ भ्रात्रा संदर्शित ॥ अध्वा वनमोक्षयोर्मार्गो यस्य सः ॥२८॥ सुवलस्य पुत्री गांधारी साध्वी सुशीला हिमालयं प्र

अथोदीचीं दिशं यातु स्वैरज्ञातगतिर्भवान् ॥ इतोऽर्वाक्प्रायशः कालः पुंसां गुणविकर्षणः ॥२७॥ ए
वंराजा विदुरेणानुजेन प्रज्ञाचक्षुर्बोधित आजमीढः ॥ छित्वा स्वेषु स्नेहपाशान्द्रढिम्नो निश्चक्रा
मभ्रात्त संदर्शिताध्वा ॥२८॥ पतिं प्रयांतं सुवलस्य पुत्री पतिव्रता चानुजगाम साध्वी ॥ हिमालयं
न्यस्तदंडप्रहर्षं मनस्विनामिव सत्संप्रहारम् ॥२९॥ अजातशत्रुः कृतमैत्रो हुताग्निर्विप्रान्नत्वा ति
लगोभूमिरुक्मैः ॥ गृहं प्रविष्टो गुरुवन्दनाय न चापश्यत्पितरौ सौवलीं च ॥३०॥ तत्र संजयमासी
नं पप्रच्छोद्विग्नमानसः ॥ गावल्गणे क्व नस्तातो वृद्धो हीनश्च नेत्रयोः ॥३१॥ ॥

यांतं ॥ पतिमनुजगाम ॥ ननु कथं सा सुकुमारी हिमाद्रिं दुःखवत्कुलं हिमवंतं गता अत आह ॥ न्यस्तदंडानां
प्रहर्षो यस्मिन् ॥ तं दुःखदमपि केषांचित्प्रहर्षहेतुर्भवतीत्यत्र दृष्टांतः ॥ मनस्विनां शूराणां युद्धे सत्तीव्रः प्रहा
रो यथा ॥ पाठांतरे सत्संप्रहारं युद्धं यथेति ॥२९॥ कृतं मैत्रं मित्रदेवत्यं संध्यावंदनं येन ॥ नत्वा संपूज्य पितरौ विदुर
धृतराष्ट्रौ ॥३०॥ हे गावल्गणे ॥ गवल्गणस्य पुत्र संजय ॥३१॥

तत्र त्विह हतस्तेषां वृत्तिरित्यत आह ।। कालो गुणक्षोभकः । कर्म जन्मनिमित्तं ।। गुणा उपादानं ।। तदधीनं पांच
भौतिकः ।। जडः तद्विभागेन नाशवांश्च ।। सर्पग्रस्तोऽजगरगिलितः ।। यथा अन्यान्नरक्षति तद्वत् ।। ४५ ।। ईश्वरेण विहिता वृत्तिश्च
सर्वतः सुलभैवेत्याह ।। अहस्तानि पश्वादीनि ।। अपदानि तृणादीनि ।। तत्र तेषु अहस्तादिष्वपि फल्गूनि अल्पानि
वै जीवः सर्वोऽपि सर्वस्य जीवनं ।। जीविका ।। ४६ ।। एतेनैव सर्वतो मृत्युग्रासत्वं चोक्तं ।। मोहनिवृत्यर्थं हतस्यापि वस्तुत्वं
आह ।। तदिदं ।। अहस्तसहस्तादिरूपं जगत्सर्वं भगवानेव न ततः पृथक् ।। स च एक एव न तु नाना ।। न तु सजातीयविजा

कालकर्मगुणाधीनो देहोऽयं पांचभौतिकः ।। कथमन्यांस्तु गोपायेत्सर्पग्रस्तो यथा परं ।। ४५ ।। अहस्ता
नि सहस्तानामपदानि चतुष्पदां ।। फल्गूनि तत्र महतां जीवो जीवस्य जीवनं ।। ४६ ।। तदिदं भगवान्
राजन्नेक आत्मात्मनां स्वदृक् ।। अंतरोऽनंतरो भाति पश्य तं माययोरुधा ।। ४७ ।। सोऽयमद्य महाराज भग
वान्भूतभावनः ।। कालरूपोऽवतीर्णोऽस्यामभवाय सुरद्विषां ।। ४८ ।। निष्पादितं देवकृत्यमवशेषं प्रतीक्षते
तावद्यूयमवेक्षध्वं भवेद्यावदिहेश्वरः ।। ४९ ।।

तीयभेदशून्यः कुत एतत्तत्राह ।। आत्मनां ।। भोक्तॄणां स्वरूपं ।। अतो न सजातीयभेदः ।। अंतरोऽनंतरश्च । अन्तर्बहिश्च भोक्तृभो
ग्यरूपश्च भाति ।। अतो न विजातीयभेदोऽपि ।। ननु एकः कथं तथा प्रतीयते अत आह ।। मायया उरुधा तं पश्येति ।। ४७ ।। का
सांप्रतमीदृशो महामायाविहारकायामित्याह ।। सोऽयमिति ।। अस्यां भूमौ ।। अभवाय नाशाय ।। ४८ ।। तर्हि श्रीकृष्णोऽद्यास्ति
त्यत्रैवास्थां माकुर्याद् इत्याह ।। तच्च देवानां कार्यं ।। तेन निष्पादितं ।। केवलमवशेषं प्रतीक्षते ।। यदुकुलस्य क्षयमिति
हृदिस्थं ततो निजं धाम यास्यति ।। ततो यूयमपि गंतासेत्यर्थः ।। तच्च भूतमपि विदुर एव देवनानावर्णयत ।। ४९ ।।

अपारे शोकार्णवे भगवान्त्वमेव पारदर्शकः॥ अतो ब्रूहीति शेषः॥ ३९॥ आदावेव यथावृत्तकथनेन शोकेन मूर्छितं तं॥ यते
दिति॥ प्रथमं तावच्छोकमुपशमयति॥ कंचनेति मा स्म शुचः॥ मा शोच॥ न केवलं तानेव॥ यद्यस्मादीश्वराधीनं जगत्॥ तदेवाह लो
का इति॥ ४०॥ गावो बलीवर्द्दाः॥ तंत्यां दीर्घतंत्यां बद्धा दामभिर्नसि नासिकायां प्रोताः स्वामिनो बलिं वहंति॥ एवं वाक्तंत्या के
व्याकर्त्तव्यविधायकवेदलक्षणायां नामभिर्ब्राह्मणो ब्रह्मचारीत्यादिवर्णलक्षणैर्बद्धाः॥ परमेश्वरस्य बलिं तेन प्रेरिता वहं

कर्णधार इवापारे भगवान्पारदर्शकः॥ अथाबभाषे भगवान्नारदो मुनिसत्तमः॥ ३९॥ नारद उवाच
मा कंचन शुचो राजन्यदीश्वरवशं जगत्॥ लोकाः सपाला यस्येमे वहंति बलिमीशितुः॥ ४०॥ स संयुनक्ति
भूतानि स एव वियुनक्ति च॥ यथा गावो नसि प्रोतास्तंत्यां बद्धाश्च दामभिः॥ वाक्तंत्यां नामभिर्बद्धा वहंति बलि
मीशितुः॥ ४१॥ यथा क्रीडोपस्कराणां संयोगविगमाविह॥ इच्छया क्रीडितुः स्यातां तथैवेशेच्छया नृणां
॥ ४२॥ यन्मन्यसे ध्रुवं लोकमध्रुवं वा न चोभयं॥ सर्वथा हि न शोच्यास्ते स्नेहादन्यत्र मोहजात्॥ ४३॥ तस्मा
ज्जह्यंग वैक्लव्यमज्ञानकृतमात्मनः॥ कथं त्वनाथकृपणा वर्त्तेरन्मामनाश्रिताः॥ ४४॥ ॥ ॥

तीत्यर्थः॥ ४१॥ प्रकृतौ पारतंत्र्यमुक्त्वा संयोगवियोगयोरप्याह॥ यथेति॥ क्रीडोपस्कराणां॥ क्रीडासाधनानां॥ ४२॥ ईश्व
राधीनत्वान्न शोकः कार्य इत्युक्तं॥ लोकतत्त्वे विचार्यमाणे निर्विषयोऽपि शोक इत्याह॥ यद्यदिति लोकं जनं ध्रुवं जीवरूपेण नश्व
ति॥ न ध्रुवं नाप्यध्रुवं॥ शुद्धब्रह्मरूपेण॥ अनिर्वचनीयत्वेन वा उभयं वा चिज्जडांशतः॥ सर्वथा च तु त्वेपिपद्येषु ते पित्राद
यो न शोच्याः॥ स्नेहादन्यत्र स्नेह एव केवलं॥ शोके हेतुः॥ स चाज्ञानमूल इत्यर्थः॥ ४३॥ तस्मान्मां विना कथं ते वर्त्तेरन्निति मन

भा० प्र०
६२

व्युत्थानाभावमाह॥ ध्वस्तेति॥ अंतर्गुणक्षोभाद्वा॥ वहिरिंद्रियविक्षेपाद्वा व्युत्थानं भवेत्तदुभयं तस्य नास्
ति यतो ध्वस्तमायागुणानामुदर्कः उत्तरफलं वासनाय यस्य॥ निरुद्धानि करणानि चक्षुरादीनि॥ आश
यो मनश्च यस्य॥ अत एव निवर्तित अखिल आहारो भोग इंद्रियैर्विषयाहरणं वा येन सः स्थाणुरिव
निश्चलः आस्ते॥ ५५॥ तथाभूतमप्यानेतुमुद्यतं प्रत्याह॥ तस्येति॥ अंतरायो विघ्नः मैवाभूरित्यडागमः छांदसः

ध्वस्तमायागुणोदर्को निरुद्धकरणाशयः॥ निवर्तिताखिलाहार आस्ते स्थाणुरिवाधुना॥ ५५॥ त
स्यांतरायो मैवाभूः संन्यस्ताखिलकर्मणः॥ स वा अद्यतनाद्राजन् परतः पंचमेहनि॥ ५६॥ क
लेवरं हास्यति स्वं तच्च भस्मीभविष्यति॥ ५७॥ दह्यमानेग्निभिर्देहे पत्युः पत्नी सहोटजे॥ वहिः
स्थिता पतिं साध्वी तमग्निमनुवेक्ष्यति॥ ५८॥ विदुरस्तत्तदाश्चर्यं निशाम्य कुरुनंदन॥ हर्षशोक
युतस्तस्माद्गंता तीर्थनिषेवकः॥ ५९॥ इत्युक्त्वाथारुहत्स्वर्गं नारदः सहतुंबरुः॥ युधिष्ठिरो वचस्त
स्य हृदि कृत्वाजहाच्छुचः॥ ६०॥

युधिष्ठिरं १ दर्शनमपि तावत्करिष्यामीत्युद्यतं प्रत्याह॥ स वा अद्यतनादह्नः ५६
स्वस्थाधीनं तर्हि तं गृहं गृहार्थं गमिष्यामीत्याह तच्चेति॥ तर्हि गांधार्यानयनाय गमिष्यामीत्याह॥ पत्युर्देहे सहोट
जे पर्णशालासहिते योगाग्निना सह गार्हपत्यादिभिः॥ ५७॥ दह्यमाने तस्य पत्नी वहिः स्थिता सती तं पतिमनु अ
ग्निं वेक्ष्यति॥ ५८॥ तर्हि विदुरानयनार्थं गंतव्यमेवेत्याह॥ विदुरस्तु तन्निशाम्य दृष्ट्वा भ्रातुः सुगत्या हर्षः तन्मृत्युना
शोकश्च ताभ्यां युक्तस्तस्मात्स्थानात्तीर्थानि सेवितुं गंता गमिष्यति॥ ५९॥ शुचः शोकान्॥ ६०॥ राम राम॥ ६२

तदेवं श्लोकमवस्थांच निवार्य्य जितासवेतस्मै यथावृत्तं कथयति॥ धृतराष्ट्र इति षड्भिः॥ हिमवतो दक्षिणभा
गे॥५०॥ पार्वे प्रसिद्धा स्वर्धुनी गंगा सा आत्मानं सप्तधा व्यधात॥ किमर्थं नाना पृथक्सप्तभिः स्रोतोभिः प्रवाहैः
सप्तानां महर्षीणां प्रीतये॥ अतएव तत्तीर्थं सप्तस्रोतं वदंति॥५१॥ अष्टांगयोगमाह॥ स्नात्वेति चतुर्भिः॥ त्रै
स्नानं होमोऽब्भक्षणं च नियमानुक्ता भक्षस्याने ऽपां स्वीकारो ऽब्भक्षः उपशांत आत्मा यस्य॥ विगताषु

धृतराष्ट्रः सह भ्रात्रा गांधार्या च स्वभार्यया॥ दक्षिणेन हिमवतः ऋषीणामाश्रमं गतः॥५०॥ स्रो
तोभिः सप्तभिर्या वै स्वर्धुनी सप्तधा व्यधात्॥ सप्तानां प्रीतये नाना सप्तस्रोतः प्रचक्षते॥५१॥ स्नात्वानु
सवनं तस्मिन् हुत्वा चाग्नीन्यथाविधि॥ अब्भक्ष उपशांतात्मा स आस्ते विगतैषणः॥५२॥ जितासनो जि
तश्वासः प्रत्याहृतषडिंद्रियः॥ हरिभावनया ध्वस्तरजःसत्वतमोमलः॥५३॥ विज्ञानात्मनि संयोज्य
क्षेत्रज्ञे प्रविलाप्य तं॥ ब्रह्मण्यात्मानमाधारे घटांबरमिवांबरे॥५४॥

त्रौद्येषणा यस्मादिति यमानुक्त्वा
५२॥ जितासन इत्यादिना आसनप्राणायामप्रत्याहारा उक्ताः हरिभावनयेति धारणोक्ता॥ ध्वस्तारजःसत्वतमोरूपाम
लायस्येति फलतो ध्यानमुक्तं॥५३॥ समाधिमाह॥ विज्ञानेति द्वाभ्यां॥ आत्मानमहंकारास्पदं स्थूलदेहाद्वियोज्य वि
ज्ञानात्मनि बुद्धौ संयोज्य एकीकृत्य॥ तं विज्ञानात्मानं द्रष्टांशाद्वियोज्य क्षेत्रज्ञे द्रष्टरि प्रविलाप्य तं च क्षेत्रज्ञं दृ
श्याद्वियोज्य॥ आधारे आश्रयसंज्ञे ब्रह्मणि प्रविलाप्य यथा घटांबरं घटोपाधेर्वियोज्य यथा महाकाशे प्रविलाप्यते

भा० प्र०
६४

वेत्ति वित्तं किं कस्माद्धेतोर्नायातीत्यहं न वेद्मि ॥७॥ अपि किं यदात्मनः आक्रीडं क्रीडासाधनं अंगं मनुष्य
भावं त्यक्तुमिच्छति स कालः किं प्राप्तः ॥८॥ अस्माकं सर्वपुरुषार्थत्वे हेतुः श्रीकृष्णः अन त्तद्धिये
गं विना निष्फलं स्यादित्याशयेनाह ॥ यस्माच्छ्रीकृष्णाद्धेतोः ॥ एतच्चोपरिष्टादर्जुनः स्पष्टीकरिष्यति ॥
लोकाश्चयस्तत्करणरूपायस्यानुग्रहात् ॥९॥ अदूरात्संनिहितनोऽस्माकमाशंसत ॥१०॥ उत्पातान्दे

नु१ गतास्स्वाधुना मामा भीमसेन तवानुजः ॥ नायाति कस्य वा हेतोर्नाहं वेदेदमंजसा ॥७॥ अपि
तः देवर्षिणादिष्टः स कालोयमुपस्थितः ॥ यदात्मनोऽंगमाक्रीडं भगवानुत्सिसृक्षति ॥८॥ यस्मान्नः
संपदो राज्यं दाराः प्राणाः कुलं प्रजाः ॥ आसन्सपत्नविजयो लोकाश्च यदनुग्रहात् ॥९॥ पश्योत्पा
तान्नरव्याघ्र दिव्यान्भौमान्सदैहिकान् ॥ दारुणान्शंसतोऽदूराद्भयं नो बुद्धिमोहनं ॥१०॥ ऊर्वक्षिबा
हवो मह्यं स्फुरंत्यंग पुनः पुनः ॥ वेपथुश्चापि हृदय आराद्दास्यंति विप्रियं ॥११॥ शिवैषोद्यंतमादित्य
मभिरौत्यनलानना ॥ मामंग सारमेयोयमभिरौदित्यभीरुवत् ॥१२॥ ॥ ऽऽ ॥ ॥ ॥ ऽऽ ॥ ॥

हिक्कानाह सार्द्धैश्चतुर्भिः ॥ ऊर्वादयो वामाः स्फुरंति ॥ वेपथुः कंपश्च हृदये वर्त्तते ॥ एते मह्यं आरात्संनिहितं विप्रि
यं दास्यंति ॥११॥ भौमानाह सार्द्धद्वाभ्यां ॥ शिवा क्रोष्ट्री आदित्यमभिरौति ॥ उद्यन्तं सूर्यमभिमुखं क्रोशति ॥ अनलानना
अग्निं मुखेन वमंती ॥ अंग हे भीम ॥ मामभितस्त्वयं सारमेयः श्वा रौति ॥ स्फुटं भाषति ॥ अभीरुवत् निःशंकम् ॥१२॥ ६४

इति प्रथमे त्रयोदशः ॥१३॥ चतुर्दशे त्वरिष्टानि दृष्ट्वा राजा विशंकितः ॥ अर्जुनागदर्जुनात्कृष्णतिरोधानमितीर्य-
ते ॥ श्रीकृष्णस्य चेति ॥ चकारेणाभिप्रायं ज्ञातुं ॥१॥ कतिचित्मासा तदा कालातिक्रमेऽपि ततः ॥ द्वारकाम-
यानत्र आयात् ॥ नागतः ॥ निमित्तानि ॥ उत्पातान् ॥ कुरूद्वहो युधिष्ठिरः ॥२॥ रौद्रं घोरं तदेवाह ॥ विपर्य्यस्ता ऋतु-

इति श्रीमद्भागवते महापुराणे प्रथमस्कंधे धृतराष्ट्रनिर्याणो नाम त्रयोदशोऽध्यायः ॥१३॥ सूत
उवाच ॥ संप्रस्थिते द्वारकायां जिष्णौ बंधुदिदृक्षया ॥ ज्ञातुं च पुण्यश्लोकस्य कृष्णस्य च विचेष्टि-
तं ॥१॥ व्यतीताः कतिचिन्मासास्तदा नायात्ततोऽर्जुनः ॥ ददर्श घोररूपाणि निमित्तानि कुरूद्वहः
॥२॥ कालस्य च गतिं रौद्रां विपर्यस्तर्तुधर्मिणः ॥ पापीयसीं नृणां वार्त्तां क्रोधलोभानृतात्मनां ॥३॥
जिह्मप्रायं व्यवहृतं शाठ्यमिश्रं च सौहृदं ॥ पितृमातृसुहृद्भ्रातृदंपतीनां च कल्कनं ॥४॥ कन्यावि-
क्रयिणं तातं सुतं पित्रोरपोषकं ॥ ब्राह्मणान्वेदविमुखान्शूद्रान्वै ब्रह्मवादिनः ॥ निमित्तान्यत्यरि-
ष्टानि काले त्वनुगते नृणां ॥ लोभाद्यधर्मप्रकृतिं दृष्ट्वोवाचानुजं नृपः ॥५॥ युधिष्ठिर उवाच ॥ संप्रस्थि-
तो द्वारकायां जिष्णुर्बंधुदिदृक्षया ॥ ज्ञातुं च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितम् ॥६॥

धर्मा यस्मिन् तस्य वार्त्तां जीविकां क्रोधलोभानृतैर्युक्त आत्मा येषां ॥३॥ जिह्मप्रायं कपटबहुलं व्यवहृतं व्यवहारं शा-
ठ्यं वंचनं तन्मिश्रं सौहृदं सख्यं पित्रादीनां स्वप्रतियोगिभिः कल्कनं कलहादि ॥४॥ अत्यरिष्टानि ॥ अत्यंतमशुभानि दृ-
ष्ट्वा नृणां लोभाद्यधर्मप्रकृतिं च दृष्ट्वानुजं भीमं ॥५॥६॥

अघं दुःखं ॥१९॥ एतैः कृत्वा ॥ न विद्यते अन्येषु पुरुषेषु श्रीर्येन तं ऋक्षणादि शोभा येषां तैर्भगवतः पदैः हीना भूरि
त्यहं मन्ये ॥२०॥ तस्य राज्ञः इत्येवं दृष्टानि येन तेन चेतसा चिंतयतः ॥२३॥ अयथापूर्वं निपतितं तद्देवाह आतु
र इत्यादि अपाविद्धून् अस्रूणि नेत्राभ्यां सृजंतमित्यर्थः ॥२४॥ उद्विग्नं कंपितं हृदयं यस्य ॥ विच्छायं विगतकांति

इमे जनपदा ग्रामाः पुरोद्यानाकराश्रमाः ॥ भ्रष्टश्रियो निरानंदाः किमघं दर्शयंति नः ॥२१॥ मन्य एतैर्महोत्पातैर्नूनं भगवतः पदैः ॥ अनन्यपुरुषश्रीभिर्हीना भूर्हतसौभगा ॥२२॥ इति चिंतयतस्तस्य दृष्टारिष्टेन चेतसा ॥ राज्ञः प्रत्यागमद्ब्रह्मन् यदुपुर्याः कपिध्वजः ॥२३॥ तं पादयोर्निपतितमयथापूर्वमातुरं ॥ अधोवदनमब्बिंदून् मुंचंतं नयनाब्जयोः ॥२४॥ विलोक्योद्विग्नहृदयो विच्छायमनुजं नृपः ॥ पृच्छति स्म सुहृन्मध्ये संस्मरन्नारदेरितं ॥२५॥ युधिष्ठिर उवाच ॥ कच्चिदानर्तपुर्यां नः स्वजनाः सुखमासते ॥ मधुभोजदशार्हार्हसात्वतांधकवृष्णयः ॥२६॥ शूरो मातामहः कच्चित्स्वस्त्यास्ते वाथ मारिष ॥ मातुलः सानुजः कच्चित्कुशल्यानकदुंदुभिः ॥२७॥ सप्त स्वसारस्तत्पत्न्यो मातुलान्यः सहात्मजाः ॥ आसते सस्नुषाः क्षेमं देवकीप्रमुखाः स्वयं ॥२८॥

२५॥ स्वजनाः बान्धवाः ॥२६॥ किं वक्ष्यतीति शंकया व्यवहितक्रमेण पृच्छति शूर इत्यादिना ॥ मारिष मा
न्यो मातामहः ॥ आनकदुंदुभिः वसुदेवः ॥२७॥ स्वसारः परस्परं वसुदेवक्षेमेण तासामपि क्षेमं पृष्टमेव पृ
थगपि पृच्छति स्वयमिति ॥२८॥

शस्ता गवादयो मांसवर्ज्यं वामं कुर्वंति ॥ अपरे गर्दभाद्याः प्रदक्षिणं कुर्वंति वाहान् अश्वान् ॥ १३ ॥ अयं कपोतो मृत्युसूच
कः ॥ उलूको घूकः ॥ प्रत्युलूकः तत्प्रतिपक्षो भक्षकः काको वा ॥ कुट्टानैः कुत्सितशब्दैः विग्रहं अन्यमिच्छतः ॥ १४ ॥ धू
मा धूसरा दिशः परिधयः ईवाग्निर्लोकमारणं वंति ॥ दिव्यान्याह ॥ सार्द्धद्वाभ्यां ॥ निर्घातो निरभ्रवज्रपातः ॥ स्तनइ

शस्तां कुर्वंति मांसवर्ज्यं दक्षिणां पशवोऽपरे ॥ वाहांश्च पुरुषव्याघ्र लक्षये रुदतो मम ॥ १३ ॥ मृत्युदूतः
कपोतोऽयमुलूकः कंपयन्मनः ॥ प्रत्युलूकश्च कुट्टानैर् निद्रोऽन्यमिच्छतः ॥ १४ ॥ धूम्रा दिशः परि
धयः कंपते भूः सहाद्रिभिः ॥ निर्घातश्च महानासीत् सार्कं च स्तनयित्नुभिः ॥ १५ ॥ वायुर्वाति खरस्प
र्शो रजसा विसृजंस्तमः ॥ १६ ॥ अस्त्रवर्षति जलदा बीभत्समिव सर्वतः ॥ सूर्यं हतप्रभं पश्य ग्र
हमर्द्दं मिथो दिवि ॥ १७ ॥ ससंकुलैर्भूतगणैर्ज्वलिते द्यावरोदसी ॥ नद्यो नदाश्च क्षुभिताः स
शंसंति मनोऽस्मि च ॥ १८ ॥ न ज्वलत्यग्निराज्येन कालोऽयं किं विधास्यति ॥ न पिबंति स्तनं वत्सा न
दुह्यंति च मातरः ॥ १९ ॥ रुदंत्यश्रुमुखा गावो न हृष्यन्त्यृषभा व्रजे ॥ दैवतानि रुदंती व स्विद्यंति ह्युच्चलंति
च ॥ २० ॥

त्नवो गर्जितानिलैः सह ॥ १५ ॥ तमो विशेषेण सृजन् ॥ १६ ॥ अस्त्रकरक्तं ग्रहाणां महद्युद्धं ॥ १७ ॥ भूतानि
रुद्रानुचराः तेषां गणैः संकुलैर्व्यामिश्रैः प्राणिभिः सहिते रोदसी द्यावापृथिव्यौ ज्वलिते दीप्ते इव च पश्येति पुन
र्भीमानाह ॥ नद्य इति सार्द्धैस्त्रिभिः ॥ प्राणिनां मनांसि च ॥ १८ ॥ न दुह्यंतीति ॥ कर्मकर्त्तर्यार्षः ॥ न प्रस्रवंतीत्यर्थः ॥

॥ ४८ ॥

भा० प्र० ६६

न्नर्चिताः सर्वे पूजिताः॥ परमानंदं यथा भवति महापौरुषिकाः॥ वैकुंठनाथानुचराः॥३७॥ यस्य पादशुश्रू
षणमेव मुख्यं तपआदिभ्यः श्रेष्ठं यत्कर्म तेन सत्यभामादयः॥ संख्ये युद्धे श्रीकृष्णवलेन निर्जित्य तदाशि
षः देवभोग्यान्॥ पारिजातादीन्॥ वज्रायुधवल्लभा शचीतस्योचिताः॥३८॥ यद्बाहुदंडप्रभावोपजीवि

यद्बाहुदंडैर्गुप्तायां स्वपुर्यां यदवोऽर्चिताः॥ क्रीडंति परमानंदं महापौरुषिका इव॥३७॥ यत्पा
दशुश्रूषणमुख्यकर्मणा सत्यादयो द्व्यष्टसहस्रयोषितः॥ निर्जित्य संख्ये त्रिदशांस्तदाशिषो
हरंति वज्रायुधवल्लभोचिताः॥३८॥ यद्बाहुदंडप्रभवोपजीविनो यदुप्रवीरा ह्यकुतोभया मु
हुः॥ अधिक्रमंत्यंघ्रिभिराहृतां वलात्सभां सुधर्मां सुरसत्तमोचितां ३९ कच्चित्तेनामयं तात भ्र
ष्टतेजा विभासि मे॥ अलब्धमानोऽवज्ञातः किं वा तात चिरोषितः ४० कच्चिन्नाभिहतोऽभावैः श
ब्दादिभिरमंगलैः॥ न दत्तमुक्तमर्थिभ्य आशया यत्प्रतिश्रुतं ४१ नः सुधर्मामंघ्रिभिरधिक्रमंति सा

गोविन्दः सुखमास्त इति निगतपंचमश्लोकेनान्वयः॥३९॥ इदानीं तस्यैव कुशलं पृच्छति॥ कच्चिदिति षड्भिः॥ अन
मयं आरोग्यं॥ न लब्धो मानो येन बंधुभ्यः सकाशात्॥ किं वा तैः प्रत्युत अवज्ञातः तिरस्कृतः यतः चिरोषितः व
हुकालं तत्र स्थितः॥४०॥ अभावैरिति छेदः॥ प्रेमशून्यैः अमंगलैः॥ परुषैः शब्दादिभिः॥ नाभिहतः न ताडितोसि
किं॥ यद्वा॥ अर्थिभ्यः किमपि दास्यामीति चोक्तं किं॥ यद्वा॥ आशया सह यथा आशा भवति॥ तथा दास्यामीति प्रति

॥श्री॥
६६

आहुकः उग्रसेनः॥ असत्पुत्रो यत्र अनन्तरएव जीवनमात्रं पृष्टं॥ अनुजश्च देवकस्य हृदीकः॥ ससुतः कृतवर्मा
जयंतादयः कृष्णस्य भ्रातरः॥२९॥ ३०॥ सर्ववृष्णीनां मध्ये महारथः॥ गंभीररयः॥ युद्धे महावेगः॥ वर्द्धते मोदतेतर
त्यर्थः॥३१॥ श्रीकृष्णस्य अपत्यानि कार्ष्णेयाः॥ तेषु प्रवराः॥३२॥ सुनंदनंदनौ शीर्षण्यौ मुख्यौ येषां ते॥३३॥

कच्चिद्राजाहुको जीवत्यसत्पुत्रोस्य चानुजः॥ हृदीकः ससुतोऽक्रूरो जयंतगदसारणाः॥२९
आसते कुशलं कच्चिद्ये च शत्रुजिदादयः॥ कच्चिदास्ते सुखं रामो भगवान्सात्वतांपतिः॥३०॥
प्रद्युम्नः सर्ववृष्णीनां सुखमास्ते महारथः॥ गंभीररयोऽनिरुद्धो वर्द्धते भगवानुत॥३१॥ सुषेण
श्चारुदेष्णश्च सांबो जांबवतीसुतः॥ अन्येच कार्ष्णिप्रवराः सपुत्रा ऋषभादयः॥३२॥ तथैवानुच
राः शौरेः श्रुतदेवोद्धवादयः॥ सुनंदनंदशीर्षण्या ये चान्ये सात्वतर्षभाः॥३३॥ अपि स्वस्त्यासते स
र्वे रामकृष्णभुजाश्रयाः॥ अपि स्मरंति कुशलमस्माकं बद्धसौहृदाः॥३४॥ भगवानपि गोविंदो
ब्रह्मण्यो भक्तवत्सलः॥ कच्चित्पुरे सुधर्मायां सुखमास्ते सुहृद्वृतः॥३५॥ मंगलाय च लोकानां क्षे
माय च भवाय च॥ आस्ते यदुकुलांभोधौ आद्योऽनंतसखः पुमान्॥३६॥

३४॥ भगवति सुखमास्त इति प्रश्नस्यानौचित्यमाशंक्य इत्याह॥ पुर इत्यादि॥३५॥ भगवतोत्रावस्थाने हि लो
कानां मंगलं नान्यथेत्याशयेनाह॥ चतुर्भिः मंगलाय शुभाय॥ क्षेमाय लब्धपालनाय॥ भवाय उद्भवाय

भा० प्र०
६७

शोकेन हेतुना वदनं च हृच्च ते एव सरोजे शुष्यंती वदनहृत्सरोजे यस्य ॥ हता प्रभा तेजो यस्य ॥१॥ शुचो शो
काश्रूणि यान्युद्गच्छन्ति नेत्रयोरेव संस्तभ्य गलंति तानि च पाणिनामृज्य परोक्षेण दर्शनागोचरेण श्रीकृष्णेन
हेतुना समुन्नद्धं अधिकं यत्प्रेमौत्कंठ्यं तेन कातरः व्याकुल नृपमित्याहेत्युत्तरेणान्वयः ॥३॥ सख्यं हितैषणं मै

शोकेन शुष्यद्वदनहृत्सरोजो हतप्रभः ॥ विभुं तमेवानुध्यायन्नाशक्नोत्प्रतिभाषितुं ॥२॥ कृच्छ्रे
ण संस्तभ्य शुचः पाणिनामृज्य नेत्रयोः ॥ परोक्षेण समुन्नद्धप्रणयौत्कंठ्यकातरः ॥३॥ सख्यं मै
त्रीं सौहृदं च सारथ्यादिषु संस्मरन् ॥ नृपमग्रजमित्याह बाष्पगद्गदया गिरा ॥४॥ अर्जुन उवा
च ॥ वंचितोहं महाराज हरिणा बंधुरूपिणा ॥ येन मेपहृतं तेजो देवविस्मापनं महत् ॥५॥ य
स्य क्षणवियोगेन लोको ह्यप्रियदर्शनः ॥ उक्थेन रहितो ह्येष मृतकः प्रोच्यते यथा ॥६॥ यत्सं
श्रयाद्द्रुपदगेहमुपागतानां राज्ञां स्वयंवरमुखे स्मरदुर्मदानां ॥ तेजो हृतं खलु मयाभिहत
श्च मत्स्यः सज्जीकृतेन धनुषाधिगता च कृष्णा ॥७॥

त्री उपकारः तां सौहृदं स्वसंबंधिनां च ॥ वोध्येन कंगवरोधात गद्गदया ॥४॥ येन मां वंचयित्वा देवानपि विस्मापयति य
तेजः ॥५॥ यस्य क्षणवियोगेनेत्यादि यच्छब्दानामहमद्यमुषित इति सप्तमश्लोकस्थेन तच्छब्देन संबंधः प्रियस्यापि
अप्रियत्वे दृष्टांतः उक्थेन प्राणेन रहितः एष पित्रादिः ॥६॥ श्रीकृष्णोपकाराननुस्मरति ॥ यत्संश्रयादिति दशभिः
यस्य संश्रयात्तद्बलात्स्मरेण कामेन दुर्मदानामतिमत्तानां तेजः प्रभावः हृतं धनुर्गेहेणैव पश्चात्तद्धनुः सज्जीकृ

६७

अन्यद्वा शरणागतं सत्त्वं प्राणिमात्रं न त्यक्तवानसि किं यत्त्वं पूर्वं शरणप्रदः ॥४१॥ अगम्यामिति छेदः । नि-
दितां स्त्रियं नागमः ॥ किं नागतवानसि ॥ असत्कृतां मलिनवस्त्रादिना नागमः ॥ किं नोत्तमैः अनुत्तमैः समैरित्य-
र्थः ॥ असमैरधमैर्वा किं न पराजितोसीत्यर्थः ॥४२॥ संभोजनार्हान् वृद्धान् बालकांश्च किं स्वित्पर्यभुंक्थाः
त्यक्त्वा भुक्तवानसि ॥ अक्षमं कर्तुमयोग्यं यत्तत्कृतवानसि किं ॥४३॥ नित्यं सदा प्रेष्ठतमेन हृदयेनांतरं

कच्चित्त्वं ब्राह्मणं बालं गां वृद्धं रोगिणं स्त्रियं ॥ शरणोपसृतं सत्त्वं नात्याक्षीः शरणप्रदः ॥४१॥ कच्चि-
त्त्वं नागमोऽगम्यां गम्यां वासत्कृतां स्त्रियं ॥ पराजितो वाथ भवान्नोत्तमैर्नासमैः पथि ॥४२॥ अपि स्वि-
त्पर्यभुंक्थास्त्वं संभोज्यान्वृद्धबालकान् ॥ जुगुप्सितं कर्म किंचित्कृतवान्न तु यदक्षमं ॥४३॥
७२ कच्चित्प्रेष्ठतमेनाथ हृदयेनात्मबंधुना ॥ शून्योस्मि रहितो नित्यं मन्यसे तेन्यथा न रुक् ॥४४॥
इति श्रीमद्भागवते महापुराणे प्रथमस्कंधे चतुर्दशोऽध्यायः ॥१४॥ सूत उवाच ॥ एवं कृष्णसखः कृ-
ष्णो भ्रात्रा राज्ञा विकल्पितः ॥ नानाशंकास्पदं रूपं कृष्णविश्लेषकर्शितः ॥१॥

णात्मबंधुना श्रीकृष्णेन रहितः ॥ शून्योस्मीति आत्मानं मन्यसे ॥ यत्त्वं हृदयेन शून्योस्मीति मन्यसे इत्यर्थः ॥ अन्य-
था ते रुक् मनःपीडा न घटते ॥४४॥ इति प्रथमे चतुर्दशः ॥१४॥ कलिप्रवेशमालक्ष्य धर्मं न्यस्य परीक्षिति ॥ आरुरो-
हन्नृपः स्वर्गमिति पंचदशेऽब्रवीत् ॥ कृष्णोऽर्जुन आविकल्पितः इति छेदः ॥ नानाशंकास्पदं रूपमालक्ष्य विकल्पि-
त इत्यर्थः ॥ प्रतिभाषितुं नाशक्नोदित्युत्तरेणान्वयः ॥ तत्र हेतवः ॥ कृष्णविश्लेषेण कर्शितः कृशः कृतः ॥१॥

शिष्याणामयुतस्याग्रे तत्र्यं कौभुक्तोयः ॥ तस्माद्दुर्वाससो हेतोः ॥ अरिणा दुर्योधनेन रचितं यत्तद्दुरंतं कृच्छ्रं शा
पलक्षणं तस्मात्सकाशान्नोऽस्मान्वनेऽरण्ये त्वं जुगोप ॥ किं कृत्वा शाकमेवान्नं तस्मिन्पात्रेऽवशिष्टमुपभुज्य जग्ध्वा
यतः । उपयोगात्सलिलेऽपि निमग्नो मुनीनां संघः ॥ त्रिलोकीं तृप्ताममंस्त ॥ एवं हि भारते कथा ॥ कदाचित्तु दु
र्वाससो दुर्योधनेनातिथ्यं कृतं । तेन च परितुष्टेन च वरं वृणीष्वेत्युक्ते दुर्वाससः शापात्पाण्डवा नश्येयुरि
ति मनसि विधाय दुर्योधनेनोक्तं ॥ युधिष्ठिरः स्मकुलमुख्योऽनस्तस्यापि भवतैव शिष्यायुतसहितेनाति
थिना भवितव्यं ॥ किंतु द्रौपदी यथा स्वधा न सीदेत ॥ तथा तस्या भुक्तवत्यां तद्गृहे गंतव्यमिति ततस्तथैव दु
र्वाससि प्राप्ते परमादरेण युधिष्ठिरेण माध्याह्निकं कृत्वा आगम्यतामिति विज्ञापितो मुनिसंघो अघमर्षणाय

यो नो जुगोप वनमेत्य दुरंतकृच्छ्राद्दुर्वाससोऽरिविहितादयुताग्रभुग्यः ॥ शाकान्नशिष्टमु
पभुज्य यतस्त्रिलोकीं तृप्ताममंस्त सलिले विनिमग्नसंघः ॥ ११ ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ

जले निममज्ज ॥ तत्र चिंतातुरया द्रौपद्या स्मृतमात्रः कृष्णः अंकस्थां रुक्मिणीं हित्वा ॥ तत्क्षणमेव भक्तवत्स
लतया आगतः ॥ तया चावेदिते वृत्तांते भगवतोक्तं द्रौपद्याहं बुभुक्षितोऽस्मि प्रथमं मां भोजयेति तेन सा चातिलज्जि
तयोक्तं स्वामिन्मद्भोजनपर्यंतमक्षयमन्नं सूर्यदत्तस्थाल्यां मया च सर्वान्नं भोज्यं भुक्तं ॥ अतो नास्त्यन्नमिति ।
तथापि तन्निर्बंधेन स्थालीमानाय्य ॥ तत्कंठलग्नं किंचित् शाकान्नं प्राश्योक्तं ॥ अनेन विश्वात्मा भगवान् प्रीयतां
अथ भोक्तुं मुनिसंघमाह्वयेति ॥ स च तावतातितृप्तः ॥ वृथापाकभयेन पलायित इति ॥ ११ ॥ श्री ॥ ९८

उइतिविस्मयेखांडवंइंद्रस्यवनंअदांदग्धवानस्मि॥खांडवदाहेनरक्षितेनमयेनकृतांचसभांलब्ध्वाअद्भु
तशिल्पिरूपामायायस्यांसातेऽध्वरेयागेराजसूये॥च॥अनंतरश्लोकोविगीतः॥तथापिव्याख्यायते॥नरपशिरःस्वाध्वे
यस्यतंजरासंधंतवानुजोभीमःमखार्थमहन्हतवान्॥तन्निर्जयंविनाराजसूयमखानुपपत्ते॥गजायुतस्य
वसत्वमुत्साहशक्तिःवीर्य्यंबलंचयस्यसःतंहत्वाप्रमथनाथोमहाभैरवःतस्यमखाययेराजानःतेना
पत्संनिधावहमुखांडवमग्नयेदामिंद्रंचसामरगणंतरसाविजित्य॥तथासभामयकृताद्भु
तशिल्पमायादिभ्योहरन्नृपतयोबलिमध्वरेते॥च॥यत्तेजमानरपगिरेंघ्रिमहन्मखा
र्थेआर्य्योनुजस्तवगजायुतसत्ववीर्यः॥तेनाहताःप्रमथनाथमखायभूपायन्मोचिता
स्तदनयन्बलिमध्वरेते॥३॥पत्न्यास्तवाधिमखमंत्रमहाभिषेकश्लाघिष्ठचारुकवरंकित
वैःसभायां॥स्पृष्टंविविकीर्य्यपदयोःपतिताश्रुमुख्यायेस्तत्स्त्रियोहतहतेशविमुक्तकेशाः
हताः॥तेयस्मात्मोचिताः॥तत्तस्मात्तेऽध्वरेबलिमानीतवंतः॥३॥येःकितवैःदुःशासनादिभिःतवपत्न्याःके ॥१०॥
वरंविकीर्य्यउन्मुच्यस्पृष्टंआकृष्टंतेषांस्त्रियोहतेशाःअकृतनचकार॥कथंभूतंकेवरं॥अधिमखंराजसूय
मधिकृत्यकृतोरचितोयोमहाभिषेकः॥तेनश्लाघ्यंनमंचारुहरम्यं॥तज्ज्वस्मरणात्तदानीमेवप्रासस्य॥श्री
कृष्णस्यनमनेपदयोःपतितान्अश्रुलिमुखात्यस्याःपत्न्याःत्वयिनाथेसतिचेन्मेदुःखंतर्हिकोपराधः
स्तवममैवाभाग्यमित्यभिप्रायः॥पदशब्दस्यसापेक्षत्वात्स्यापिपतितशब्देनसमासोनित्यसा

भा० प्र० अदभ्राश्च नल्पा ये राजन्यवर्याः ॥ तेषां रथमंडलैर्मंडितासु भीष्मादीनां चमूषु सारथ्यरूपेण मम अग्रेचरः
६६ सन् ॥ हे विभो तेषां यूथपानां आयुरादीनि यो दृष्ट्यैव आर्च्छत् ॥ हृतवान् ॥ मनांसि उत्साहादिशक्तिः सहो बलं ते
जः शस्त्रादिकौशलं ॥ १५ ॥ यस्य दोःषु भुजेषु मा मां प्रणिहितं स्थापितं तेनैव गुर्वादिभिर्निरूपितानि प्रयु
क्तानि अस्त्राणि मां न स्पृशंति स्म ॥ गुरुर्द्रोणः ॥ त्रिगर्त्तः ॥ त्रिगर्त्तदेशाधिपपति ॥ सुशर्मा शलः शल्यः सैंधवः

मंडल १ यो भीष्मकर्णगुरुशल्यचमूष्वदभ्रराजन्यवर्यरथमंडितासु ॥ अग्रेचरो मम विभो रथयू
थपानामायुर्मनांसि च दृशा सह ओज आर्छत् ॥ १५ ॥ यद्दोःषु मा प्रणिहितं गुरुभीष्मकर्णद्रौ
णित्रिगर्त्तशल्यसैंधववाह्लिकाद्यैः ॥ अस्त्राण्यमोघमहिमानि निरूपितानि नोपस्पृशुर्नृहरि
दासमिवासुराणि ॥ १६ ॥ सौत्ये वृतः कुमतिनात्मद ईश्वरो मे यत्पादपद्मभवाय भजंति
भव्याः ॥ मां श्रांतवाहमरयो रथिनो भुविस्थं न प्राहरन्यदनुभावनिरस्तचित्ताः ॥ १७ ॥

सिंधुदेशाधिपतिर्जयद्रथः ॥ वाह्लीकः शंतनोर्भ्राता ॥ अमोघो महिमा येषां तथाभूतान्यपि ॥ पाठांतरेपि सर्व
वार्थः ॥ प्रतीकाराकरणेप्यस्पर्शे दृष्टांतः ॥ नृहरिदासं प्रह्लादमिव ॥ १६ ॥ स्वापराधमनुस्मरन्संतप्यमान आह ॥
सौत्ये सारथ्ये कुमतिना मे मया वृतः कुमतित्वमेवाह ॥ आत्मद इत्यादिना ॥ अभवाय मोक्षाय ॥ भव्याः श्रेष्ठाः ॥ श्रां
ताः वाहा अश्वा यस्य तं मां ॥ जयद्रथवधे हि ॥ जलपानं विना अश्वाः श्रांताः ॥ ततो रथादवतीर्य वाणैर्भुवं भित्वा ॥ ६६
जलं संपादितं मया तदा यस्यानुभावेन निरस्तचित्ता अरयो मां न प्रहृतवंतः ॥ स सौत्ये वृत इति कुमतित्वं

गिरिजासहितोविस्मापितःसन्निजंपाशुपतमस्त्रं॥अन्येपिलोकपालानिजानिअस्त्राणिआगत्यददुःअ
न्यदप्याश्चर्यमाह॥अमुनैवेति॥महतरंद्रस्यासनार्द्धे॥२१॥तत्रैवस्वर्गेक्रीडतःगांडीवलक्षणंचिह्नयस्यत
त॥अराततयोनिवातकवचादैत्याः॥तेषांवधार्थमाश्रितवंतः॥येनानुभावितंप्रमाणीकृतंहेआजमीढयुधि
रतेनमुषितःवंचितोस्मि॥कथंभूतेनभस्मानिजमहिमावस्थानेन॥२३॥यद्बांधवइत्यादिश्लोकत्रयस्या

यत्तेजसाथभगवान्युधिशूलपाणिर्विस्मापितःसगिरिजोस्त्रमदान्निजंमे॥अन्येपिचाहममु
नैवकलेवरेणप्राप्तोमहेंद्रभवनेमहदासनार्द्धे॥२२॥तत्रैवमेविहरतोभुजदंडयुग्मंगांडीवल
क्षणमरातिवधायदेवाः॥सेंद्राश्रितायदनुभावितमाजमीढतेनाहमद्यमुषितःपुरुषेणभ
स्मा॥२३॥यद्बांधवंकुरुवलाब्धिमनंतपारंएकोरथेनतततरेहमतीर्यसत्वं॥प्रत्याहृतंवकुध
नंचमयापरेषांतेजस्पदंमणिमयंचहृतंशिरोभ्यः॥२४॥

पितेनमुषितोहमितिपूर्वेणैवसंबंधः॥श्री
कृष्णबांधवएकएवाहं॥कौरवसैन्याब्धिंनास्त्यंतोगांभीर्येण॥पारंचदेशतोयस्यतत्तरे॥तीर्णवान्॥उत्त
रगोग्रहे॥अतीर्यानिदुस्तराणिसत्वानितिमिंगिलादीनिभीष्मादिरूपाणियस्मिन्॥परैनीतंगोधनं
प्रत्याहृतं॥परेषांचशिरोभ्यःसकाशात्तेजसास्पदंप्रभावस्यास्पदंऊर्मीषरूपंमणिमयंमुकुटर
त्नरूपंचवकुधनम्॥तानमीहतास्त्रेणमोहयित्वाहृतंयद्बांधवेनमया॥२४॥ ॥ छ ॥ छ ॥ ॥ छ ॥ ॥

भा० प्र०
१ ७०

श्रीकृष्णवियोग एवात्र हेतुर्नान्यदित्याह ॥ यतः येभ्यः नृपतयो नमंति ईशेन रिक्तं शून्यं असत्कार्याक्षमं स
सन्मंत्रविधानैरपि भस्मनि हुतमिव अप्रतिष्ठितादपि कुहकान्मायाविनः सकाशात् राद्धं लब्धं यथा सम्यक्
कर्षणादिनापि ऊषरभूमौ उप्तं बीजमिव ॥२१॥ सुहृत्पुरे त्वयापृष्टानां नः सुहृदां मध्ये चत्वारः पंचावशेषिताः
तत्र हेतुः विप्रशापेत्यादि ॥२२॥ वारुणीं ॥ अजानतामिवान्योन्यमेरकामुष्टिभिर्निघ्नता ॥२३॥ अवशेषिता इत्यने

तद्वै धनुस्त इषवः स रथो हयास्ते सोहं रथी नृपतयो यत आनमंति ॥ सर्वं क्षणेन तदभूदसदी
शरिक्तं भस्मन्हुतं कुहकराद्धमिवोप्तमूष्यां ॥२१॥ राजंस्त्वयानुपृष्टानां सुहृदां नः सुहृत्पुरे
विप्रशापविमूढानां चतुःपंचावशेषिताः ॥२२॥ वारुणीं मदिरां पीत्वा मदोन्मथितचेतसां ॥ अजानता
मिवान्योन्यं निघ्नतां मुष्टिभिर्मिथः ॥२३॥ प्रायेणैतद्भगवत ईश्वरस्य विचेष्टितं ॥ मिथो निघ्नंति भूता
नि भावयंति च यन्मिथः ॥२४॥ जलौकसां जले यद्वन्महांतोऽदंत्यणीयसः ॥ दुर्बलान्बलिनो राजन्महांतो
बलिनो मिथः ॥२५॥ एवं बलिष्ठैर्यदुभिर्महद्भिरितरान्विभुः ॥ यदून्यदुभिरन्योन्यं भूभारं संजहार ह ॥२६॥

नोक्तं ॥ हेतुकर्त्तारमाह त्रिभिः ॥ प्रायेणेति भावयंति ॥२४॥ जलौकसां मत्स्यादीनां मध्ये महांतः स्थूलाः ॥ अ
णीयसः सूक्ष्मान् पथ्याभक्षयंति ॥२५॥ एवं बलिष्ठैः महद्भिः ॥ पांडवैः दुर्योधनजरासंधादीन् यदुभिः इ
तरान् शाल्वादीन् निहत्य यदून् यदुभिरन्योन्यं निहत्य भगवान् भुवो भारभूतान् संहृतवान् ॥ समहरत ॥२६॥ ॥७०॥

हे नरदेव उदारं गंभीरं रुचिरं यत्स्मितं तेन शोभितानि नर्माणि परिहासवाक्यानि तया कार्य्यप्रस्तावेषु हे
पार्थेत्यादीनि मधुराह्वराणि संजल्पितानि च हृदिस्पृशानि मनोज्ञानि माधवस्य यान्येतानि इदानीं स्मर्तुं मे
मह्रदयं लुठंति लोवयंति क्षोभयंतिणि भावार्थः ॥२८॥ विकत्थनं स्वगुणश्लाघनादि शय्यादिषु एते
त ॥ अव्यतिरेकाद्धेतोः ॥ कस्यचिद्व्यभिचारं दृष्ट्वा हे वयस्य सत्यवान् सत्ययुक्त त्वं ॥ इति वक्रोक्त्या विप्रलब्धः

नर्माण्युदाररुचिरस्मितशोभनानि हे पार्थ हे अर्जुन सखे कुरुनंदनेति ॥ संजल्पितानि
नरदेव हृदिस्पृशानि स्मर्तुर्लुठंति हृदयं मम माधवस्य ॥२७॥ शय्यासनाटनविकत्थनभो
जनादिष्वैक्याद्वयस्य सत्यवानिति विप्रलब्धः ॥ सख्युः सखेव पितृवत्तनयस्य सर्वं सेहे म
हान्महितया कुमतेरघं मे ॥२९॥ सोऽहं नृपेंद्र रहितः पुरुषोत्तमेन सख्या प्रियेण सुहृदा हृदये
न शून्यः ॥ अध्वन्युरुक्रमपरिग्रहमंग रक्षन् गोपैरसद्भिरबलेव विनिर्जितोस्मि ॥२०॥

तिरस्कृतः ॥ अश्नुमानि तिपाठे अश्नवो देवाः सेवकाः संत्यस्य सोऽसौ महान् वयस्य इति मत्वा विप्रलब्ध
स्तिरस्कृत इत्यर्थः ॥ मेऽघं अपराधं असहत महितया महत्त्वेन एकं पदे अतिमहत्त्वेनेत्यर्थः ॥ सख्युरघं स
खेव ॥ तनयस्याघं पितेव ॥२९॥ त्वया शंकितपराजयं च प्राप्तोऽहमित्याह ॥ तेन सख्या रहितः ॥ अतो
हृदयेन शून्यः ॥ अंग हे राजन् ॥ उरुक्रमस्य परिग्रहं ॥ षोडशसहस्रस्त्रीलक्षणं असद्भिः अबलायो

भगवतो मार्गे आलक्ष्य यदुकुलस्य संस्थां नाशं श्रुत्वा नारदोक्तं चानुस्मृत्य ॥ स्वः पथाय ॥ स्वर्गमार्गाय निभृतात्मानि
श्चलचित्तः ॥ ३२ ॥ तां दुर्विज्ञेयावस्थानि ॥ एकादशे हि ॥ सौदामिन्या यथाकाशे यात्या हित्वाभ्रमण्डलं ॥ गतिर्न लक्ष्य
ते मर्त्यैस्तथा कृष्णस्य दैवतैरिति संसृते रूपरराम ॥ जीवन्मुक्तो वभूव ॥ देहं जहाविति वा ॥ ३३ ॥ तदेवमुक्तो म
पियादवेभ्यो भगवत्तेवेलत्स्यएयमवुध्वानत्साम्यं वदतो मंदमतीन्प्रतिवेलत्स्य एयस्य प्टयति द्वाभ्यां ॥ य

निशम्य भगवन्मार्गं संस्थां यदुकुलस्य च ॥ स्वः पथाय मतिं चक्रे निभृतात्मा युधिष्ठिरः ॥ ३२ ॥ पृथाऽ
प्यनुश्रुत्य धनंजयोदितं नाशं यदूनां भगवद्गतिं च तां ॥ एकान्तभक्त्या भगवत्यधोक्षजे निवेशितात्मो
परराम संसृतेः ॥ ३३ ॥ ययाहरद्भुवो भारं तां तनुं विजहावजः ॥ कंटकं कंटकेनेव द्वयं चापीशि
तुः समम् ॥ ३४ ॥ यथा मत्स्यादिरूपाणि धत्ते जह्याद्यथा नटः ॥ भूभारः क्षपितो येन जहौ
तच्च कलेवरं ॥ ३५ ॥ यदा मुकुन्दो भगवानिमां महीं जहौ स्वतन्वा श्रवणीयसत्कथः ॥ तदाहरे
वाप्रतिबुद्धचेतसामधर्महेतुः कलिरन्ववर्तत ॥ ३६ ॥ यायादवरूपया तन्वा भुवो भारं कंटकेने
कंटकमिवाहरत्तत् ॥ यादवतनुः भूभारतनुश्चेति द्वयमपीश्वरस्य संहार्यत्वेन सममेव ॥ ३४ ॥ श्रीकृष्ण
मूर्त्तेर्विशेषमाह ॥ यथेति ॥ तान्यपि यथा धत्ते तद्वज्जहाति च तदाह ॥ यथा नटो निजरूपेणास्थितो यथारू
पान्तराणि धत्ते ॥ श्रत्ते ईत्ते च तथा तदपि कलेवरं जहौ ॥ अंतरधादित्यर्थः ॥ ३५ ॥ युधिष्ठिरस्य स्वर्गारोह
प्रसंगाय कलिप्रवेशमाह ॥ स्वतन्वा जहौ स्वतनोरेव वैकुंठारोहात् श्रवणीयसती कथा यस्य ॥ तदाह ॥ यदा तस्मि

अतः परं वक्तुं न शक्नोमीति सूचयन्नाह ॥ देशकालोचितार्थयुक्तानि मनःपीडोपशमनकराणि च
गोविंदस्य वचनानि स्मरतो मम चित्तं हरंति ॥ आकर्षंति ॥ २७ ॥ एवमिति सूतोक्तिः ॥ अतिदृढेन स्नेहेन
चिंतयतो मतिः शांता विशोका विमला विरजस्का चासीत् ॥ २८ ॥ मतिवैमल्यफलमाह ॥ वासुदेवांघ्र्यनुध्याने
न परिबृंहितं रंहो वेगो यस्याः ॥ तया निर्मथिता उन्मूलिता अशेषाः कषायाः कामादयो यस्याः सा धिषणा बुद्धि
र्यस्य सः ॥ ज्ञानं पुनरध्यगमदित्युत्तरेण [stain] न्वयः ॥ २९ ॥ कालेन कर्मभिः ॥ तमसा भोगाभिनिवेशेन च रुद्धं आवृ

देशकालार्थयुक्तानि हृत्तापोपशमानि च ॥ हरंति स्मरतश्चित्तं गोविंदाभिहितानि मे ॥ २७ ॥ सूत उवाच ॥
एवं चिंतयतो जिष्णोः कृष्णपादसरोरुहं ॥ सौहार्देनातिगाढेन शांतासीद्विमला मतिः ॥ २८ ॥ वासुदेवांघ्र्य
भिध्यानपरिबृंहितरंहसा ॥ भक्त्या निर्मथिताशेषकषायधिषणोऽर्जुनः ॥ २९ ॥ गीतं भगवता ज्ञानं यत्त
त्संग्राममूर्द्धनि ॥ कालकर्मतमोरुद्धं पुनरध्यगमद्विभुः ॥ ३० ॥ विशोको ब्रह्मसंपत्त्या संछिन्नद्वैतसंशयः
॥ लीनप्रकृतिनैर्गुण्यादलिंगत्वादसंभवः ॥ ३१ ॥

तं स तु पुनः प्राप ॥ ३० ॥ ज्ञानफलमाह ॥ विशोक इति ॥ एतदेव शोकहेत्वभावेनोपपादयति ॥ शोकस्य हि हेतुर्द्वैतभ्रमः
तस्य देहः ॥ तस्य लिंगं तस्य गुणाः ॥ तेषामविद्या तत्र ब्रह्मसंपत्त्या वेदगीतादिश्रवणैः ब्रह्माहमिति ज्ञानेन लीना प्र
कृतिरविद्या यस्मिन् तन्नैर्गुण्यं भवति ॥ न तु सुषुप्तिप्रलययोरिवाविद्याशेषः ॥ तस्मान्नैर्गुण्यात् गुणकार्य्यलिंगना
शः ॥ अलिंगत्वाच्च असंभवः ॥ सम्यग्भोगाय भवति ॥ पुनः पुनरिति संभवः स्थूलशरीरं तद्रहितः ॥ ततश्चातत्यपरिच्छे
दाभावात् संछिन्नो द्वैतलक्षणः संशयो भ्रमो यस्य सः अर्जुनः विशोको जात इति ॥ ३१ ॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ॥

भा० प्र० त्रित्वे गुणत्रये पंचत्वं देहं ॥ तच्च त्रित्वं एकत्वे अविद्यायां सर्वं सर्वोऽशेषपदैतु मविद्या आत्मनि जीवे ॥ अजो-
॥७२॥ हवीदिति वक्तव्ये ॥ अजुहवीदित्यार्षम् ॥ एवं शोधितं आत्मानं ब्रह्मणि अव्यये कूटस्थे न तत्स्यान्यत्र ल-
यस्त्वर्थः ॥४२॥ तदेवमात्मप्रतिपत्तिमुक्त्वा बाह्य स्थितिमाह ॥ चीरवासा इति द्वाभ्यां ॥ बद्धवाक् मौनी ॥

त्रित्वे जुहाव च पंचत्वं तच्चैकत्वे जुहोन्मुनिः ॥ सर्वमात्मन्यजुहवीद्ब्रह्मण्यात्मानमव्यये ॥४२
चीरवासा निराहारो बद्धवाक् मुक्तमूर्द्धजः ॥ दर्शयन्नात्मनो रूपं जडोन्मत्तपिशाचवत् ॥४३
अनवेक्षमाणो निरगादशृण्वन्बधिरो यथा ॥ उदीचीं प्रविवेशाशां गतपूर्वां महात्मभिः ॥४४
हृदि ब्रह्म परं ध्यायन्नावर्तेत यतो गतः ॥ सर्वे तमनुनिर्जग्मुर्भ्रातरः कृतनिश्चयाः ॥४५
कलिनाधर्ममित्रेण दृष्ट्वा स्पृष्टाः प्रजा भुवि ॥ ते साधुकृतसर्वार्था ज्ञात्वात्यंतिकमात्मनः ॥
मनसा धारयामासुर्वैकुंठचरणांबुजं ॥४६॥ तद्ध्यानोद्रिक्तया भक्त्या विशुद्धधिषणाः परे ॥
तस्मिन्नारायणपदे एकांतमतयो गतिं ॥४७॥ अवापुर्दुरवापां ते असद्भिर्विषयात्मभिः ॥ वि-
धूतकल्मषा स्थानं विरजेनात्मनैव हि ॥४८॥

४३ ॥ अनवेक्षमाणः अनुजादीन् प्रतीक्षामकुर्वन् ॥ आशां दिशं गतपूर्वां पूर्वं प्रविष्टां ॥४४॥ यतो यां दिशं
४५ ॥ अधर्ममित्रेण यस्य तेन साधुकृताः सर्वेऽर्थाः धर्मादयो यैः ॥ अत एव वैकुंठस्य चरणाम्बुजमेव आत्यंति-
कं शरणं ज्ञात्वा ॥४६॥ ४७ ॥ कथंभूतं ते पदे विधूतकल्मषाणां स्थानं निवासस्थानं यत्तस्मिन् विरजेनात्मने-
वावापुः ॥ न तु षोडशकलेन लिंगेन गतेर्वा विशेषणं
विरजेनात्मनैवावस्थानरूपां गतिं विधूतकल्मषाः
प्रापुरिति ॥४८॥

युधिष्ठिरस्तस्य कलेः परिसर्पणं प्रसरणं विलोक्य कथंभूतं ॥ लोभाद्यधर्मचक्रं यस्मिन् जिह्मं कौटिल्यं
पर्यधात् तदुचितपरिधानमकरोत् ॥३६॥ आत्मनः स्वस्य गुणैः सुसमं अतिसदृशं तोयं वर्त्ततः स्थितं स
मुद्रोदकमेव नीवी परिधानविशेषो यस्याः तस्याः भूमेः पतित्वेनाभिषिक्तवान् ॥ वज्रं अनिरुद्धस्य पुत्रं नि
रूप्य कृत्वेत्यर्थः ॥ अपिबत् ॥ आत्मनि आरोपयामास ईश्वरः समर्थः ॥३९॥ संछिन्नान्यशेषाणि बंधना

युधिष्ठिरस्तत्परिसर्पणं बुधः पुरे च राष्ट्रे च गृहे तथात्मनि ॥ विभाव्य लोभानृतजिह्महिंसना
द्यधर्मचक्रं गमनाय पर्यधात् ॥३७॥ स्वराट् पौत्रं विनयिनमात्मनः सुसमं गुणैः ॥ तोयनीव्याः
पतिं भूमेरभ्यषिंचद्गजाह्वये ॥३८॥ मथुरायां तथा वज्रं शूरसेनपतिं ततः ॥ प्राजापत्यां निरू
प्येष्टिमग्नीनपिबदीश्वरः ॥३९॥ विसृज्य तत्र तत्सर्वं दुकूलवलयादिकं ॥ निर्ममो निरहंकारः
संछिन्नाशेषबंधनः ॥४०॥ वाचं जुहाव मनसि तत्प्राण इतरे च तं ॥ मृत्यावपानं सोत्सर्गं तं पंचत्वे ह्य
जोहवीत् ॥४१॥

नि उपाधयो येन ॥४०॥ न दैवं दर्शयति द्वाभ्यां ॥ वाचमित्युपलक्षणं ॥ सर्वेंद्रियाणि मनसि प्रविलापित
वान् इत्यर्थः ॥ तच्च मनः प्राणे प्राणाधीनवृत्तित्वात् ॥ तं प्राणं इतरे अपाने तेनाकर्षणात् ॥ अपानव्यापारं सोत्स
र्गं तत्सहितमपानं मृत्यौ तदधिष्ठात्रिदेवतायां ॥ अनेनैव वागादिष्वर्पितत्कर्मसाहित्यं ज्ञेयं तं मृत्युं पंचम
हाभूतानां ऐक्ये देहस्यैव मृत्युनीत्मनः इति भावितवानित्यर्थः ॥ अजोहवीदिति यङ्लुगंतात् लुङि रू
पं ॥ अजुहवीदित्यार्षं ॥४१॥

भा० प्र०
९३

आजहार कृतवान् इत्यर्थः ॥ शारद्वतं कृपं ॥ यत्र येष्वश्वमेधेषु देवा दृष्टिगोचरा बभूवुः ॥३॥ निजग्रा-
ह निगृहीतवान् ॥ कलिमेव निर्दिशति ॥ नृपेति ॥४॥ कस्य हेतोरिति ॥ अयमर्थः ॥ कलिं कस्माद्धेतोः के-
वलं निजग्राह हतवान् वा न ॥ यतोऽसौ शूद्रकः ॥ अतिकुत्सितः ॥ यो गां पदाहनदिति ॥५॥ अस्य विष्णोः प-
दांभोजयोर्यो मकरंदः ॥ तं लिहंति ॥ आस्वादयंतीति ये तेषां सतां महतां वा कथाश्रयतामिति समन्विति हि

आजहाराश्वमेधांस्त्रीन् गंगायां भूरिदक्षिणान् ॥ शारद्वतं गुरुं कृत्वा देवा यत्राक्षिगोचराः
॥३॥ निजग्राहौजसा वीरः कलिं दिग्विजये क्वचित् ॥ नृपलिंगधरं शूद्रं घ्नंतं गोमिथुनं पदा
॥४॥ शौनक उवाच ॥ कस्य हेतोर्निजग्राह कलिं दिग्विजये नृपः ॥ नृदेवचिह्नधृक् शूद्र-
कोऽसौ गां यः पदाहनत् ॥ ॥५॥ तत्कथ्यतां महाभाग यदि कृष्णकथाश्रयं ॥ अथवास्य प-
दांभोजमकरंदलिहां सतां ॥ किमन्यैरसदालापैरायुषो यदसद्व्ययः ॥६॥ क्षुद्रायुषां नृणामं-
ग मर्त्यानामृतमिच्छतां ॥ इहोपहूतो भगवान्मृत्युः शामित्रकर्मणि ॥७॥ ॥ ॥

ष्टस्यानुषंगः ॥ नहि कथ्यतां भवेत् किमन्यैरसद्भिरालापैः ॥ यत् यैरायुषो वृथा व्ययः ॥६॥ अस्माकमयं
सत्रप्रयत्नोऽपि हरिकथामृतपानार्थ एवेत्याह सार्द्धद्वाभ्यां ॥ क्षुद्रमल्पमायुर्येषां ॥ अतो मर्त्यानां मर-
णवतां तथापि ऋतं सत्यं मोक्षमिच्छतां यो मृत्युः ॥ स इह सत्रे शमितुरिदं शामित्रं कर्म पशुहिंसनं तत्र

॥ १ ॥

९३

तीर्थान्यटन्प्रभासे॥श्रीकृष्णावेशेनकृष्णेचित्तमावेश्यदेहंपरित्यज्यतच्चित्तएवसन्तदानीनेतुमागतैःपितृभिःसहस्वक्षयंस्वाधिकारस्थानंययौ॥४९॥आत्मानंप्रतिअनवेक्षतांतदाज्ञात्वाआपतत्प्राप॥५०॥इतिएवंयत्संप्रयाणंअलंअतिशयेनस्वस्त्ययनंमंगलास्पदंअलंपवित्रंच॥५१॥इति श्री

विदुरोपिपरित्यज्यप्रभासेदेहमात्मवान्॥कृष्णावेशेनतच्चित्तःपितृभिःस्वक्षयंययौ॥४९॥
द्रौपदीचतदाज्ञायपतीनामनपेक्षताम्॥वासुदेवेभगवतिह्येकांतमतिरापतत्॥५०॥नमाता
पितावंधुवर्गोनभर्त्तानपुत्रोनदैवंनचत्तातिवर्गः॥दयानाथदीनानुकंपिन्मुरारेशरण्यंगतात्वां
हरेतेनमोस्तु॥५१॥यःश्रद्धयैतद्भगवत्प्रियाणांपांडोःसुतानामितिसंप्रयाणं॥शृणोत्यलं
स्वस्त्ययनंपवित्रंलब्ध्वाहरौभक्तिमुपैतिसिद्धिं॥५२॥इतिश्रीमद्भागवतेमहापुराणेप्रथमस्कं
धेपंचदशोध्यायः॥१५॥सूतउवाच॥ततःपरीक्षिद्द्विजवर्य्यशिक्षयामहींमहाभागवतःशशास
ह॥ यथाहिसूत्यामभिजातकोविदाःसमादिशन्विप्रमहद्गुणस्तथा॥१॥सउत्तरस्यतन
यांउपयेमेइरावतीं॥जनमेजयादींश्चतुरस्तस्यामुत्पादयत्सुतान्॥२॥

प्रथमेपंचदशः॥१५॥ततश्चषोडशेभूमिधर्मयोःकलिनिग्रहयोः॥संवादेवर्ण्यतेप्राप्तिःपालकस्यपरीक्षि
तः॥१॥द्विजवर्य्याणांशिक्षयासूत्यांजन्मतिअभिजातकोविदाः॥जातकर्मविदः॥हेविप्रमहत्तांगुणायस्मिन्॥१॥जनमेजयादीनित्यत्रेत्वाधिकंछांदसं॥२॥

वे२

भा० प्र०
७४

प्रगीयमानं॥ यशश्रादीनि शृण्वन् तेभ्यो ददाविति तृतीयेनान्वयः॥१३॥१४॥१५॥१६॥१७॥ किंच
स्निग्धेषु पांडुषु विष्णोर्यानि सारथ्यादीनि कर्माणि तानि शृण्वन्॥ तथा विष्णोर्जगत्कर्तृकां प्रणतिंच

भद्राश्वं केतुमालं च भारतं चोत्तरान् कुरून्॥ किंपुरुषादीनि सर्वाणि विजित्य जगृहे बलिं
१३॥ तत्र तत्रोपशृण्वानः स्वपूर्वेषां महात्मनां॥ प्रगीयमानं च यशः कृष्णमाहात्म्यसूचकं॥१४
आत्मानं च परित्रातमश्वत्थाम्नोऽस्त्रतेजसः॥ स्नेहं च वृष्णिपार्थानां तेषां भक्तिं च केशवे॥१५
तेभ्यः परमसंतुष्टः प्रीत्युज्जृंभितलोचनः॥ महाधनानि वासांसि ददौ हारान् महामना
:॥१६॥ यत्किंचित्तस्य सैन्येषु वस्तुमात्रमनुत्तमं॥ तत्सर्वमददात्प्रीतः कृष्णगाथाहृताश-
यः॥१७॥ सारथ्यपारषदसेवनसख्यदौत्यवीरासनानुगमनस्तवनप्रणामं॥ स्निग्धेषु पां-
नृपति१ डुषु जगत्प्रणतिं च विष्णोर्भक्तिं करोतिश्चरणारविंदे॥१८॥ तस्यैवं वर्त्तमानस्य पूर्वेषां वृत्ति-
मन्वहं॥ नातिदूरे किलाश्चर्यं यदासीत्तन्निबोध मे॥१९॥ धर्मः पदैकेन चरन् विछायामुपलभ्य
गां॥ पृच्छति स्माश्रुवदनां विवत्सामिव मातरं॥२०॥

शृण्वन्॥ नृपतिः परीक्षित् विष्णोश्चरणारविंदे भक्तिं करोति स्म॥ पारषदमिति रेफषकारयोर्विश्लेषश्छांदसः॥ ने
न पार्षदः सभापतित्वे सेवनोचितानुवृत्तिः॥ वीरासनं रात्रौ खड्गहस्तस्य तिष्ठतो जागरणं॥१८॥ वृत्तिमनुवर्त्तमान
स्य नातिदूरे शीघ्रमेव॥१९॥ धर्मो वृषरूपः॥ विछायां हतप्रभां गां गोरूपां पृथ्वीं॥ विवत्सां नष्टापत्यां॥२०॥ ॥ ७४

ततः किमत आह॥न कश्चिदिति॥तावत्तत्र समाप्तिपर्य्यंतं इह मर्त्यलोके कश्चिन्न म्रियते इत्यर्थः॥प
ततोपि किमत आह॥अहो न लोके हरिकथामृतं वचः पीयेत इत्येतदर्थं हरिलीलैवामृतं यस्मिन्
शीतदभावे व्यर्थमेव जीवनमित्याह॥मंदस्य अलसस्य नक्तं रात्रौ यद्वयः आयुः तन्निद्रया निःफलं
गच्छति॥दिवा अक्रिया च यद्वयः तद्व्यर्थकर्मभिरपह्रियते॥१०॥तत्र तावत्कलिनिग्रहप्रसंगमाह॥य

न कश्चिन्म्रियते तावद्यावदास्त इहांतकः॥एतदर्थं हि भगवानाहूतः परमर्षिभिः॥८॥अ
हो नृलोके पीयेत हरिलीलामृतं वचः॥यस्मिन्प्रीते हि कृतं सर्वमिष्टापूर्त्तादिकं भवेत्॥९॥
मंदस्य मंदप्रज्ञस्य वयो मंदायुषश्च वै॥निद्रयाह्रियते नक्तं दिवा च व्यर्थकर्मभिः॥१०॥सू
त उवाच॥यदा परीक्षित्कुरुजांगलेशृणोत्कलिं प्रविष्टं निजचक्रवर्त्तिते॥निशम्य वार्त्ता
मनतिप्रियां ततः शरासनं संयुगशौंडिराददे॥११॥स्वलंकृतं श्यामतुरंगयोजितं रथं मृगेंद्रध्व
जमास्थितः पुरात्॥वृतो रथाश्वद्विपपत्तियुक्तया स्वसेनया दिग्विजयाय निर्गतः॥१२॥

यदा निजचक्रवर्त्तिते स्वसेनया पालिते देशे कलिं प्रविष्टं शुश्राव॥तदा तां अनतिप्रियां वार्त्तां किंचित्प्रियां च युद्ध
कौतुकसंपत्तेर्निशम्य ततः शरासनं दुष्टनिग्रहार्थमाददे जग्राह॥संयुगशौंडिर्युद्धे प्रगल्भः पाठांतरे युद्धे शौं
डिरतुल्यः॥ततश्च दिग्विजयाय निर्गतः॥१२॥भद्राश्वादीनि एवं पश्चिमदक्षिणोत्तरतः॥समुद्रलग्नानि वर्षाणि मेरोः

भा०प्र० हेअंव मातः धरित्रि ते तव यो भूरिभारस्तस्यावतारणायावतारणार्थं कृतावतारस्य कर्माणि स्मरंती तेन
७५ विस्त्रष्टासती शोचसि निर्वाणं विलंवितं आश्रितये सुत्तानि ॥ पाठांतरे निर्वाणं विडंवितं उपहरितं येः
मोक्षादप्यधिकसुखानीत्यर्थः ॥ २५ ॥ हे अंब वत्से सौभाग्यं कालेन वा हृतं ॥ २६ ॥ भवान्जानात्येव तथा
पिवदयामीत्याह ॥ हे धर्म येन हेतुभूतेन त्वं चतुर्भिः पादैर्वर्तसे यत्र च सत्यादयो गुणा न वियंति नष्टीयं

यद्वांवते भूरिभरावतारकृतावतारस्य हरेर्धरित्रि ॥ अंतर्हितस्य स्मरती विसृष्टा कर्माणि नि
र्वाणविलंवितानि ॥ २५ ॥ इदं ममाचक्ष्व तवाधिमूलं वसुंधरे येन विकर्षितासि ॥ कालेन वा
ते बलिनां बलीयसा सुरार्चितं किं हृतमघ सौभगं ॥ २६ ॥ धरण्युवाच ॥ भवान्हि वेद तत्सर्वं २३
यन्मां धर्मानुपृच्छसि ॥ चतुर्भिर्वर्तसे येन पादैर्लोकसुखावहैः ॥ २७ ॥ सत्यं शौचं दया क्षां
ति त्यागः संतोष आर्जवं ॥ शमो दमस्तपः साम्यं तितिक्षोपरतिः श्रुतम् ॥ २८ ॥ ॥ ऽऽ ॥ ॥ ऽ

ति ॥ तेन श्रीनिवासेन रहितं लोकं शोचामीति षष्ठेनान्वयः ॥ २७ ॥ सत्यं यथार्थभाषणं ॥ शौचं शुद्धत्वं दया प
रदुःखासहनं ॥ क्षांतिः क्रोधप्राप्तौ चित्तसंयमनं ॥ त्यागः अर्थिषु मुक्तहस्तता ॥ संतोषः अलंबुद्धिः ॥ आ
र्जवं अवक्रता ॥ शमो मनो नैश्चल्यं ॥ दमो बाह्येंद्रियनैश्चल्यं तपः ॥ स्वधर्मः साम्यं ॥ अरिमित्राद्यभावः
तितिक्षा परापराधसहनं ॥ उपरतिः लाभप्राप्तावौदासीन्यं ॥ श्रुतं शास्त्रविचारः ॥ २८ ॥ ऽऽ ॥ ॥ ऽऽ ७५

दूरेस्थितंवंधुं॥२१॥त्रिभिःपादैर्न्यूनंअत्रतएवैकपादंमामांवृषलेःस्वपचादिभिः॥३॥

तेआत्मानोदेहस्ययद्यपिवहिरामयोनतस्ततेतथापित्रंतःमध्येआधिपीडायस्याःतांत्वामालक्ष्य
येकेनयतोविच्छासि॥अतद्युषतस्तायत्तावेवएवंभजत्तामुखेनतेलिंगेनतत्रकारणानिकल्पयन्पृच्छति
दूरेवंधुमित्यादिपंचभिः॥अधइत्तकुर्वभोक्ष्यमाणंपुंस्त्वमात्मपदविशेषणत्वात्इत्तायज्ञभागयेषांय

धर्मउवाच॥कच्चिद्भद्रेनामयमात्मनस्तेविच्छायासिम्लायतेषन्मुखेन॥आलक्षयेभवती
मंतराधिंदूरेवंधुंशोचसिकंचनांव॥२१॥पादैर्न्यूनंशोचतिमैकपादमात्मानंवावृषलैर्भो
क्ष्यमाणं॥अहोसुरादीन्हृतयज्ञभागान्प्रजाइतस्विन्मघवत्यवर्षति॥२२॥अरक्ष्यमाणाः
स्त्रियउर्विवालानशोचस्यथोपुरुषादैरिवार्त्तान्॥वाचंदेवींब्रह्मकुलेकुकर्मण्यब्रह्मण्य
राजकुलेकुलाग्र्यान्॥२३॥किंवात्रवंधूनकलिनोपसृष्टान्राष्ट्राणिवातैरवरोपितानि॥इत
स्ततोवाशनपानवासःस्नानव्यवायोन्मुखजीवलोकः॥२४॥
त्ताद्यकरणात्॥२४॥हेउर्विइष्ट्विभर्तृभिर

रक्ष्यमाणाःस्त्रियःपितृभिररक्ष्यमाणान्वालान्प्रत्युतैरेवंअवरोपितानिउच्छासितोनिव्यवायोमेथुनंइ
नस्ततःनिषेधानादरेणसर्वतोऽशनादिषुउन्मुखंवर्त्तमानंजीवलोकंवा॥२४॥
(मूल०)पुरुषादैरिवनिर्दयैः॥आर्त्तान्क्लिष्टान्॥वाचंदेवींसरस्वतीं॥किंकुकर्मणिदुराचारेस्थितांकुलाग्र्यान्ब्राह्मणा

भा० प्र० ७६ तस्य विरहो दुःसह इत्याह चतुर्भिः ब्रह्मादयो यस्याः श्रियः अपांगमोक्षः स्वस्मिन् दृष्टिपातः तत्का
माः बहुतिथं बहून् कालान् तपः समचरन् सम्यक् चरंतिस्म भगवद्भिरुत्तमैः प्रपन्ना आश्रिता अपि सा
श्रीर्यस्य पादलावण्यं अलमनुरक्ता सती सेवते ॥३२॥ तस्य भगवतः श्रीमद्भिः पादैः केतुर्ध्वजः अब्जा
दयः केतवः चिह्नानि येषां तैः यद्वा अब्जादीनां आश्रयैः समलंकृतमंगं यस्याः सा अहं ततो भगव
तः विभूतिं संपदं उपलभ्य प्राप्य त्रीन् लोकान् अतिक्रम्य अरोचे शोभितवत्यास्मि पश्चात्तस्या विभूते

ब्रह्मादयो बहुतिथं यदपांगमोक्षकामास्तपः समचरन्भगवत्प्रपन्नाः सा श्रीः स्ववासमरविं
दवनं विहाय यत्पादसौभगमलं भजतेनुरक्ता ॥३२॥ तस्याहमब्जकुलिशांकुशकेतुकेतैः श्री
मत्पदैर्भगवतः समलंकृतांगी त्रीनत्यरोच उपलभ्य ततो विभूतिं लोकान्स मां व्यसृजदुत्स्म
तीं तदंते ॥३३॥ यो वै ममातिभरमासुरवंशराज्ञामक्षौहिणीशतमपानुददात्मतंत्रः त्वां दुःस्थ
मूनपदमात्मनि पौरुषेण संपादयन्यदुषु रम्यमबिभ्रदंगं ॥३४॥

अंते नाशकाले प्राप्ते सति उत्स्मयंतीं गर्वं कुर्वाणां मां स व्यसृजत् त्यक्तवान् ॥३३॥ किंच यो वै आसुरवंशीये
षां राज्ञां अक्षौहिणीशतं रूपं ममातिभरं अपनीतवान् त्वां च अपदत्वात् दुःस्थं संतं पौरुषेण पुरुषकारेण
आत्मनि स्वस्मिन् संपूर्णपदं स्वस्थं संपादयन् लक्षणहेतोः क्रियायाः इति हेतौ शतृप्रत्ययः संपादयितु
मित्यर्थः यदुषु अंगं अबिभ्रत् धृतवानित्यर्थः ॥३४॥ ॥ ॥ऽऽ ऽऽ ऽऽ ॥ ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ ॥ ७६

ज्ञानमात्मविषयं विरक्तिर्वैतृष्ण्यं ऐश्वर्यं नियंतृत्वं शौर्यं संग्रामोत्साहः तेजः प्रभावः वलं दक्षत्वं स्मृतिः क
र्त्तव्यार्थानुसंधानं स्वातंत्र्यंपराधीनता कौशलं क्रियानिपुणता कांतिः सौंदर्यं धैर्यमव्याकुलता मार्द
वं चित्तकाठिन्यं २९ प्रागल्भ्यं प्रतिभातिशयः प्रश्रयो विनयः शीलं सुस्वभावः सहओजोवलानि मन
सः ज्ञानेंद्रियाणां कर्मेंद्रियाणां च पाटवानि भगः भोगास्पदत्वं गांभीर्यं अक्षोभ्यत्वं स्थैर्यं अचंचलता

ज्ञानं विरक्तिरैश्वर्यं शौर्यं तेजो वलं स्मृतिः स्वातंत्र्यं कौशलं कांतिर्धैर्यं मार्दवमेव च २९ प्रा
गल्भ्यं प्रश्रयं शीलं सह ओजो वलं भगः गांभीर्यं स्थैर्यमास्तिक्यं कीर्तिर्मानोनहंकृतिः ३०
ए २ इमे चान्ये च भगवन्नित्या यत्र महागुणाः प्रार्थ्या महत्वमिछद्भिर्न्न वियंति स्म कर्हिचित्
३१ तेनाहं गुणपात्रेण श्रीनिवासेन सांप्रतं शोचामि रहितं लोकं पाप्मना कलिनेक्षितं ३२
आत्मानं चानुशोचामि भवंतं चामरोत्तमं देवान् पितॄन् ऋषीन् साधून् सर्वान् वर्णांस्तथा
आश्रमान् ३३

आस्तिक्यं श्रद्धा कीर्तिर्यशः मानः पूज्यत्वं अनहंकृतिः गर्वाभावः एते एकोनचत्वारिंशत् ३०
अन्ये च ब्रह्मण्यत्वशरण्यत्वादयो महांतो गुणा यस्मिन् श्रीकृष्णे नित्याः सहजाः न वियंति स्म
न क्षीयंते स्म ३१ तेन गुणपात्रेण गुणालयेन पाप्मना पापहेतुना ३२ ३३ ॥ श्रीराम राम राम ॥

भा० प्र०
७१

कार्त्तस्वरस्य स्वर्णैस्तत्कृतपरिच्छदः परिकरो यस्य सुवर्णनिबद्धमित्यर्थः ॥ सज्जीकृतकार्मुकः ॥ ४ ॥ हंसि घा
तयसि एनं हमिति चेत्तत्राह नटवद्वेषमात्रेण नरदेवोसि कर्मणा तु अद्विजः शूद्रः ॥ ५ ॥ अशोच्यान्निरपराधान्
रहसि यस्त्वं प्रहरसि सः शोच्यः सापराधोसि अतो वधमर्हसि ॥ ६ ॥ वृषं प्रत्याह त्वं वा कः स्वयमेव संभावयति

पप्रच्छ रथमारूढः कार्त्तस्वरपरिच्छदं ॥ मेघगंभीरया वाचा समारोपितकार्मुकः ॥ ४ ॥ कस्त्वं मच्छ
रणे लोके बलाद्धंस्यबलान्बली ॥ नरदेवोसि वेषेण नटवत्कर्मणाद्विजः ॥ ५ ॥ कस्त्वं कृष्णे गते दूरं
सहगांडीवधन्वना ॥ शोच्योस्यशोच्यान्रहसि प्रहरन्वधमर्हसि ॥ ६ ॥ त्वं वा मृणालधवलः पादैर्न्यू
नः पदा चलन् ॥ वृषरूपेण किं कश्चिद्देवो नः परिखेदयन् ॥ ७ ॥ न जातु कौरवेंद्राणां दोर्दंडपरिरं
भिते ॥ भूतलेनपतंत्यस्मिन्विना ते प्राणिनां शुचः ॥ ८ ॥ मा सौरभेयात्र शुचो व्येतु ते वृषलाद्भ
यं ॥ मा रोदीरंब भद्रं ते खलानां मयि शास्तरि ॥ ९ ॥ यस्य राष्ट्रे प्रजाः सर्वास्त्रस्यंते साध्व्यसाधुभिः ॥ त
स्य मत्तस्य नश्यंति कीर्त्तिरायुर्भगो गतिः ॥ १० ॥

किं कश्चिद्देवो वृषरूपेणास्मान्परिखेदयन्वर्त्तसे ॥ ७ ॥
दोर्दंडैः परिरंभवत्यतिरक्षिते स्मुचः ॥ अश्रूणि तेन त्वद्विना अन्येषामश्रूणि नानुपतंती खेदहेतुत्वं दर्शितं ॥ ८ ॥ ए
वमुक्ते पुनरपि शोचंतं प्रत्याह भोः सुरभेः पुत्र मा शुच शोकं मा कुरु व्येतु अपयातु गां प्रत्याह अंब मातः शास्तरि नि
यंतरि सति ते भद्रमेव अतो मा रोदीः ॥ ९ ॥ मम हितार्थमेवैनं हनिष्यामि न तत्त्वोपकारायेत्याह यस्येति द्वाभ्यां
हे साध्वि सर्वा या काश्चिदपीत्यर्थः असाधुभिः त्रस्यंते पीड्यंते इत्यर्थः भगो भाग्यं गतिः परलोकः ॥ १० ॥ ७७

तस्य विरहं का वा सहेत प्रेमावलोकश्च रुचिरस्मितं च वल्गुजल्पश्च तैर्मधुमानिनीनां सत्यभामादीनां समा
नं गर्वसहितं स्थैर्यं धैर्यं स्वस्थत्वं यः अहरत् यस्याङ्घ्रिणा रजसि तु स्थितेन विटंकितायाः अलंकृतायाः सस्यादि
लिखेण रोमोत्सवो भवति ॥३७॥ कथयतोः सतोः। प्राचीं पूर्ववाहिनीं कुरुक्षेत्रे इति ॥३८॥ इति प्रथमे षोडशः ॥१६॥

स्य २ का वा सहेत विरहं पुरुषोत्तमस्य प्रेमावलोकरुचिरस्मितवल्गुजल्पैः ॥ स्थैर्यं समानमहर
न्मधुमानिनीनां रोमोत्सवो मम यदङ्घ्रिविटंकितायाः ॥३७॥ तयोरेवं कथयतोः पृथिवीध
र्मयोस्तदा ॥ परीक्षिन्नाम राजर्षिः प्राप्तः प्राचीं सरस्वतीं ॥३८॥ इति श्रीमद्भागवते महापु ना ४
राणे प्रथमस्कंधे षोडशोध्यायः ॥१६॥ सूत उवाच ॥ तत्र गोमिथुनं राजा हन्यमानमनाथवत्
दंडहस्तं च वृषलं ददृशे नृपलांछनं ॥१॥ वृषं मृणालधवलं मेहंतमिव बिभ्यतं ॥ वेपमा
नं पदैकेन सीदंतं शूद्रताडितं ॥२॥ गां च धर्मदुघां दीनां भृशं शूद्रपदाहतां ॥ विवत्सां साश्रुव
दनां क्षामां यवसमिच्छतीं ॥३॥

ततः सप्तदशे राज्ञा कलेर्निग्रह उच्यते ॥ तस्यैवं वीर्यभाजोपि वैराग्यं वक्तुमद्भुतं ॥ हन्यमानं ताड्यमानं ॥१॥
नृपलांछनं नृपचिह्नं कंदः ॥ नद्धु धवलं ॥ भयान्मेहंतं मूत्रयंतं इवेत्यनेन पादावशेषो धर्मो भयान्मूत्रयति
व प्रतिभाति एकेनैव सीयमानः कृशः ॥ तस्यापानि विहात् कंपमान इति दर्शितं ॥२॥ धर्मदुघां हविर्दोग्ध्रीं क्षामां कृशां
यवसं तृणं ॥ अत्रापि सस्यादिप्रसवहेतुयाष्ठिवत्सेव यज्ञाद्यभावात् कृशा अत एव यज्ञभागमिच्छंती पृथ्वीति

आर्त्तानां अभयं यस्मात्तद्वचः वो युक्तं उचितमेव ॥१७॥ न वयं तु यतः पुरुषात् प्राणिनां क्लेशहेतवो भवेयुः
तं पुरुषं न जानीमः यतः वादिनां वाक्यभेदैः विमोहिताः ॥१८॥ वाक्यभेदानेवाह ॥ विकल्पं भेदं वसते आच्छा
दयंति ये योगिनः ते आत्मानं एव आत्मनः प्रभुं सुखदुःखप्रदं आहुः ॥ तदुक्तं आत्मैव ह्यात्मनो बंधुरात्मै
व रिपुरात्मन इति ॥ यद्वा ॥ विकल्पैः कुतर्कैः ॥ प्राकृता नास्तिकाः एवं हि ते वदंति ॥ न तावद्दैवतादीनां प्रभुत्वं

धर्म उवाच ॥ एतद्वः पांडवेयानां युक्तमार्त्ताभयं वचः ॥ येषां गुणगणैः कृष्णो दौत्यादौ भगवान्कृ
तः ॥१७॥ न वयं क्लेशबीजानि यतः स्युः पुरुषर्षभ ॥ पुरुषं तं विजानीमो वाक्यभेदविमोहिताः ॥१८॥
केचिद्विकल्पवसना आहुरात्मानमात्मनः ॥ दैवमन्ये परे कर्म स्वभावमपरे प्रभुं ॥१९॥ अप्रत
र्क्यादनिर्देश्यादिति केष्वपि निश्चयः ॥ अत्रानुरूपं राजर्षे विमृश स्वमनीषया ॥२०॥ सूत उवा
च ॥ एवं धर्मे प्रवदति स सम्राट् द्विजसत्तम ॥ समाहितेन मनसा विखेदः पर्यचष्ट तम् ॥२१॥

कर्माधीनत्वात् ॥ न च कर्मणः स्वाधीनत्वात् ॥ अतः स्वयमेव प्रभुः न चान्यः कश्चिदिति ॥ अन्ये दैवज्ञाः दैवं
ग्रहादिरूपं दैवतं ॥ परे तु मीमांसकाः कर्म ॥ अपरे लोकायतिकाः स्वभावं ॥१९॥ केष्वपि सेश्वरेष्वपि इति
दुर्ज्ञेयत्वं दर्शितं ॥ निश्चय इति सिद्धांतः ॥ अप्रतर्क्यात् मनोऽगोचरात् ॥ अनिर्देश्यात् वचनागोचरत्वात्
परमेश्वरात्सर्वं भवतीति विमृशस्व विचारयस्व बुद्ध्या ॥२०॥ विखेदः गतमोहः ॥ पर्यचष्ट प्रत्यभाषत

११॥ पुनरतिशोचंतं वृषभं प्रत्याह ॥ कः अवृश्चत्तच्छिच्छेद त्वद्विधा दुःखिताः ॥१२॥ वो भद्रमस्तु आ
त्मनस्तव पादछेदेन वैरूप्यं कृतवंतं कीर्त्तिं दूषयंतीति तथा तं आख्याहि ॥ध॥ ननु तद्व्याख्याने कृते कथं
भद्रं स्यादित्यत आह ॥ यस्मादनागसि जने यः अघं दुःखं युंजन् कुर्वन् भवति ॥ अस्य एवंभूतस्य सत्तः सकी

एष राज्ञः परो धर्मो ह्यार्त्तानामार्त्तिनिग्रहः ॥ अत एनं वधिष्यामि भूतद्रुहमसत्तमं ॥११॥ को
ऽवृश्चत्तव पादांस्त्रीन्सौरभेय चतुष्पद ॥ मा भूवंस्त्वादृशा राष्ट्रे राज्ञां कृष्णानुवर्त्तिनां ॥१२॥ आ
ख्याहि वृषभ द्रं वः साधूनामकृतागसां ॥ आत्मवैरूप्यकर्त्तारं पार्थानां कीर्त्तिदूषणं ॥१३॥ ज
नेनागस्यघं युंजन् सर्वतोऽस्य च मद्भयं ॥ साधूनां भद्रमेव स्यादसाधुदमने कृते ॥१४॥ अना
गस्विह भूतेषु य आगस्कृन्निरंकुशः ॥ आहर्त्तास्मि भुजं साक्षादमर्त्यस्यापि सांगदं ॥१५॥ राज्ञो
हि परमो धर्मः स्वधर्मस्थानुपालनं ॥ शासतोऽन्यान्यथाशास्त्रमनापद्युत्पथानिह ॥१६॥ ॥ ऽऽ

ग्नात् सर्वत्रापि भयं भवति ॥ ततः साधूनां भद्रं भवेदिति ॥१४॥ एतस्य दंडे अहं असमर्थः इति माशंकीः इत्या
ह ॥ आगस्कृत् अपराधकर्त्ता तस्य अमर्त्यस्यापि भुजं आहर्त्तास्मि आहरिष्यामि ॥ सांगदमित्यनेन मूलत उ
त्पाट्याहरिष्यामीति दर्शितं ॥१५॥ नन्वेकस्य निग्रहेणान्यस्यानुग्रहे तव किं प्रयोजनं ॥ तत्राह राज्ञो हीति ॥

अन्यान् ॥ अधर्मिष्ठान् शासतो दंडयतः ॥१६॥

भा० प्र०
१७६

न्यासितः ॥ अन्योन्यखुरेणावनारितः ॥ उरुभारो येयस्याः ॥ कृतं कौतुकं मंगलं यस्याः ॥२६॥ अश्रूणि कल
यति मुंचतीति अश्रुकला तेन न त्यक्ता सती शूद्रा भोक्ष्यंति मामिति शोचति ॥२७॥ निशातं निशितं अध
र्मस्य हेतुः यः कलिस्तं हंतुमित्यर्थः ॥२८॥ अभिप्रेत्य ज्ञात्वा ॥२९॥ शरण्य आश्रयार्हः ॥३०॥ गुडाकेशोऽर्जुनः

कि २

इयं च भूर्भगवता न्यासितोरुभरा सती ॥ श्रीमद्भिस्तत्पादन्यासैः सर्वतः कृतकौतुका ॥२६॥ शो
चत्यश्रुकला साध्वी दुर्भगेवोज्झिता धुना ॥ अब्रह्मण्या नृपव्याजाः शूद्रा भोक्ष्यंति मामिति ॥२७॥ सू
त उवाच ॥ इति धर्मं महीं चैव सांत्वयित्वा महारथः ॥ निशातमाददे खड्गं कलयेऽधर्महेतवे ॥२८॥
तं जिघांसुमभिप्रेत्य विहाय नृपलांछनं ॥ तत्पादमूलं शिरसा समगाद्भयविह्वलः ॥२९॥
पतितं पादयोर्वीरः कृपया दीनवत्सलः ॥ शरण्यो नावधीच्छ्लोक्य आह चेदं हसन्निव ॥३०॥ रा
जोवाच ॥ न ते गुडाकेशयशोधराणां बद्धांजलेर्वै भयमस्ति किंचित् ॥ न वर्तितव्यं भवता कथं
चन क्षेत्रे मदीये त्वमधर्मबंधुः ॥३१॥ त्वां वर्तमानं नरदेवदेहेष्वनुप्रवृत्तोऽयमधर्मपूगः ॥ लोभोऽनृतं
चौर्यमनार्यमंहो ज्येष्ठा च माया कलहश्च दंभः ॥३२॥

तस्य यशोधराणामेव वयं तेषां तान्प्रति बद्धांजलिर्येन तस्य ते ॥ किंतु कथंचन केनाप्यंशेन न वर्तितव्यं ॥ अयं
लोको न व्यापनीयः ॥ यस्मात्त्वमधर्मस्य बंधुः ॥३१॥ नरदेवाह राजदेहेषु वर्तमानं त्वामनुवर्त्ततः प्रवृत्तः
अनार्यं शौर्जन्यम् ॥ अंहः स्वधर्मत्यागः ॥ ज्येष्ठा अलक्ष्मीः माया कपटम् ॥३२॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ॥ ऽऽ

७६

अनिर्द्दिष्टारितमिव ब्रुवन् घातकं ज्ञानन्नपि न वदेत् न सूचयेदित्येवं धर्मं ब्रवीषि ॥ अतो धर्मोसि ॥ सूचने
कोदोष इत्यत आह ॥ यदिति ॥ स्थानं नरकादि ॥ २२ ॥ यद्वा अज्ञानादप्यकथनं भवतीत्याह ॥ अथवेति ॥ दे
वस्य मायाया गतिर्विध्यघातकलक्षणा वृत्तिः भूतानां चेतसो वचसश्चागोचरा सुज्ञेया न भवतीति निश्च
यः ॥ २३ ॥ धर्मोसावितिज्ञात्वा तस्य पादाननुवादेन व्यवस्थामाह ॥ तप इति द्वाभ्यां ॥ अधर्मांशैस्तव त्रयः पादास्त्रि

राजोवाच ॥ धर्मं ब्रवीषि धर्मज्ञ धर्मोसि वृषरूपधृक् ॥ यदधर्मकृतः स्थानं सूचकस्यापि तद्भ
वेत् ॥ २२ ॥ अथवा देवमायाया नूनं गतिरगोचरा ॥ चेतसो वचसश्चापि भूतानामिति निश्चयः
॥ २३ ॥ तपः शौचं दयासत्यमिति पादाः प्रकीर्त्तिताः ॥ अधर्मांशैस्त्रयो भग्नाः स्मयसंगमदैस्तव ॥
॥ २४ ॥ इदानीं धर्म पादस्ते सत्यं निर्वर्त्तयेद्यतः ॥ तं जिघृक्षत्यधर्मोयमनृतेनैधितः कलिः ॥ २५ ॥

भिरंशैर्भग्नाः स्मयो विस्मयः ॥ २४ ॥ इदानीं कलौ हे धर्म ते पादश्चतुर्थांशः तत्रापि सत्यमेवास्ति ॥ यतः स
त्यादेवात्मानं निवर्त्तयेत् कथंचिद्धारयेत् ॥ यद्वा ॥ पुरुषस्त्वां साधयेत् तमपि पादं अनृतेन संवर्द्धितः
कलिरूपोयमधर्मो ग्रहीतुमिच्छति ॥ तत्रेयं स्थितिः कृतयुगे प्रथमं संपूर्णश्चतुष्पाद्धर्मः ॥ त्रेतायां चतु
र्णामपि पादानां मध्ये स्मयेन तपः संगेन शौचं मदेन दया ॥ अनृतेन सत्यं इत्येवं चतुर्थांशो हीयते द्वा
परे त्वर्द्धं ॥ कलौ चतुर्थांशोऽवशिष्यते ॥ सोप्यनृतेन नश्यतीति ॥ २५ ॥

भा० प्र०
८०

पानं मद्यादेः॥ सूना प्राणिवधः॥ द्यूते अनृतं॥ पाने मदः॥ सर्वं मदो दयानाशकत्वेनोक्तः॥ अत्र तु गर्वद्वारा तयोर्नाशकत्वेन स्त्रीषु संगः॥ हिंसायां क्रौर्यं दयानाशकमिति ज्ञेयं॥ यद्यपि सर्वं सर्वत्र संभवति॥ तथापि प्राधान्येनानृतादीनां दानादिषु यथासंख्यं ज्ञेयं॥ द्वादशस्कंधे तु सत्यं दया तपो दानमिति पादा वि भोर्नेपेत्यत्र दानशब्देन शौचमेवोक्तं मनःशुद्धिरूपत्वादन्नाभयप्रदानस्येति॥ त्रेतायां धर्मपादानां तुर्यां

सूत उवाच॥ अभ्यर्थितस्तदा तस्मै स्थानानि कलये ददौ॥ द्यूतं पानं स्त्रियः सूना यत्राधर्मश्चतुर्विधः॥ ३८॥ पुनश्च याचमानाय जातरूपमदात्प्रभुः॥ ततोऽनृतं मदं कामं रजो वैरं च पंचमं॥ ३९॥ अमूनि पंच स्थानानि ह्यधर्मप्रभवः कलिः॥ औत्तरेयेण दत्तानि न्यवसत्तन्निदेशकृत्॥ ४०॥ अथैतानि न सेवेत बुभूषुः पुरुषः क्वचित्॥ विशेषतो धर्मशीलो राजा लोकपतिर्गुरुः॥ ४१॥ वृषस्य नष्टांस्त्रीन्पादान्तपः शौचं दयामिति॥ प्रतिसंदध आश्वास्य महीं च समवर्धयत्॥ ४२॥

शोहीयनेपानेरधर्मपादैरनृतहिंसासंतोषविग्रहैरित्यत्र च असंतोषशब्देन तत्स्यहेतुर्गर्वो लक्ष्यते॥ विग्रहशब्देन च तद्धेतुः स्त्रीसंगः रस्य विशेषः॥ ३८॥ चतुर्विधस्यापि कलेर्वावस्थानं देहीति पुनर्याचमानाय जातरूपं सुवर्णं ददौ॥ ततः सुवर्णदानात्॥ अनृतं मदं काममिति स्त्रीसंगरजः इति रजोमूलो हिंसा एतानि चत्वारि वैरं चाद्यादिति स वधः॥ ३९॥ अमूनीति अमूषु स्थानेषु न्यवसदित्यर्थः॥ ४०॥ अथैतेति हेतोः॥ बुभूषुः॥ भूतिं विभूतिमिच्छुः॥ स्त्रीसुवर्णयोरसेवनं नामतयोरनाशक्तिः॥ ४१॥ एवं कलिं निगृह्य वृषस्य पादान् प्रतिसंदधे॥ तपआ

तत्तस्माद्वर्त्तितव्योवर्त्तितुमर्हेवब्रह्मावर्त्तेदेशेनवर्त्तितव्यंयत्तस्यवितानंविस्तारस्तत्रविज्ञाःनिपुणाः॥३३॥
इज्यायागस्तद्रूपामूर्त्तिर्यस्य॥अंशेनेमंकामांश्चनन्विंद्रादयोदेवाइज्यंतेनतुहरिस्तत्राह॥एषस्थावरादि
नामात्मेति॥तथापिजीववत्तत्परिछिन्नइत्याह॥अंतर्वहिरितियथावायुःप्राणरूपेणांतःस्थोपि॥वहिरप्य
स्तेनद्रुत॥सर्वांतर्यामीश्वरोपीति॥३४॥उद्यतासिं॥उद्गतखड्गं॥दंडपाणिंयमं॥उद्यतं॥उद्युक्तं॥३५॥अत्रनव

नवर्त्तितव्यंतदधर्मबंधोधर्मेणसत्येनचवर्त्तितव्ये॥ब्रह्मावर्त्तेयत्रयजंतियज्ञैर्यज्ञेश्वरंय
ज्ञवितानविज्ञाः॥३३॥यस्मिन्हरिर्भगवानिज्यमानइज्यात्ममूर्त्तिर्यजतांशंतनोति॥कामान
मोघान्स्थिरजंगमानामंतर्वहिर्वायुरिवेषआत्मा॥३४॥सूतउवाच॥परीक्षितैवमादिष्टःसकलि
९४ र्जातवेपथुः॥तमुद्यतासिमाहेदंदंडपाणिमिवोद्यतं॥३५॥कलिरुवाच॥यत्रक्वचनवत्स्यामि
सार्वभौमतवाज्ञया॥लक्षयेतत्रतत्रापित्वमात्तेषुशरासनं॥३६॥तन्नोधर्मभृतांश्रेष्ठस्थानंनि
र्देष्टुमर्हसि॥यत्रैवनियतोवत्स्यआतिष्ठंस्तेनुशासनं॥३७॥

स्तथ्यमितियात्तवाज्ञातयायत्रक्वापिवत्स्यामि॥किंतुतत्रतत्रापि॥आत्तःगृहीतःइषुःशरास
नंचयेनतं॥त्वामेलक्षये॥३६॥तत्रतस्मान्नियतोनिश्चलोवत्स्यामि॥३७॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ॥ ऽऽ

भा० प्र०
॥८१॥

किंतु उत्सृज्येति॥ वैयासकेः शुकस्य शिष्यः सन्विज्ञाता अजितस्य हरेः संस्थितिस्तत्त्वं येन सः॥३॥ न
चैतच्चित्रमित्याह॥ उत्तमश्लोकस्यैव वार्त्ता येषु॥ अत एव नित्यं तत्कथारूपं अमृतं जुषतां संभ्रमो न स्यात्
४ तस्मिन्राज्ञि स्थिते सति तन्न चित्रं इत्याशयेनाह॥ तावदिति॥ अभिमन्योः पुत्रः॥ एकराट् चक्रवर्ती ईशः
पतिः तावत्॥५॥ ननु तदा कलेः प्रवेश एवास्तु प्रविष्टोपि न प्रभवेदिति कुतस्तत्राह॥ यस्मिन्नहनि यर्हि य

उत्सृज्य सर्वतः संगं विज्ञाताजितसंस्थितिः॥ वैयासकेर्जहौ शिष्यो गंगायां स्वं कलेवरं॥३॥ नो
त्तमश्लोकवार्त्तानां जुषतां तत्कथामृतं॥ स्यात्संभ्रमोंऽतकालेपि स्मरतां तत्पदांबुजं॥४॥ तावत्क
लिर्न प्रभवेत्प्रविष्टोपीह सर्वतः॥ यावदीशो महानुर्व्यां आभिमन्यव एकराट्॥५॥ यस्मिन्नह
नि यर्ह्येव भगवानुत्ससर्ज गां॥ तदैवेहानुवृत्तोसावधर्मप्रभवः कलिः॥६॥ नानुद्वेष्टि कलिं
सम्राट् सारंग इव सारभुक्॥ कुशलान्याशु सिध्यंति नेतराणि कृतानि यत्॥७॥ ॥ऽऽ॥

स्मिन्नेव क्षणे गां पृथ्वीं अनुवृत्तः प्रविष्टः॥ अधर्मस्य प्रभवो यस्मिन्॥६॥ ननु अधर्महेतुं कलिं सर्वथा
किं न हतवान् तत्राह॥ नानुद्वेष्टीति॥ सारंगो भ्रमर इव सारग्राही॥ सारमाह॥ यद्यस्मिन् कुशलानि पु
ण्यानि आशु संकल्पमात्रेण फलंति इतराणि पापानि आशु न सिध्यंति॥ यतस्तानि कृतान्येव सिध्यं॥ न

॥८१॥

युष्मदीयसत्रप्रवृत्तिरपितत्प्रभावादेवेत्याह ॥ एतर्हिइदानींयुधिष्ठिरेराज्ञारण्यंप्रवेष्टुमिच्छताउपन्यस्तंसम
र्पितंआसनमध्यास्ते ॥ ४३ ॥ अधुनापालयतइतिवर्त्तमानसामीप्येवर्त्तमानवन्निर्देशः ॥ सेत्यध्याहारोवा
॥ ४४ ॥ सत्रायसत्रंकर्त्तुंदीक्षिताःदीक्षांकृतवंतः ॥ ४५ ॥ इतिप्रथमेसप्तदशः ॥ १७ ॥ राज्ञस्त्वष्टादशेतस्यब्रह्मशा

सएषएतर्ह्यध्यास्तआसनंपार्थिवोचितं ॥ पितामहेनोपन्यस्तंराज्ञारण्यंविविक्षता ॥ ४३ ॥ आस्ते
धुनासराजर्षिःकौरवेंद्रश्रियोल्लसन् ॥ गजाह्वयेमहाभागश्चक्रवर्त्तीबृहच्छ्रवाः ॥ ४४ ॥ इत्थंभूता
नुभावोयमभिमन्युसुतोनृपः ॥ यस्यपालयतःक्षोणींयूयंसत्रायदीक्षिताः ॥ ४५ ॥ इतिश्रीमद्भा
गवतेमहापुराणेप्रथमस्कंधेसप्तदशोध्यायः ॥ १७ ॥ सूतउवाच ॥ योवैद्रौण्यस्त्रविप्लु
ष्टोनमातुरुदरेमृतः ॥ अनुग्रहाद्भगवतःकृष्णस्याद्भुतकर्मणः ॥ १ ॥ ब्रह्मकोपोत्थिताद्यस्तु
तक्षकात्प्राणविप्लवात् ॥ नसंमुमोहोरुभयाद्भगवत्यर्पिताशयः ॥ २ ॥ ॥ ऽऽ ॥ ऽऽ ॥

पोनिरूप्यते ॥ सचानुग्रहएवास्यजातोवैराग्यमावहन् ॥ परीक्षितोनिर्याणमत्याश्चर्यवत्कृतंतत्संभाव
नायजन्माश्चर्यमनुस्मारयति ॥ योवाइति ॥ विप्लुष्टोनिर्दग्धःसः ॥ १ ॥ ब्रह्मकोपादुत्थितात्तक्षकात् यः
प्राणविप्लवःप्राणनाशउरुभयंतस्मान्नसंमुमोह ॥ अत्रहेतुः यस्तुभगवत्यर्पिताशयइति ॥ २ ॥ राम

भगवत्संगिनो विष्णुभक्ताः तेषां संगस्य यो लवः ‖ अत्यल्पकालः तेनापि स्वर्गं न तुलयाम ‖ सममपि न प
श्याम न चापवर्गं संभावना यां लोके ‖ मर्त्यानां तुच्छा आशिषो राज्याद्या न तुलयाम इति किमु वक्तव्यं ‖ १३
एवं सत्संगमभिनंद्य श्रवणौत्सुक्यमाविःकुर्वंति ‖ को नामेति ‖ रसवित् रसज्ञः ‖ महत्तमानामेकांतेन परं
अयनं ‖ आश्रयो यः तस्य कथायां अगुणस्य ‖ प्राकृतगुणरहितस्य कल्याणगुणानामंतं ‖ ये योगेश्वराः ते

तुलयाम लवेनापि न स्वर्गं नापुनर्भवं ‖ भगवत्संगिसंगस्य मर्त्यानां किमुताशिषः ‖ १३ ‖ को नाम तृ
प्येद्रसवित्कथायां महत्तमैकांतपरायणस्य ‖ नांतं गुणानामगुणस्य जग्मुर्योगेश्वरा ये भवपाद्म
मुख्याः ‖ १४ ‖ तन्नो भवान्वै भगवत्प्रधानो महत्तमैकांतपरायणस्य ‖ हरेरुदारं चरितं विशुद्धं शुश्रूष
तां नो वितनोतु विद्वन् ‖ १५ ‖ स वै महाभागवतः परीक्षिद्येनापवर्गाख्यमदभ्रबुद्धिः ‖ ज्ञानेन वैयास
किशब्दितेन भेजे खगेंद्रध्वजपादमूलं ‖ १६ ‖

पि न जग्मुः एतावंत इति न परिगणयां चक्रुः ‖ भवः शि
वः पाद्मो ब्रह्मा च मुख्यौ येषां ते ‖ १४ ‖ नोऽस्माकं मध्ये भगवान् प्रधानम् ‖ सेव्यो यस्य सः ‖ भवान् शुश्रू
षतां हरेश्चरितं विस्मारयतु ‖ १५ ‖ तच्च शुकपरीक्षित्संवादेन कथयेत्याह ‖ स वा इति द्वाभ्याम्
वैयासकिना शब्दितेन कथितेन ‖ ज्ञानेन ज्ञानसाधनेन ‖ अपवर्ग इत्याख्या यस्य तत्र ‖ खगेंद्रध्व
जस्य हरेः पादमूलं भेजे ‖ १६ ‖ ॥ श्रीरामाय नमः ‖ ॥ श्री हरये नम ॥ ‖ श्री गोपालो जयति ८२

ननु हेषाधिकात् हेष एव पुक्तः॥ न धीरेषु तस्याः किंचित्करत्वादित्याह॥ किंतु तेन भवेत्॥ बालेषु अधी
रेषु अप्रमत्तः अवहितः सन् योऽवकइव वर्त्तते॥ ८॥ पारीक्षितमाख्यातं॥ अपृच्छत॥ पृष्टवंतो यूयं॥ धी
किं॥ वक्तृ नानरैरेतावदेव कर्त्तव्यमिति सर्वशास्त्रसारं कथयति॥ याया इति॥ कथनीयानि उरूणि कर्माणि
यस्य तस्य गुणकर्मविषयासु भूषुभिः॥ सद्भावमिच्छद्भिः॥ १०॥ पुनर्विस्तरेण कथनार्थी। स्तौति किं॥ तत्संग

किंनु बालेषु शूरेण कलिना धीर भीरुणा॥ अप्रमत्तः प्रमत्तेषु यो वृको नृषु वर्त्तते॥ ८॥
उपवर्णितमेतद्वः पुण्यं पारीक्षितं मया॥ वासुदेवकथोपेतमाख्यानं यदपृच्छत॥ ९॥ यायाः
कथा भगवतः कथनीयोरुकर्मणः॥ गुणकर्माश्रयाः पुंभिः संसेव्यास्ता बुभूषुभिः॥ १०॥
ऋषय ऊचुः॥ सूत जीव समाः सौम्य शाश्वतीर्विशदं यशः॥ यस्त्वं शंससि कृष्णस्य मर्त्यानाम
मृतं हि नः॥ ११॥ कर्मण्यस्मिन्ननाश्वासे धूमधूम्रात्मनां भवान्॥ आपाययति गोविंदपादप
द्मासवं मधु॥ १२॥

चाभिनंदंति॥ सूतेति त्रिभिः॥ शाश्वतीः समाः॥ अनंता वत्सरान् जीव अत्यंत योग्यो हि तीया॥ यतस्त्वं श्रीकृष्ण
स्य विशुद्धं यशः कीर्त्तयसि॥ तच्चास्माकं मर्त्यानाममृतं॥ मरणनिवर्त्तकं च॥ ११॥ अस्मिन्कर्मणि सत्रे अ
नाश्वासे॥ अविश्वसनीये॥ वैगुण्यबाहुल्येन फलनिश्चयाभावात्॥ धूमेन धूम्रो विवर्णः आत्मा शरीरं
एषां तान्॥ अस्मात्कर्मणि षष्ठी॥ आसवं मकरंदं मधु मधुरसं॥ १२॥ ॥ ॥ऽऽ ॥ऽऽ ॥ऽऽ ॥॥ऽऽ

भा॰ पु॰ एतत्त्रयं पंचयतित्रिभिः॥ एतावतेति तस्य यद्साम्यमनतिशायनं च गुणैस्तत्साम्यं तदाधिकंवाना
८३ स्तीत्यस्यार्थस्यपूर्त्तोते एतावतासूचितेनमलंपर्य्याप्तंकस्तच्छिस्तरतोवक्तुंप्राप्नोति॥ तदेवाहरत्नरान्
ब्रह्मादीन्प्रार्थयमानान्हित्वाविभूतिःश्रीः॥ अनभीप्सोरपि यस्याङ्घ्रिरेणुंसेवतइति॥२०॥ अर्थेत्य
र्थांतरे॥ यस्यपादनखाद्वसृष्टंतीर्थंतत्तपिविरिंचेनोपहृतंसमर्पितंअर्हणंभः॥ अघोदकंईश
सहितंजगत्पुनाति॥ विरिंच्योपहृतंसेशमितिचत्नयोरप्युपासकत्वमुक्तं॥ तस्मान्मुकुंदव्यतिरिक्तःकोनो

एतावतालंननुसूचितेनगुणैरसाम्यानतिशायनस्य॥ हित्वेतरान्प्रार्थयतोविभूतिर्यस्यां
घ्रिरेणुंजुषतेनभीप्सोः॥२०॥ अथापियत्पादनखावसृष्टंजगद्विरिंचोपहृतार्हणांभः॥ सेशंपु
नात्यन्यतमोमुकुंदात्कोनामलोकेभगवत्पदार्थः॥२१॥ यत्रानुरक्ताःसहसैवधीराव्यपोह्यदेह
दिषुसंगमूढं॥ व्रजंतियत्पारमहंसमंत्यंयस्मिन्नहिंसोपशमःस्वधर्मः॥२२॥ अहंहिपृष्टोर्यम
णोभवद्भिराचक्ष्यआत्मावगमोत्रयावान्॥ नभःपतंत्यात्मसमंपतत्रिणस्तथासमंविष्णुगतिंविप
श्चितः॥२३॥

नभगवत्पदस्यार्थः॥२१॥ धीराःसंतःऊढंध्रुतं॥ अंत्यंपरमकाष्ठापन्नंतदाह॥ यस्मिन्न
हिंसाउपशमश्चस्वाभाविकोधर्मः॥२२॥ एवंस्वभाग्यमभिनंद्यपारीक्षितोपाख्यानंवक्तुमाह॥ अहंहीति॥ अ
र्यमणः॥ हेसूर्य्योः॥ त्रयीमूर्त्तयः॥ अत्रयावानात्मावगमःममज्ञानंतावत् आचक्ष्येप्रवक्ष्यामि॥ तथाहि॥ पत
णोनभआत्मसमंस्वशक्त्यनुरूपमेवउत्पतंतीतिनकृत्स्नं॥ तथाविपश्चितोपिविष्णोर्गतिंलीलांसमंस्वमत्यनु

कपिलवदेवतिसंति:॥१८॥

८३

तत्र असंवृतार्थं । यथा तथा आख्याहि । तदेव निर्दिशति । परीक्षिते कथितं पारीक्षितं आख्यानं श्रीभागवतं पुरा
णं परं पुण्यं सत्वशोधकं । अत्यद्भुते योगे निष्ठा यस्य । अनंतस्याचरितैः उपपन्नं युक्तं । अत एव भागवतानां अ
भिरामं प्रियं एतैर्विशेषणैः कर्मज्ञानभक्तियोगप्रकाशकत्वं दर्शितं ॥ १७ ॥ श्रीभागवतव्याख्याने लब्धप्रसंगे
महत्तमादरपात्रमात्मानं श्लाघते द्वाभ्यां । अहो इत्याश्चर्ये हरेति हर्षे वयमिति बहुवचनं श्लाघायां प्रतिलो
मजा अपि वयं जन्मभृतः सफलजन्मानः आस्म जाताः । वृद्धानामनुवृत्त्या आदरेण ज्ञानवृद्धः शुकः त

तन्नः परं पुण्यमसंवृतार्थं आख्यानमत्यद्भुतयोगनिष्ठं । आख्याह्यनंताचरितोपपन्नं पारीक्षि
ते भागवताभिरामं ॥ १७ ॥ सूत उवाच ॥ अहो वयं जन्मभृतोऽद्य हास्म वृद्धानुवृत्त्यापि विलोम
जाताः ॥ दौःकुल्यमाधिं विधुनोति शीघ्रं महत्तमानामभिधानयोगः ॥ १८ ॥ कुतः पुनर्गृणतो
नाम तस्य महत्तमैकांतपरायणस्य । योऽनंतशक्तिर्भगवाननंतो महद्गुणत्वाद्यमनंतमाहुः ॥ १९ ॥

स्य सेवयेति वा । यतो दुःकुलत्वं तन्निमित्तं आधिं मनःपीडां महत्तमानां अभिधानयोगः । लौकिकोपि संभाषण
संबंधः । विधुनोति । अपनयति ॥ १८ ॥ कुतः पुनः किं पुनर्वक्तव्यं । तस्य नाम गृणतः पुंसो महत्तमानामभिधान
योगो दौःकुल्यं विधुनोतीति । यद्वा नाम गृणतः कुतः दौःकुल्यमिति । यद्वा पुंसः तस्य नाम गृणतः दौःकु
ल्यं विधुनोतीति किं वक्तव्यमिति कैमुत्यमेवाह । अनंताः शक्तयो यस्य सतोऽप्यनंतः । किंच महत्सु गुणेषु यस्य
महद्गुणस्तस्य भावस्तस्मात् । यं गुणतोऽप्यनंतमाहुः ॥ १९ ॥ श्री ॥ ॥ ऽऽ ॥ ऽऽ ॥ ॥ ७ ॥ ॥ ऽऽ ॥

भा० प्र०
८४

तस्य पुत्रः शृंगी नाम तेजस्वी तपोबलसंपन्नः ॥ अघं दुःखं तत्र अर्भकमध्ये ॥ ३२ ॥ पालानां राज्ञां पीत्रां पुष्टा
नां अधर्ममेव निर्दिशति ॥ स्वामिनि द्रासानां यदघं पापाचरणं बलिभुजां काकानां शुनामिवचेति ॥ ३३ ॥ दास
विदर्शयति ब्राह्मणौ रिति ॥ स भांडं भांडएव स्थितं ॥ ३४ ॥ तेन्न दनं तरमदं शास्मि दंडयामि ॥ ३५ ॥ इति व

अ २

तस्य पुत्रो ऽतितेजस्वी विहरन्बालकोऽर्भकैः ॥ राज्ञाघं प्रापितं तातं श्रुत्वा तत्रेदमब्रवीत् ॥ ३२ ॥ अ
हो ऽधर्मपालानां पीत्रां बलिभुजामिव ॥ स्वामिन्यघं यद्दासानां द्वारपानां शुनामिव ॥ ३३ ॥ ब्राह्मणैः
क्षत्रबंधुर्हि द्वारपालो निरूपितः ॥ स कथं तद्गृहे द्वास्थः सभांडं भोक्तुमर्हति ॥ ३४ ॥ कृष्णे गते भ
गवति शास्तर्युत्पथगामिनां ॥ तद्भिन्नसेतूनद्याहं शास्मि पश्यत मे बलं ॥ ३५ ॥ इत्युक्त्वा रोषताम्रा
क्षो वयस्यानृषिबालकान् ॥ कौशिक्याप उपस्पृश्य वाग्वज्रं विससर्ज ह ॥ ३६ ॥ इति लंघितमर्या
दं तक्षकः सप्तमेऽहनि ॥ दंक्ष्यति स्म कुलांगारं चोदितो मे ततद्रुहं ॥ ३७ ॥ ततोऽभ्येत्याश्रमं बालो गलेस
र्पकलेवरं ॥ पितरं वीक्ष्य दुःखार्तो मुक्तकंठो रुरोद ह ॥ ३८ ॥ वयस्यानुक्त्वा रोषेण ताम्रेक्षणीयस्य कौशिकी
नदी तस्याः अपः संधिराषेः वाग्वज्रं शापं ॥ ३६ ॥ इति एवं सर्पनिक्षेपेण तं दंक्ष्यति भक्षयिष्यति पावं
तरे भस्मीकरिष्यति स्मेति पारदपूरणे कुलस्यांगारं तुल्यं मे मया ततेति द्रुहं स्वमार्षं ॥ ३७ ॥ गले सर्पकलेवरं

२४ ॥ अवस्त्राणः अपश्यन् तं प्रसिद्धमाश्रमं ॥ तस्मिन् मुनिं शमीकं ॥ २५ ॥ प्रतिरुद्धाः प्रत्याहृता इंद्रियादयो ये
न अत एव उपरतं ॥ स्थानत्रयात् जाग्रदादिलक्षणात् ॥ परं तुरीयं पदं प्राप्तं ॥ अत एव ब्रह्मभूतत्वात् अविक्रि
यं ॥ २६ ॥ विप्रकीर्णाभिर्जटाभिराच्छन्नं रुरुर्मृगविशेषः ॥ तस्य चर्मणा आच्छन्नं विशेषेण शुष्यत्तालुर्यस्य सः त

एकदा धनुरुद्यम्य विचरन्मृगयां वने ॥ मृगाननुगतः श्रांतः क्षुधितस्तृषितो भृशं ॥ २४ ॥ जला
शयमचक्षाणः प्रविवेश तमाश्रमं ॥ ददर्श मुनिमासीनं शांतं मीलितलोचनं ॥ २५ ॥ प्रतिरु
द्धेंद्रियप्राणमनोबुद्धिमुपारतं ॥ स्थानत्रयात्परं प्राप्तं ब्रह्मभूतमविक्रियं ॥ २६ ॥ विप्रकीर्णज
टाच्छन्नं रौरवेणाजिनेन च ॥ विशुष्यत्तालुरुदकं तथाभूतमयाचत ॥ २७ ॥ अलब्धतृणभूम्या
दिरसंप्राप्तार्घसूनृतः ॥ अवज्ञातमिवात्मानं मन्यमानश्चुकोप ह ॥ २८ ॥ अभूतपूर्वः सह
सा क्षुत्तृड्भ्यामर्दितात्मनः ॥ ब्राह्मणं प्रत्यभूद्ब्रह्मन्मत्सरो मन्युरेव च ॥ २९ ॥ स तु ब्रह्मऋषेरंसे
गतासुमुरगं रुषा ॥ विनिर्गच्छन्धनुष्कोट्या निधाय पुरमागमत् ॥ ३० ॥ एष किं निभृताशेषकर
णो मीलितेक्षणः ॥ मृषासमाधिराहोस्वित्किन्नु स्यात्क्षत्रबंधुभिः ॥ ३१ ॥

थाभूतं मुनिं ॥ २७ ॥ न लब्धं तृणं तृणासनं भूमिरुपवेशस्थानं च येन सः ॥ न संप्राप्तोऽर्घः सूनृतं प्रियवचनं च
येन सः ॥ २८ ॥ मत्सरः स्वदुःखोत्कर्षासहनं ॥ २९ ॥ गतासुं मृतं धनुष्कोट्या चापाग्रेण ॥ ३० ॥ सर्पनिधाने अभिप्रायमा
ह ॥ एष किं प्रत्याहृतसर्वेन्द्रियः सन्मीलितेक्षणः स्थितः ॥ यद्वा ॥ क्षत्रबन्धुभिरागतैर्गतैर्वा किं नु स्यादित्यवज्ञया

भा०प्र० आर्य्यधर्मः सदाचारः ॥ शुनां कपीनामिव चार्थकामयोरेवाभिनिवेशितचित्तानां ॥ ६५ ॥ एवं राजमात्र
८५ स्य पापान ईदृशमुक्त्वा प्रस्तुते विशेषमाह ॥ धर्मपाल इति सार्द्धेन हयमेधराट् अश्वमेधयाजी ।
६६ ॥ ६७ ॥ अस्य महापापस्यान्यत् प्रायश्चित्तमदृष्ट्वा पापमावेदयन् भगवंतं प्रार्थयते ॥ अपापेष्विति ॥ ६८

तदार्यधर्मश्च विलीयते नृणां वर्णाश्रमाचारयुतस्त्रयीमयः ॥ नृत्तोर्थकामाभिनिवेशितात्मनां
शुनां कपीनामिव वर्णसंकरः ॥ ६५ ॥ धर्मपालो नरपतिः स तु सम्राट् बृहच्छ्रवाः ॥ साक्षान्महाभ
गवतो राजर्षिर्हयमेधराट् ॥ ६६ ॥ दुरुत्तरश्रमयुक्तो दीनो नैवास्मच्छापमर्हति ॥ ६७ ॥ अपापेषु
गः४ स्वभृत्येषु बालेनापक्वबुद्धिना ॥ पापं कृतं तद्भगवान्सर्वात्मा क्षंतुमर्हति ॥ ६८ ॥ तिरस्कृता विप्रल
ब्धाः शप्ताः क्षिप्ता हता अपि ॥ नास्य तत्प्रतिकुर्वंति तद्भक्ताः प्रभवोपि हि ॥ ६९ ॥ इति पुत्रकृता
घेन सोऽनुतप्तो महामुनिः ॥ स्वयं विप्रकृतो राज्ञा नैवाघं तदचिंतयत् ॥ ७० ॥

राजा चेत्प्रतिशापं दद्यात् तर्हि निःकृतिर्भवेत् ॥ अपि तत्तु न संभवति ॥ तस्य महाभागवतत्वादित्या
ह ॥ तिरस्कृताः निंदिताः ॥ विप्रलब्धा वंचिताः ॥ क्षिप्ता अवज्ञाताः हतास्ताडिताः अस्य तिरस्कारादिक
र्तुः न तत्प्रतिकारं कुर्वंति तद्भक्ताः विष्णुभक्ताः प्रभवः समर्था अपि ॥ ६९ ॥ विप्रकृताः अघं अपराधं ॥ ७० ॥ ८५

३९ ॥ तं सपै विसृज्य केनापकारः कृतः ॥ ४० ॥ अनभिनंदनवाक्यं ॥ अहो इत्यादि वतकष्टं ॥ तेन त्वया महत्
पापं कृतं ॥ द्रोहे अपराधे दंमो दंडः ॥ ४१ ॥ परो विस्मुरित्याख्याति र्यस्य तं नरदेवं नृभिः संमान्तुं समं द्रष्टुं
४२ ॥ अलक्ष्यमाणे ॥ अदृश्यमाने ॥ अविरूथवत् ॥ मेषसंघवत् ॥ ४३ ॥ नष्टो नाथो यस्य लोकस्य तस्य वे

सवा अंगिरसो ब्रह्मन्नश्रुत्वा सुतविलापनं ॥ उन्मील्य शनकैर्नेत्रे दृष्ट्वा अंसे मर्दकेरिगं ॥ ३९ ॥
विसृज्य पुत्रं पप्रच्छ वत्स कस्माद्धि रोदिषि ॥ केन वा ते अपकृतं रत्युक्तः सोन्ववेदयत् ॥ ४० ॥ नि
शम्य त्र्छप्तमतदर्हं नरेंद्रं स ब्राह्मणो नात्मजमभ्यनंदत् ॥ अहो वतांहो महदद्य ते कृतं अल्पीय
सि द्रोह उरुर्दमो धृतः ॥ ४१ ॥ न वै नृभिर्नरदेवं पराख्यं संमातुमर्हस्य विपक्वबुद्धे ॥ यत्तेजसा दु
र्विषहेण गुप्ता विंदंति भद्राण्यकुतोभयाः प्रजाः ॥ ४२ ॥ अलक्ष्यमाणे नरदेवनाम्नि रथांगपाणा
वयमंग लोकः ॥ तदा हि चौरप्रचुरो विनंक्ष्यत्यरक्ष्यमाणो विवरूथवत् क्षणात् ॥ ४३ ॥ तदद्य नः पाप
मुपैत्यनन्वयं यन्नष्टनाथस्य वसोर्विलुंपकात् ॥ परस्परं घ्नंति शपंति वृंजते पशून् स्त्रियो र्थान्पुरु
दस्यवो जनाः ॥ ४४

सोवैसुनोधस्य विलुंपकाद्यहर्तुश्चौरादेर्हेतोर्यत्पापं भविष्यति ॥ तदस्मान्निमित्तत्वात् ॥ अस्मानुपैष्य
ति ॥ अनन्वयं संबंधरहित्यमेव ॥ नरदेवपापं दर्शयति ॥ परस्परमिति ॥ सपंति परुषं वदंति ॥ पश्वादीन्वृंजते ॥ अपह

त १

भा० प्र०
८६

इत्थं चिंतयन् स राजा मुनेः सुतेनोक्तः सप्तमेहनि निर्ऋतिमृत्युर्यथा भविष्यति तथा शृणोत् ॥ शमीकप्रे
षितात् शिष्यात् ॥ श्रुत्वा च सः तत्तक्षकस्य विषाग्निं साधु मेने ॥ यतो विषयेषु प्रसक्तस्य विरक्तिकारणं
४ ॥ अथानंतरं उभौ लोकौ पुरस्तात् त्याज्यमघा एव ॥ हेयतया विचारितौ तौ विहाय श्रीकृष्णांघ्रिसे
वामेव अधिमन्यमानः सर्वपुरुषार्थेभ्योधिकां जानन् ॥ प्रायमनशनं तस्मिन्नित्यर्थः ॥ तत्संकल्पेनोपाविश

सचिंतयन्नित्थमथाशृणोद्यथा मुनेः सुतोक्तो निर्ऋतिस्तक्षकाख्यः ॥ स साधु मेने नचिरे
ण तक्षकानलं प्रसक्तस्य विरक्तिकारणं ॥ ४ ॥ अथो विहायेममुं च लोकं विमर्शितौ हेयतया
पुरस्तात् ॥ कृष्णांघ्रिसेवामधिमन्यमान उपाविशत्प्रायममर्त्यनद्यां ॥ ५ ॥ या वै लसच्छ्रीतु
लसी विमिश्रकृष्णांघ्रिरेण्वभ्यधिकांबुनेत्री ॥ पुनाति लोकानुभयत्र सेशान् कस्तां न से
वेत मरिष्यमाणः ॥ ६ ॥

दिति यावत् ॥ यद्वा प्रायं प्रकृष्टमयनं शरणं यथा भवति तथा ॥ ५ ॥ अमर्त्यनद्यां इति विशेषणस्य फलं
माह ॥ या गंगा लसंती श्रीर्यस्याः तुलस्याः तया विमिश्रिता ये कृष्णांघ्रिरेणवः तैरभ्यधिकं सर्वोत्कृष्टं पदं
वृत्तस्य नेत्री तद्वाहिनी ॥ उभयत्र अंतर्बहिश्च सेशान् ॥ लोकपालैः सहितान् लोकान् पुनाति
मरिष्यमाणः आसन्नमरणः ॥ मरणस्यानियतकालत्वात् ॥ सर्वोपि तथा ॥ अतस्तां को न सेवेत् ॥ ६ ॥ ८६

स्कं १

युक्तं चैतदित्याह ॥ प्रायश इति ॥ द्वंद्वेषु सुखदुःखादिषु अगुणाश्रयः सुखदुःखाद्याश्रयो न भवति ॥ ४१ ॥ इ
ति श्रीप्रथमेष्टादशः ॥ १८ ॥ प्रायोपविष्टं गंगायां राज्ञि योगिजनावृते ॥ शुकस्यागमनं तत्र प्रोक्तमेकोनविंश
के ॥ स्वकृतं तत्कर्म मुनिस्कंधे सर्पनिक्षेपरूपं गर्ह्यं निंद्यं चिंतयन्नसुदुर्मना जातः ॥ चिंतामेवाह ॥ सार्द्धद्वाभ्यां ॥ अ
हो इति नीचं पापं ॥ अमीवमिति पाठे स एवार्थः ॥ ब्राह्मणे गूढं गुप्तं तेजो यस्य ॥ १ ॥ कृतेन यद्देवहेलनं ईश्वरावज्ञापा

प्रायशः साधवो लोके परैर्द्वंद्वेषु योजिताः ॥ न व्यथंति न हृष्यंति यत आत्मा गुणाश्रयः ॥ ४१ ॥ इति
श्रीमद्भागवते महापुराणे प्रथमस्कंधेऽष्टादशोऽध्यायः ॥ १८ ॥ सूत उवाच ॥ महीपतिस्त्व
थ तत्कर्म गर्ह्यं विचिंतयन्नात्मकृतं सुदुर्मनाः ॥ अहो मया नीचमनार्यवत्कृतं निरागसि
ब्रह्मणि गूढतेजसि ॥ १ ॥ ध्रुवं ततो मे कृतदेवहेलनाद्दुरत्ययं व्यसनं नातिदीर्घात् ॥ तद
स्तु कामं ह्यघनिष्कृताय मे यथा न कुर्यां पुनरेवमद्धा ॥ २ ॥ अद्यैव राज्यं बलमृद्धकोशं प्रकोपितो
ब्रह्मकुलानलो मे ॥ दहत्वभद्रस्य पुनर्न मेऽभूत्पापीयसी धीर्द्विजदेवताभ्यः ॥ ३ ॥

पमित्यर्थः ॥ तस्मान्मे व्यसनं भविष्यति ॥ तच्च नातिदीर्घात्कालात् ॥ अचिरेणैवास्तु ॥ तत्रापि अद्धा साक्षात् ॥ न पुत्रादि
द्वारेणेति ॥ प्रार्थना कामं असंकोचतः ॥ एवं प्रार्थनायाः प्रयोजनं अघस्य निष्कृताय प्रायश्चित्ताय यथा पुनरेव
न कुर्यामिति च ॥ २ ॥ एवं साक्षात्स्वस्यैव व्यसनं प्रार्थ्य ततः प्रागेव किंचित्प्रार्थयते ॥ अद्यैव मे राज्यादि दहतु ॥ प्रको

पितं ब्रह्मकुलमेवानलः ॥ पुनर्द्विजादीन्पीडयितुं अधर्मे धी ॥
र्माभूत्तन्न भवेदित्यर्थः ॥ ३ ॥

भा० प्र०
८७

अनुमोदनेनानुग्रहमात्तस्य आत्मानं श्लाघयते॥ अहो इति॥ नपारणं मध्येमहत्तमैरनुग्रहणीयशी
लरत्नं येषां एतच्चरणशौमतिदुर्लभमित्याह ब्राह्मणानां पादशौचात् पादप्रक्षालनोदकात्॥ दूरादुच्छि
ष्टविरम्यत्रपादांभोसिसमुत्स्रजेदितिस्मर्यते॥ दूरेहितेः॥ तद्धिसरिन्यनेदूरादेवविसर्जनंप्रतत्रापिस्थात्तुनुप्र
यमित्यर्थः॥ गर्ह्यकर्मयस्येत्यात्मानमुद्दिश्योक्तिम॥ ४२॥ आस्तांतावदनुग्रहः [illegible] ॥ ब्रह्मशापो
पिभगवत्प्रसादादेवजातइत्याह॥ तस्यैगर्ह्यकर्मणःएवंत्रेघस्यपापात्मनःगृहेष्वासक्तचित्तस्यमेस्वपा
राजोवाच॥ अहोवयंधन्यतमान्नपारणंमहत्तमानुग्रहणीयशीलाः॥ राज्ञांकुलंब्राह्मणपादशौ
चाद्दाराद्धिसरुंस्ववत्तगर्ह्यकर्म॥ ४३॥ तस्यैवमेघस्यपरावरेशोव्यासक्तचित्तस्यगृहेष्वभीक्ष्णंनिर्वेद
मूलोद्विजशापरूपोयत्रप्रसक्तोभयमाप्नुधत्ते॥ ४४॥ तन्मोपयातंप्रतियंत्तुविप्रागंगाचदेवीधृतचि
त्तमीशे॥ द्विजोपसृष्टःकुहकस्तक्षकोवादशत्वलंगायतविष्णुगाथाः॥ ४५॥ ॥ २
अयेपएवराणामीशएवद्विजशापतयावभूव॥ यत्रयस्मिन्शापेसतिगृहेषुप्रसक्तोभयंधत्तेनिविष्टोभवति
स्वयंयतोनिवृत्तोनिर्वेदमूलः॥ निर्वेदोवैराग्यंमूलंप्राप्तिकारणंयस्मिन् [illegible] स्वस्यवैरा
ग्यप्राप्तत्वात्तस्यचभयमूलत्वात्॥ तदर्थंद्विजशापकारितवानित्यर्थः॥ ४६॥ तान्प्रार्थयते द्वाभ्यां॥ तंमामां
उपयातंशरणागतंप्रतियंतुजानंतु॥ देवीदेवतारूपागंगाचप्रत्येतु॥ वाशब्दः प्रतिक्रियानादरेगाथाःकथाः

८७

इतिएवंविष्णुपद्यांगंगायांप्रायोपवेशंप्रतिव्यवछिद्यनिश्चित्यपांडवेयइति ॥ तत्कुलोचितत्वंदर्शयतिन
अन्यस्मिन्भावोयस्यसः कृतःमुनिव्रतंउपशमःतत्कुतःमुक्तःसमस्तसंगोयेनसः ॥७॥ तत्रतदातद्दर्शना
र्थंमुनयःउपागताः नतुतीर्थस्नानार्थंकृतार्थत्वात् ॥ ननुतादृशानामपितीर्थयात्रादृश्यतेतत्राह प्रायेणेति

इतिव्यवछिद्यसपांडवेयःप्रायोपवेशंप्रतिविष्णुपद्यां ॥ दध्यौमुकुंदांघ्रिमनन्यभावोमु
निव्रतोमुक्तसमस्तसंगः ॥७॥ तत्रोपजग्मुर्भुवनंपुनानामहानुभावामुनयःसशिष्याः ॥ प्रा
येणतीर्थाभिगमापदेशैःस्वयंहितीर्थानिपुनंतिसंतः ॥८॥ अत्रिर्वसिष्ठश्च्यवनःशरद्वानरि
ष्टनेमिर्भृगुरंगिराश्च ॥ पराशरोगाधिसुतोथरामउतथ्यइंद्रप्रमदेध्मवाहो ॥९॥ मेधातिथिर्दे
वलआर्ष्टिषेणोभारद्वाजोगोतमःपिप्पलादः ॥ मैत्रेयऔर्वःकवषःकुंभयोनिर्द्वैपायनोभग
वान्नारदश्च ॥१०॥ अन्येचदेवर्षिब्रह्मर्षिवर्योराजर्षिवर्याअरुणादयश्च ॥ नानार्षेयप्रवरानसमे
तानभ्यर्च्यराजाशिरसाववंदे ॥११॥ सुखोपविष्टेष्वथतेषुभूयःकृतप्रणामःस्वचिकीर्षितंयत् ॥ विज्ञा
पयामासविविक्तचेताउपस्थितोग्रेभिगृहीतपाणिः ॥१२॥

तीर्थयात्राव्याजेन ॥८॥ अरुणादयःकाण्डर्षिविशेषेणपृथग्निर्दिष्टाः नानार्षेयाणिऋषीणांगोत्राणिते
षुप्रवरानश्रेष्ठान्शिरसाभुवंस्पृष्ट्वाववंदे ॥११॥ विज्ञापनार्थंपुनःकृतप्रणामोविविक्तंशुद्धंचेतोयस्य ॥ अभिगृही

[illegible]

भा॰ प्र॰
८८

आश्रुत्य आकर्ण्य समं प्रवृत्तपातस्सत्यं ॥ मधुच्युत अमृतस्राविं ॥ गुरुं गंभीरार्थं ॥ अव्यलीकं सत्यं ॥ २२ ॥ त्वया एणं लो
कानां पृष्ठेषु परिसत्यलोके वेदा यथा मूर्त्तिधरा भवंति तत्तुल्याः ॥ ज्ञानातिशयमुक्त्वा ॥ कृपालुत्वमाह ॥ नेहेति
भवती प्रयोजनं परानुग्रहं विनास्ति तर्हि स एवार्थः स्यात् ॥ न आत्मशीलस्य स्वभावं ॥ २३ ॥ पृष्टं प्रष्टव्यं विश्रभ्य
विश्वासं कृत्वा एवं कर्त्तव्यमित्यस्य भाव इति कृत्यतास्मिन्विषये सर्वात्मना सर्वावस्थासु कृत्यं विशेषतस्त्रि

आश्रुत्य तदृषिगणवचः परीक्षित्समं मधुच्युद्गुरु चाव्यलीकं ॥ आभाषतैनानभिवंद्य युक्तं शु
श्रूषमाणश्चरितानि विष्णोः ॥ २२ ॥ राजोवाच ॥ समागताः सर्वत एव सर्वे वेदा यथा मूर्त्तिधराः
त्रिपृष्ठे ॥ नेहाथवामुत्र न कश्चनार्थः कृते परानुग्रहमात्मशीलं ॥ २३ ॥ ततश्च वः पृष्टमिमं विपृच्छे
विश्रभ्य विप्रा इति कृत्यतायां ॥ सर्वात्मना म्रियमाणैश्च कृत्यं शुद्धं च तत्रामृशताभियुक्ताः ॥ २४ ॥
तत्राभवद्भगवान्व्यासपुत्रो यदृच्छया गामटमानोनपेक्षः ॥ अलक्ष्यलिंगो निजलाभतुष्टो वृत
स्त्रीबालैरवधूतवेषः ॥ २५ ॥

यमाणैः ॥ तच्च शुद्धं ॥ पापसंपर्करहितम् ॥ आमृशत विचारयत ॥ २४ ॥ तत्र तेषु यागयोगतपोदा
नादिभिर्विवदमानेषु सत्सु ॥ यदृच्छया गां पर्यटन् ॥ व्यासपुत्रः ॥ तत्र अभवत् प्राप्तः ॥ न लक्ष्यमाश्र
मादिलिंगं यस्य स्त्रवधूतः ॥ अवज्ञाय जनैस्त्यक्तो यः ॥ तस्येव वेषो यस्य ॥ २५ ॥ रामराम राम रामराम ए

सत्त्वाश्रयो येषां तेषु प्रकृष्टः संगो भूयात् ॥ तस्यां तस्यां सृष्टौ जन्मनि जन्मनि ॥ १६ ॥ अध्यवसायो निश्चयः प्रा
चीनमूलेषु प्रागग्रेषु कुशेषु आस्ते समुद्रपत्न्याः स्वसुते जनमेजये न्यस्तो भारो राज्यं येन ॥ १७ ॥ प्रशस्य साधु साध्विति
उक्त्वा उदाव्यकिरन् ॥ देवसंघैर्वादिता नेदुः ॥ १८ ॥ प्रजानुग्रहे शीलं सारो बलं च येषां ॥ उत्तमश्लोकगुणैरभिरूपं

पुनश्च भूयाद्भगवत्यनंते रतिः प्रसंगश्च तदाश्रयेषु ॥ महत्सु यां यामुपयामि सृष्टिं मैत्र्यस्तु सर्व
त्र नमो द्विजेभ्यः ॥ १६ ॥ इति स्म राजाध्यवसाययुक्तः प्राचीनमूलेषु कुशेषु धीरः ॥ उदङ्मुखो दक्षि
णकूल आस्ते समुद्रपत्न्याः स्वसुतन्यस्तभारः ॥ १७ ॥ एवं च तस्मिन्नरदेवदेवे प्रायोपविष्टे दिवि दे
वसंघाः ॥ प्रशस्य भूमौ व्यकिरन् प्रसूनैर्मुदा मुहुर्दुंदुभयश्च नेदुः ॥ १८ ॥ महर्षयो वै समुपागता
ये प्रशस्य साध्वित्यनुमोदमानाः ॥ ऊचुः प्रजानुग्रहशीलसारा यदुत्तमश्लोकगुणाभिरूपं ॥ १९ ॥
न वा इदं राजर्षिवर्य चित्रं भवत्सु कृष्णं समनुव्रतेषु ॥ येऽध्यासनं राजकिरीटजुष्टं सद्यो जहुर्भगवत्पा
र्श्वकामाः ॥ २० ॥ सर्वे वयं तावदिहास्महेऽथ कलेवरं यावदसौ विहाय ॥ लोकं परं विरजस्कं विशोकं या
स्यत्ययं भागवतप्रधानः ॥ २१ ॥

सुंदरमिव ॥ १९ ॥ भवत्सु पांडवेषु वंशेषु ये जहुः ॥ इति युधिष्ठिराद्यभिप्रायेण ॥ २० ॥ परस्परं मंत्रयंते ॥ स
र्वे इति परं श्रेष्ठं लोकं तत्र हेतुः ॥ विरजस्कं निर्मायं ॥ विशोकं यास्यतीति कुतस्तत्राह अयमिति ॥ २१ ॥ ५५

भगवान्ब्रह्मर्षिसंघादिभिः संवृतः अलं व्यरोचत ग्रहाः शुक्रादयः॥ ऋक्षाण्यश्विन्यादीनि अन्यास्ताराः॥३०॥ अकुंठ
सर्वार्थेषु मेधा यस्य प्रश्नार्थं पुनर्नत्वा॥३१॥ सूनृतया गिरा समाह अहो इति पंचभिः सतां सेव्या जाता वयं यतः अतिथिरूपेण
हेतुना तीर्थीकायोग्याः कृताः॥३२॥३३॥ विष्णोः सांनिध्यादसुरगणा यथैव॥३४॥ पांडुसुतानां प्रियः अतस्तेषां पैतृष्वस्रेया

स संवृतस्तत्र महान्महीयसां ब्रह्मर्षिराजर्षिदेवर्षिसंघैः॥ व्यरोचतालं भगवान्यथेंदुर्ग्रहर्क्षतारानि
करैः परीतः॥३०॥ प्रशांतमासीनमकुंठमेधसं मुनिं नृपो भागवतोभ्युपेत्य॥ प्रणम्य मूर्ध्नावहितः कृ
तांजलिर्नत्वा गिरा सूनृतयान्वपृच्छत॥३१॥ राजोवाच॥ अहो अद्य वयं ब्रह्मन्सत्सेव्याः क्षत्रबंधवः॥ कृपयाति
थिरूपेण भवद्भिस्तीर्थकाः कृताः॥३२॥ येषां संस्मरणात्पुंसां सद्यः शुद्ध्यंति वै गृहाः॥ किं पुनर्दर्शनस्पर्शपा
दशौचासनादिभिः॥३३॥ सांनिध्यात्ते महायोगिन्पातकानि महांत्यपि॥ सद्यो नश्यंति वै पुंसां विष्णोरिव
सुरेतराः॥३४॥ अपि मे भगवान्प्रीतः कृष्णः पांडुसुतप्रियः॥ पैतृष्वस्रेयप्रीत्यर्थं तद्गोत्रस्यात्तबांधवः॥३५॥ अ
न्यथा तेव्यक्तगतेर्दर्शनं नः कथं नृणां॥ नितरां म्रियमाणानां संसिद्धस्य वनीयसः॥३६॥

नां प्रीत्यर्थं तद्गोत्रस्य मे आत्तः स्वीकृतो बांधवं बंधुकृत्यं येन॥३५॥ अन्यथा श्रीकृष्णप्रसादं विना॥ अव्यक्ता गतिर्यस्य तस्य तव
दर्शनं कथं अस्मदादीनां तत्रापि म्रियमाणानां नितरां कथं स्यात्॥ वनयिता याचयिता वनयितृतमो वनीयान्॥ तस्य अत्युद

त्मित्यादीनां प्रत्युत्थिता इति तृतीयश्लोकार्थः तेनान्वयः॥ द्विगुणान्यष्टौ वर्षाणि यस्य सुकुमारौ पादौ करौ॥ ऊरू बाहू तत्रांसौ
कपोलौ गात्रं च यस्य॥ चारुणी आयते च अक्षिणी यस्मिन्॥ उन्नता नासा यस्मिन्॥ लवङ्गस्वादि विषयं विना तुल्यौ कर्णौ य
स्मिन्॥ शोभने भ्रुवौ यस्मि॥न्॥ एवंभूतमाननं यस्य॥ कंबुवद्रेखात्रयांकितः सुष्ठुजातकंठो यस्य॥२६॥ कंठस्याधोभाग
योः स्थिते अस्थिनी जत्रुणी मांसेन निगूढे जत्रुणी यस्य॥ पृथु विस्तीर्णं तुंगमुन्नतं वक्षो यस्य॥ आवर्तनाभिर्यस्य॥ वलि

तद्व्यष्टवर्षसुकुमारपादकरोरुबाहंसकपोलगात्रं॥ चार्वायताक्षोन्नसतुल्यकर्णसुभ्राननं कंबुसु
जातकंठं॥२६॥ निगूढजत्रुं पृथुतुंगवक्षसमावर्तनाभिं वलिवल्गूदरं च॥ दिगंबरं वक्रविकीर्णकेशं प्र
लंबबाहुं स्वमरोत्तमाभं॥२७॥ श्यामं सदापीच्यवयोंगलक्ष्म्या स्त्रीणां मनोज्ञं रुचिरस्मितेन॥ प्रत्यु
त्थितास्तं मुनयः स्वासनेभ्यस्तल्लक्षणज्ञा अपि गूढवर्चसं॥२८॥ स विष्णुरातोऽतिथय आगताय त
स्मै सपर्य्यां सिरसाजहार॥ ततो निवृत्ता ह्यबुधाः स्त्रियोऽर्भका महासने सोपविवेश पूजितः॥२९॥

भिस्त्रिवल्युकं निम्नोदरं वलिभिर्वल्गु रम्यं सुंदरं यस्य॥ दिश एव अंबरं यस्य॥ वक्रा विकीर्णाः केशा यस्य॥ प्रलंबौ बाहू यस्य
स्वमरेषु श्रेष्ठेषु उत्तमो हरिस्तद्वत् आभा यस्य॥२७॥ सदा अपीच्यं अत्यंतोत्तमं यत् वयो यौवनं तेन अंगलक्ष्मी देहशो
ति तया रुचिरस्मयेन गूढवर्चसमपि प्रापिता नदृष्ट्वा प्रत्युत्थानं कृतवंत इत्यर्थः॥२८॥ शिरसेव सपर्य्यामाजहार
आत्मनिवेदनं कृतवान्॥ तेन सहागताः स्त्र्यपत्यादयो निवृत्ताः स उपविवेश संधिरार्षः॥२९॥

८९
सा०टी०

सम्यक्सिद्धिर्यस्मात् ॥ यत्कार्य्यं किन्तु योग्यं ॥ ३७ ॥ कर्त्तव्यं त्वावश्यकमिति भेदः ॥ विपर्य्ययं ॥ अश्रान्तव्यादि ॥ ३८ ॥ त्वद्दर्शन
स्य पुनर्दुर्लभत्वादिदानीमेव कथनीयमित्याशयेनाह ॥ नूनमिति ॥ गोदोहनमात्रकालमपि ॥ ३९ ॥ एवं अहो इत्यादिक
या श्लक्ष्णया मधुरया गिरा आभाषितः ॥ अभिमुखीकृतः ॥ ४० ॥ प्रथमस्कंधगूढार्थपदभावार्थदीपिका ॥ स

अतः पृच्छामि संसिद्धिं योगिनां परमं गुरुं ॥ पुरुषस्येह यत्कार्य्यं म्रियमाणस्य सर्वथा ॥ ३७ ॥ यच्छ्रो
तव्यमथो जाप्यं यत्कर्त्तव्यं नृभिः प्रभो ॥ स्मर्त्तव्यं कीर्त्तनीयं वा ब्रूहि यद्वा विपर्य्ययं ॥ ३८ ॥ नूनं भग
वतो ब्रह्मन् गृहेषु गृहमेधिनां ॥ न लक्ष्यते ह्यवस्थानमपि गोदोहनं क्वचित् ॥ ३९ ॥ सूत उवाच ॥ एव
माभाषितः पृष्टः स राज्ञा श्लक्ष्णया गिरा ॥ प्रत्यभाषत सर्वज्ञो भगवान्बादरायणिः ॥ ४० ॥ इति श्रीम
द्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां प्रथमस्कंधे एकोनविंशोध्यायः ॥ १९ ॥

द्विरुद्दीपनीयेयं यथा स्यात्तत्वदीपनं ॥ १ ॥ आर्य्यधर्म्मजमाहत्ता रिमवनीकृत्वा परीक्षिन्नृपं ॥ ब्रह्मास्त्राद्रभि
रक्षितं कलिजयं ख्यातं च कृत्वा भुवि ॥ अंते यः शुकरूपतः स्वपरमज्ञानोपदेशेन तं ॥ शापाद्दृवद्दस्तुं भज्ञामि प
रमानंदाकृतिं माधवम् ॥ २ ॥ इति श्री प्रथमस्कंधे एकोनविंशः ॥ १९ ॥ शुभमस्तु ॥ ॥ ॥ ॥